मरैः॥३२॥गणैर्द्रैर्मुनिभिःसार्धंतत्पूजानिरतोभव॥फलमूलाशनैःपाद्यैःगंधपुष्पनिवेदनैः॥३३॥पारिपात्रस
मागच्छभक्ष्यभोज्येषुसंवसपर्वतैःसहवोक्ष्यैवसुराणांपरिवेषकः॥३४॥भवमातंद्रितोभूत्वानन्यूनंनाधिकंभ
वेत्॥कुमुदागच्छभद्रंतेतांबूलानांनिवेदने॥३५॥सुरेषुगणवर्येषुमुनिष्वपिसदामुदा॥यथादित्संप्रदेत्याशुअ
त्रमातंद्रितोभव॥३६॥त्वनवार्द्वेभुपानीयेअंजनस्त्वंविलोकगः॥वसमातंद्रितोभूत्वाशय्यासनसमर्पणे॥३७
॥दर्दरातंद्रितोभूत्वावसेहप्रतिपालय॥भवत्सुन्यस्तभारोस्मिमैनाकेनसुखंवसे॥३८॥कुमुदोपस्त्रभूषणानां
प्रदानेनिरतोभवेत्॥पर्वतेंद्रांगनाःसर्वामेनयासहसादरं॥३९॥वैवाहिकेत्रकन्यायाःमंगलाचरणेरताः॥सु
वासाभरणाःपुष्पैःगंधैश्चात्रविभूषिताः॥४०॥भक्ष्यैर्भोज्यैःसमर्चेन्तुशिवंसुरगणैःद्विजैः॥नैवाह्याप्सरःका

शि॰पु॰ यौ भवद्भिर्मे निचारितं॥ ४१॥ कर्तव्यं सावधानेन ना विस्रब्धेन चेतसा॥ नाविनीतैः सदा भाव्यं भवद्भिर्गैः कदाचन॥ ४२॥
रु॰ मेना मेने स्वमात्मानं पर्वतेंद्र गनावृतं॥ तान्संविभज्य सा देवी वस्त्रालंकारभूषणैः॥ ४३॥ भक्ष्यभोज्यैश्च पानीयैः गंध
३० पुष्पप्रदापनैः॥ स्वपुत्रनिर्विशेषा तान्सा गिरीन्संतोष्य सुव्रता॥ ४४॥ पतिव्रता तदा मेना मंगलाचरणोद्यता॥ परैन्हि
गिरिराट् तत्र कृतकौतुकमंगलः॥ ४५॥ मैनाकमाह पुत्रं तं गिरिनानयमें निकं॥ स्नानानंदिव्यांवरधरानगंधस्रक
भूषणैर्युतान्॥ ४६॥ सदारतनयानत्र विमानं मे त्वरं सुतं॥ सुनेरणापताका ढ्यं रत्नपुष्पसरावृतं॥ ४७॥ वितानप
दृवस्त्रैश्च समलंकृतभासुरं॥ राजकुंभपताका ढ्यं धूपितं मणिदीपितं॥ ४८॥ स गिरेः स पितुर्वाक्येन त्वाज्ञग्राह सा
दरं॥ गिरिंद्रवचसा तत्र गिरीनाहूत दामुदा॥ ४९॥ मैनाकः स तदा वाक्यं सुविनीतेन चेतसा॥ मैनाक उवाच॥ गिरि
राजं गिरिश्रेष्ठान्द्रष्टुमिच्छथं सत्वरं॥ सदारतनयाः सर्वे वस्त्राभरणभूषिताः॥ ५०॥ गौरिं चिरं तपःक्लिष्टां भवद्भिर्द्रष्टु
मिच्छति॥ इति मैनाकवचसा गिरयस्त्वरा तदा॥ ५१॥ गंधालंकारवासोभिः सदारतनयाः तदा॥ भूषिता गिरिराजानं आ
ययुस्ते प्रणम्य च॥ ५२॥ ऊचुः प्रांजलयः सर्वे किमत्र करवामते॥ त्वदाज्ञयैव सर्वत्र विहितं सिद्धमेव ते॥ ५३॥ सर्वसंपूर्ण
मेवास्ति त्वयि शासति भूधरे॥ नन्यूनं किंचिदेवात्र संविधानं विधत्स्व नः॥ ५४॥ तदा गिरीणां वचनात्स हृष्टो वाचमब्रवीत्
॥ हिमवानुवाच॥ अपर्णा पर्णवसनां क्लिष्टां देवीं तपोरतां॥ समानयामितां देवीं भवद्भिः कृतमंगलां॥ ५५॥ तपो
वनात्महेशस्य समुद्वाहो रुमंगले॥ समारुहं तु भद्रं वो विमानं मे सदारकाः॥ ५६॥ तदा तदाज्ञया सर्वे विमानमधि
रुह्यते॥ मेनापि नगनारीभिः कृतकौतुकमंगला॥ ५७॥ पर्वतेंद्रः स मैनाको ययौ स नगसत्तमैः॥ सुमनोवर्षानकैः राम॰
गायं गंधर्वसत्तमैः॥ ५८॥ नृत्यंत्यप्सरसां संघैः भेरीपटहनिस्वनैः॥ नीराजनकैस्तत्र ययौ देवीं विलोकितुं॥ ५९॥ ग ३०
त्वा तपोवनं देव्याः गिरिभिः गिरिनायकः॥ मेनया गिरिपत्नीभिः तां विलोक्य तपस्विनी॥ ६०॥ स्लेषितां रजसा तत्र जटि
लालकसंयुतां॥ तामुत्थाप्य स्वके त्संगे संनिवेश्य गिरीश्वरः॥ ६१॥ उवाच सांत्वयंन्गौरीं पर्वतेंद्रो मेनया सह॥ हिमवा

यानुवाच॥ चिरं क्लिष्टासि तपसा सफलस्ते मनोरथः॥ नारदेन सुरैः प्रोक्तं शर्वस्यागमनं मम॥ ६७॥ तवोद्वाहोन्न सुभगे मंडयस्वा
त्मनस्तनुं॥ इत्युक्त्वा पार्वती हृष्टा समाप्य नियमं वनात्॥ ६८॥ तपोवनांगनाः सर्वाः संतोष्य च स्ववासमा॥ निशागंधैः कुंकु
मैश्च गंधपुष्पसदृक्षिरां॥ ६९॥ विभाज्य मुनिगणांश्च हिमशैलकृताश्रमं॥ गोभिर्हिरण्यवासोभिः अभिपूज्य च सा तदा॥
७०॥ उत्थाय नत्वा गिरिशं केदारं चाभिपूज्य च॥ गंधमाल्यैर्बिल्वपत्रैः पंचामृतनिषेचनैः॥ ७१॥ धूपैर्दीपावलीभिश्च खंडक
र्पूरसोज्वलैः॥ नत्वा तुष्टाव हृष्टांसा मेनया भूधरेण च॥ ७२॥ हर हर सुरजिन्त्वपूजितांघ्रे वरद कोदर हार सोमचूड॥
गरकंठानलचारुनेत्र शंभो सदयं मामवलोकयाशु दीनां॥ स्तुत्वा नत्वा च सा देवी केदारानुज्ञया शिव॥ समर्प्य च तप
स्त्रमेनया सह निर्ययौ॥ ७४॥ विचित्रमंडपे तत्र रत्नसिंहासनस्थिता॥ पर्वतेंद्रांगना देवीं परितस्तत्र आसने॥ ७५॥ वि
शोध्य ताजला देव्या कंकतैरल्लिकं तथा॥ गंधतैलैस्तथाभ्यज्य मेनया तां नगांगना॥ ७६॥ हरिद्रापटवासोद्दैः कवो
ष्णोरभिषिच्य तां॥ रजसा रूषितां देवी चिरमभ्यज्य तां तदा॥ ७७॥ तदंगजं मलं तत्र पिंडीचक्रुर्नगांगनाः॥ अपर्णा पर्णवस
नं तत्यजुर्गिरिपत्न्यः॥ ७८॥ खेलंती सा तदा देवी स्वांगस्नानमलेन वै॥ विधाय मूर्तिं रुचिरां गजास्यां कर्णमंडितां॥ ७९॥
भूषणैर्मकुटेनैव वक्त्रस्तुतमधुव्रतां॥ संप्रोक्ष्योज्जीव्य तां मूर्तिं पश्यंतीनां च विस्मयं॥ ८०॥ उवाच गिरिजा तत्र दृष्ट्वा तत्र
गजाननं॥ पुत्रो मे भव देवेश विघ्नराजस्त्वमेव मे॥ ८१॥ त्वामर्चयाम्यया दौ मे निर्विघ्नं मंगलं भवेत्॥ भव त्वं सर्वकार्ये
षु पूज्यः सर्वसुरासुरैः॥ ८२॥ एवमेव वरदानेन कृतः पुत्रो गजाननः॥ अनभ्यर्च्यात्र यो देवं नन मंत्यपि ये सदा॥ ८३॥ ते
षां विघ्नप्रदोयं च भविष्यति न संशयः॥ इत्युक्त्वा सा तदा स्नात्वा मेनया सह सादरं॥ ८४॥ गंधमाल्यांबरैश्चित्रैः भूषयि
त्वात्मनस्तनुं॥ धम्मिल्लमल्लीविलसत्केतकीवरकर्णिकां॥ ८५॥ छत्राककुसुमोदारसुफुल्लसेमंतीरत्नसंततिः॥ रत्नग्रैवेय
वलयैर्बाहुबंधैर्मनोहरैः॥ ८६॥ तिलकांकितसत्फालां सिंदूरीकीर्णभालकां॥ कांचीबद्धितमध्यां च रणन्नूपुर
घोषितां॥ ८७॥ मुद्रिकांगुष्ठवलयैः पादपद्मविभूषणैः॥ अलक्तारक्तपादाब्जां मेनया भूतदां विवक्त॥ ८८॥ कृत

शि॰व॰ हीरकनाडुकमंडितां रत्ननासिकां॥ नीराज्य वरदीपैस्तां नगपत्न्यो महेश्वरीं॥ ८९॥ बुभुजुः भक्ष्यभोज्यैश्च केदारेशनिवेदि
र॰ तैः॥ सदारतनयाः सर्वे पर्वतेंद्रेण पर्वताः॥ ९०॥ धनतांबूलवस्त्राश्च गंधपुष्पविभूषितैः॥ सुप्रहृष्टैर्गिरिवराः विमानेना
३१ र्करोचिषा॥ ९१ मेनया चनदादेव्या पर्वतानां च भामिनीः॥ नदत्सु देवतूर्येषु पुष्पैराकीर्णातलेषु च॥ ९२॥ नृत्यंत्यप्सरसां
संघैः प्रययौ सा गिरेर्गृहं॥ भूधरेणा गिरिज्ञानैः मंडितं धूपितं मुदा॥ ९३॥ स्तनतोरणसंबाधं रंगवल्लीनसंततं॥ कदलीस्त
संबाधं पूर्णकुंभविराजितं॥ ९४॥ नीराजयंति गिरिजां वरपर्वतेंद्रपत्न्यस्तदा प्रमुदितास्वगृहेषु तत्र॥ लाजैः किरंति सु
मनोभिरतीव हृष्टा गायंति तत्र मधुरं महता मुदा ताः॥ ९५॥ गिरिद्वारमासाद्य देवी समेना गिरींद्रेण मैनाकयुक्ता गिरींद्रैः
॥ अवारुह्य मोदाद्विवेशालयं स्वपितुस्तत्र भेरीरवोद्दामशंखादिशब्दैः॥ ९६॥ स्थिता लालिता भोगभाग्यैश्च पित्रा गि
रींद्रेण मेनायुता पर्वतेंद्रैः॥ तदासेविता पर्वतेंद्रांगनाभिः शिवा भक्ष्यभोज्यैस्तदास्तैव सेव्या॥ ९७॥ इति श्रीशिवरह
स्ये ईशानाख्ये द्वादशांशे देवीसमागमनं नाम चतुर्दशोऽध्यायः॥ १४॥ श्रीईशानायनमः॥ श्रीस्कंद उवाच॥॥
सुरा नारदवाक्येन संतुष्टा अभवंस्तदा॥ मंडपानां च निर्माणं श्रुत्वा ते विश्वकर्मणः॥ १॥ संमंत्र्य गुरुणा देवाः ब्रह्म
विष्णुपुरोगमाः॥ ययुस्ते मंदरगिरिं नानाद्रुमलतावृतं॥ २॥ अपश्यन्नाश्रमं शंभोः प्रशांतमृगसंकुले॥ सुपुष्पि
ततरुच्छायं गिरिनिर्झरभूषितं॥ ३॥ क्वचित्ताम्रं क्वचिन्नीलं क्वचित्पीतारुणप्रभं॥ उत्फुल्लहल्लकारक्तकमलैः पुंडरी
कवैः॥ नीलोत्पलैर्विकसितकुमुदालिविराजितैः॥ नानापक्षिसमूहैश्च केकिकोकिलकूजितैः॥ ५॥ सरोभिस्सा
गराकारैः पर्यंतकदलीवनैः॥ विलोलविपिनैश्चैव नक्षत्रालेढिशाखिभिः॥ ६॥ शिखंडिनः कुंडलिभिः सिंहाश्चमृ राम॰
गणैः सह॥ व्याघ्रीस्तनं वनगवां वत्सास्तत्र पिबंत्यपि॥ ७॥ नकुलाः सर्पमौलिस्थाः गरुडाः पन्नगैः सह॥ उलूकावा ३१
यसैस्तत्र क्रीडंति च यथासुखं॥ ८॥ तत्र देवं च ददृशुः देवास्तत्र महेश्वरं॥ नंदिना वारिता आसन् गणैः शूलधरैः
सुराः॥ ९॥ सत्पुंडरीकधवलामलकोशकाशसंकाशशारदसुनीरदपारदाभं॥ विद्युत्पिशंगतटिनीजटाकोटि

भास्वच्चंद्रांशुरेखरमहोप्रणताःस्तुवंति॥१०॥ देवाऊचुः॥ विद्युत्पुंजपिशंगचंचलजटाजूटस्फुरत्स्वर्धुनीखेलद्बालमराल
विभ्रमकरश्रीचंद्ररेखांकितं॥ वामांकाहितजानिवांछितफलप्रासुंपरंदेहिनांतेजःकिंचनपुंजितंसुरदृशोरभ्यर्णमासी
दत्तु॥११॥ श्रीमद्दक्षाध्वरघ्नध्वनिमुखरितदिग्भासिघंटार्भटीसंत्रस्तत्रैलोक्यमाद्यद्घननिभमहिषारूढकालघ्नशं
भो॥ भ्राजत्कोटीरशीर्षभ्रमदमरधुनीलोलकल्लोलखेलच्चंद्रोद्यत्कांताम्रतास्वादनमुदितमनःपाहिभोनखजस्त्रं॥१२॥
कटकितनतस्तुश्रवसेकलितावनतिःकरींद्रचर्मवसे॥ मस्तकधृतचंद्रमसेकैलासक्षेत्रवासिनेमहसे॥ भजंतुकतिचि
च्छ्रुतिंनिगमशीर्षभीमाटवींचरंतुकतिचित्परेपरिचरंतुकर्माटवीं॥१३॥ वयंत्रिदशनिम्नगातरुणचंद्रलेखालसज्जटा
कुटमंडितप्रणतिभिःप्रमोदामहे॥ यजंतांदेव्यारिंकतिचनरमंतांक्रतुशतैःपरेकर्मस्वन्येसकलमनुतीर्थंभजंति
चित्॥१४॥ वयंशुभ्रस्निग्धस्फटिकसममीशंत्रिनयनंस्मरंतःपापानिप्रदिनमनंतानिधुनुमः॥ मरुन्मौलिन्यौति
र्मयमकुटनीराजितलसत्पदांभोजद्वंद्वंरजतगिरिसौधेमणिमये॥१५॥ समासीनंकल्पद्रुमरुचिरमूलेगिरिजयास
व हैपास्यंदेवंभजजलधिसंतारणपटुं॥ पुण्यप्रख्यानदिव्योत्सवभवपरमानंदसंपूर्णमूर्तिःसर्वैर्देवैःसमेतैःदिविभुवि
मनुजैःश्रीमहादेवमूर्तिः॥१६॥ चित्रंसंगीयमानोमणिगणविलसत्पुष्पकेयोविमानेभातिश्रीशैलकन्यानटभुविस
गणःपातुनःसोयमीशः॥ विपक्षदक्षकर्तृकाध्वरारिभीमकोपजत्रिशूलपाणिवीरभद्रसगणागमेसतिश्रियःपतिःक्व
वाक्पतिःशचीपतिःक्वरैक्पतिःक्वहव्यवाडहव्यवाडतोहतोहितन्नमखः॥ यस्यादाघातगाढत्रुटितमहदुरोनिर्गलद्रक्तधा
रासलिप्तापादशीर्षादिनकरतनयःशीर्णशैलायितोभूत्॥१८॥ मार्कंडेयंस्वभक्तंनिरवधिकरुणःषोडशाब्दायुषंय
स्संचक्रेनेककल्पायुषमवतुसनोईश्वरोनंतशक्तिः॥ पादौशीर्षंचयस्यद्रुहिणमधुभिदौद्रष्टुकामौप्रविष्टौपातालं
व्योमवेगान्निरवधिसततंमार्गमाणौभ्रशान्तौ॥१९॥ लज्जाविष्टावभूतांश्रुतिगणवचसामप्यगम्योमहेशःसोयंसद्धि
त्सुखात्मासुरमनसिसदासंनिधत्तांगिरीशः॥ अंतर्यामित्वमीशत्वयियसतियदिद्दिप्रमेवास्मदीयंचित्तंत्वयादप

शि॰व॰ द्वैनिरुपमसुखदेवज्ञलेपाधितंस्यात्॥२०॥ लोकेशत्वाभिमानप्रतिहतधिषणाब्रह्मशक्रादयोयत्स्थानस्थत्वादिदं
र॰ व्याप्तिजगतिबहवः कुर्वतेचक्रकृत्यं॥ यद्भूसंदप्रयुक्तत्रिदशपतिरमाधीशवाणीशमुख्याः स्वस्वस्फीताधिकारंदृढ
३२ तरमतिशंकुर्वतेदेवसंघाः॥२१॥ यद्द्वारस्थायिनंदीश्वरनिकटगतावश्यहस्ताविनीताकांक्षंतेनेयदाज्ञांनिवसतुहृदयेसर्व
गःसोयमीशः॥ भांडंकांडप्रचंडंवसुयुवतिलसत्तुंडमुंडंकरंडंवेतंडंचारुशुंडंरुचिनिधिशशभृत्खंडपूर्णंशिखंडं॥२२॥
कोदंडंदंडषंडंसुरयुवतिकृतंतांडवादिप्रकांडंहित्वाश्रीदेयचंडंद्रुतममरवराद्युमायांतिहित्वा॥ कुंभासंभासिडिंभाकृ
तिगतिमतुलंभानुजंभारिवंद्यंरंभारंभातिडंभान्विधियुवतिसुवागुंभसंभावितंयत्॥२३॥ सिंभःशत्रूभदंभोधरभृशमघने
कल्पवृक्षत्वानिलैकंतेजश्रीशंभुसंज्ञंनिरवसतुहृदयेसर्वदासौख्यदेतत्॥ कांतंदांतंप्रशांतंसकलद्विविषदस्तोषयंतंज्वलं
तंवंतंसंतंमहांतंमुनिहृदिसततंसंवसंतंविभांतं॥२४॥ शांताहंतामहांतःश्रुतिशिरसिसदास्वांतसंक्रांतचित्ताः येध्या
यंतिस्वगाध्यगिरिशमनुपमाः तेभ्यएवानतिर्नः॥ वेदांतप्रतिपाद्यवस्तुविजयप्रौढात्मलाभप्रभुत्पारावारऽनिम
ग्नचित्तसनकश्रेष्ठाद्ययोगीश्वराः॥२५॥ ज्ञानंनिप्रभवंनयस्यनिगमावक्तुंनदक्षाश्चयत्तद्वैवंतत्सवितुर्वरेण्यमतु
लंज्योतिपरंधीमहि॥ धूतंयद्विभवेनखंमुमनसांवदैर्यदाज्ञोद्यतेमायेवातुलशेवधिंश्रुतिशिरोभीमाटवीमध्य
गं॥ धन्यामूलिकयाधियातिसुखदंयन्मार्गयंतेसदाशैवंतत्सवितुर्वरेण्यमतुलंज्योतिःपरंधीमहि॥२६॥ शुक्ला
शुक्लसमस्तधर्मकरणंचित्तंयदीयेक्षणाभेदध्यानकलांसहस्रशतिकांताईत्यहोसर्वदा॥ ज्योतीषिप्रवराण्यतीं
द्रियदशायत्रोदयंयांतिखेशैवंतत्सवि॰॥२७॥ प्रभूहूतोलोकःत्रिपुरहरशंभोकथमहोत्वदीयोहंदूतोवसतित राम॰
दिशोहंयदिवदेः॥ भवेयुस्तद्दूतानहसितविधीद्रादिपतयः अतस्त्रायस्वेमंनलिनदृगपांगैककृपया॥२८॥ प्रजो ३२
त्पत्तिंयस्यद्रुहिणसुरनाथप्रभृतयस्त्वनारव्यामोक्षप्सुभितहृदयानिर्जरगणाः॥ प्रसाद्यस्तोत्रैर्यत्सफलसुरसे
नापतिमगुर्वरेण्यंतद्भर्गःसवितुरितिभीमैरनुपमं॥२९॥ सर्वैरांगिरसैरपिप्रतिहितंकृत्वादिकंयत्स्मृतिध्वस्तंस्या

न्प्रतिपाद्यवस्तुगिरिशःसच्चित्सुखात्माशिवः॥यस्यास्तांरविमंडलांतरगतांज्योतिर्मयींचिन्मयींगायत्रींहृदिभावयामि
सततंतत्त्वैकधीसिद्धये॥२०॥ यस्यश्रीमुखसर्वदेववनितानृत्यंतिगायंतितज्ज्ञत्वारसुमहाप्रदोषसमयेमार्दंगिका
केचन॥प्रौढाःकेचनवेणुतालकृतिनःप्रीतिंसुराःकुर्वतेशैवंतत्त्व०॥२१॥ योपाराज्ञवसागरात्सकृदपिध्यानस्वना
मस्मृतिप्रीतस्तारयतिप्रभुःकरुणयापर्णाशनानामपि॥ध्यानागम्यतनुःश्रुतिःप्रवचसांदूरीकृतात्मापरःतंशंभुं
रविमंडलांतरगतंज्योतिर्मयंधीमहि॥२२॥ प्राग्नंनित्ययुवत्वमाप्तुरचितंदेवैःमृकंडैःपरंपुत्रेणामिततेजसाधन
दत्तासर्वातिशायिन्यहो॥यश्रीशेनयदीयभक्तिकलनादध्यात्मविद्यर्षिभिःतंशैवं॥२३॥ धातुःसृष्टिपरंपराचतुर
तासर्वज्ञताचेशनाप्रोक्तंव्याकरणंसमस्तमुनिषुख्यातेषुविख्यातितं॥ कृत्स्नंपाणिनिनाप्रणीतगहनंयद्भक्तितःसू
त्रतःलब्धाख्यातमहेश्वरेणसपरांवाचंप्रदिश्याद्विरः॥२४॥ वेदाःशैवपुराणभारतचिरंप्रख्यातसर्वामरब्रह्मर्षि
त्रिदशर्षिसर्वमनुजप्रोद्गीयमानंसदा॥यस्मात्वर्धकृतेश्वरत्वमतुलंनित्यंविजेजीयतेशैवं०॥ प्राप्यंतेबहुधान्य
रत्नकनककस्तूरीरत्नसद्मांतमक्रीडाचामरशारदंडरुचिरछत्रेभघोटादयः॥ वैरिंचंपदमैंद्रिरेशममरेशत्वंचयस्येज्य
याशैवंतत्सवितुर्वरेण्यमतुलंज्योतिःपरंधीमहि॥२६॥ शैवेनामनिसंप्रमाथिनिमहापापव्रजानांसदाकाचिंतान
रकानुभूतिविषयेमाभैष्टभोभोजनाः॥ तन्नाश्यानिपातकानिभुवनेसत्यंहिसत्यंवदाम्यत्रैखिलधर्मशास्त्रनिगमाः
संतिप्रमाणान्यहो॥२७॥ शंभोर्विक्रममप्रमेयमतुलंतज्ज्ञानतांमाधवप्रेष्ठानामसुरद्विषांपुरवधेकैंकर्यभातन्वतां
॥मत्वानादरमंतरंगजनितंतस्मिन्स्मरोगोधिदृक्दग्धंतत्पुरमीदृशायभवतेनित्यंनमःकुर्महे॥२८॥ यद्गीवोड्डा
सिघंटाध्वनिपरिनयनप्रौढमौलिप्रहारप्रोद्दंडैकप्रचारैर्घनघनरवतत्सत्रमूर्द्धाधिकारिं॥ आरूढस्तंमहेशोरवमग
तनयास्कंदपार्श्वद्वयाग्रोनश्विंतेसंनिधत्तांनतनिहितदयः काममुख्यारिहारी॥२९॥ उद्दंडाग्निशांत्यैपुरहरनिटिले
चित्रभानुस्वरूपंधत्तेनेत्रंपुरातंमाप्रदहमदहितंकर्मजालंबनंत्वं॥ संप्रत्युद्दंडकामप्रमुखरिपुगणोबाधतेनःत्वन

शि॰व॰ स्त्वंतंनिःशेषंदहत्वंसुविमलहृदयास्त्वांभजामोह्यजस्रं॥ ४०॥ योयंव्योम्निस्वभानुप्रखचितविलसन्मंडलस्वप्रकाशज्योति
र॰ ष्टंतंस्थितंतत्परमशिवरुचिस्त्रोमसर्वप्रकाशः॥शर्वापत्यस्त्वनेनप्रमुदितहृदयस्तारकारिप्रपीडांनिर्धूयाशुकटाक्षैः
३२ सुखयतुसुरतांदेवसेनेशदानात्॥ ४१॥ सूतउवाच॥ शचीपतिर्यांपतिः पितृपतिःस्वधायाःपतिःनमामकिलभार
तीपतिर्याज्ञसद्मापतिः॥दिशांचपतिभिःसदाअनिलसोमसूर्यैर्विभुंतदाद्भुविनयानताः पुरहरंपतीनांपतिं॥ ४२॥
देवाऊचुः॥सुरत्नानिरत्नानवाञ्जपादेहरसंहारयतारकोरुदुःखं॥ कुरुपाणिग्रहणांचमंगलयाः सुरसेनापतिकार
णायतद्गुणे॥ संतारयाद्यसुरतांशिवतारकाद्धिः स्वायुधेस्त्वमसिदेवसुकरणीधारः॥ सेनापतिर्भवतुनः सुकुमार
रूपोपर्जन्यघोरनिनदोवरलारजंन्ये॥ ४४॥ श्रीस्कंदउवाच॥ तदासदेवप्रवरोरुयाचंश्रुत्वामुदाहभगवानसुरसत्त
मांस्तान्॥सेनापतिर्भवतुवः सुकुमाररूपोभूरारितारकहरोस्तुमुदाद्ययामि॥ ४५॥ इतिश्रीशिवरहस्येईशानाख्ये
द्वादशांशेदेवसवोनामपंचदशोध्यायः॥ १५॥ श्रीईशानायनमः॥ श्रीस्कंदउवाच॥ प्रीतश्चभगवान्रुद्रर्वःसुराणा
संस्तवात्तदा॥ तपसाचमहादेव्याः तदासवृषभध्वजः॥ १॥ हितायचसुराणांचक्रीडार्थंभगवान्भवः॥ तदाहैभवतीं
देवींविवाहस्समनात्वभूत्॥ २॥ जगामचविधिः पूर्वंमरीच्याद्यैर्महर्षिभिः॥ हिमाचलंमहादेवींफलपुष्पविभूषणैः
॥३॥ विरजोंवरसंयुक्तः नानावाद्यकृतारवैः॥ नृत्यद्भिरप्सरस्संघैः स्वयंतत्रप्रजापतिः॥ ४॥ समागमंचब्रह्माणं
श्रुत्वानारदवाक्यतः॥ प्रत्युद्ययौगिरिश्रेष्ठोगिरीशैसार्घ्यहस्तकः॥ ५॥ प्रणम्यपद्मजातंतंऋषीन्सर्वान्गिरीश्वरः
॥ उवाचविनयोदारमेनयाहिमभूधरः॥ ६॥ हिमवानुवाच॥ धन्योस्मिगिरिवर्येषुस्वयंब्रह्मामुनीश्वरैः॥ देव्या
लोकनहर्षायसमायातोसिमेगृहं॥ ७॥ मुहूर्तोयंशुभोदर्कः देवींद्रष्टुमिहार्हसि॥ गिरिराजवचः श्रुत्वाब्रह्मा राम॰
प्राहतदागिरिं॥ ८॥ अनुग्रहेणसततंमरीच्याद्यैर्मुनीश्वरैः॥ ब्रह्मोवाच॥ गिरिश्रेष्ठभवान्कंन्यांमहेशायातु ३२
मिच्छसि॥ ९॥ त्वत्तोधन्यनरःकोवातेननतेकुलमुन्नतं॥ देवींद्रष्टुमिहेच्छामिपूजयामिसुभूषणैः॥ १०॥ दर्शयाशुगिरिश्रे

ष्ठमेनयानीयतांशिवां॥ इत्थंसवेधसोवाक्यंत्वरायुक्तोनयच्छिना॥ २१॥ मेनयाभूषणैर्युक्तांविरजांवरसंयुतां॥ गंधपुष्पै
र्भूषितांतांतत्रानीतांचसंसदि॥ २२॥ अथशैलसुतादेवीशिविकांसमलंकृतां॥ रत्नोपधानशय्याढ्यांमुक्तागुच्छविभूषितां॥
२३॥ मेनयासहचारुह्ययैतत्रैवसंसदि॥ कालिंदीगिरिपुत्र्यास्तुसंध्यापूर्णेंदुमंडलं॥ २४॥ सितातपत्रंरत्नालिमुक्तागु
च्छान्वितंदधौ॥ चामरेवीजितुंद्वेव्यापार्श्वयोःरत्नदंडके॥ अप्सरोगणनृत्यैश्चभेरीमर्दलशंखजैः॥ गंधर्वगानैर्वंदीनांजयश
ब्दैःसदाययौ॥ २६॥ सिंदूरारक्तगंडेनगणायेनपुरःसरं॥ गिरिमात्रशरीरेणसमायातानदांबिका॥ २७॥ कोयमायातिग
णपोगजाननवराकृतिः॥ ब्रह्मादिविबुधैस्तत्रपश्यद्भिर्विस्मयात्तदा॥ २८॥ उत्थायप्रणताब्रह्मामरीच्याद्यैर्महर्षिभिः॥ स्व
र्णपुष्पैर्विकीर्यावायादयोःसतदाविधिः॥ २९॥ अवरुह्यमहादेवीमेनयासंस्थितानदा॥ सिंहासनेरत्नसंस्थामणिविद्रु
मभूषिते॥ पुरःसंस्थाप्यविघ्नेशंसर्वाभरणभूषितं॥ पश्यन्तरसांन्नतांवीजितामरचामरैः॥ ३१॥ तदास्यायमुदाब्रह्मादेव्याः
पादाब्जयोर्युगं॥ प्रक्षाल्यपाणिनामूर्ध्नितज्जालंसविधिर्दधे॥ ३२॥ गंधपुष्पैश्चवासोभिःभूषणैरुद्यतोविधिः॥ फलजा
लंपुरोन्यस्यमुनिभिस्तांशिवांतदा॥ २३॥ ब्रह्माणमाहसादेवीतदावीक्ष्यगजाननं॥ मकुटांगदकेयूरभूषणैर्भूषितंपुरः॥
२४॥ श्रीदेवीउवाच॥ ब्रह्मन्महर्षिभिःपूज्योसर्वैरेषगजाननः॥ ममैववरदानेनममपुत्रोयमंदशजः॥ २५॥ सर्वेषांवि
घ्ननाशायविघ्नेशःपूज्यतामयं॥ तदेवदेव्यावचसासंप्रणम्यगजाननं॥ २६॥ महर्षिभिस्समभ्यर्च्यगंधपुष्पाक्षतासु
भैः॥ फलैश्चभक्ष्यभोज्यैश्चवासोभिर्भूषणैर्वरैः॥ २७॥ स्तुत्वाप्रणम्यविघ्नेशमेवमाहप्रजापतिः॥ ब्रह्मोवाच॥ पाशांकु
शाक्तकरशोभितदेवसत्त्वविघ्नाद्रिनाशकवरोदरनागवंधं॥ शुंडाधृतोरुवरमोदकविघ्नसंघसंतोदकंप्रणततंगण
नाथमद्य॥ २८॥ जगत्त्रयेषुसर्वत्रत्वंहिविश्वगणेश्वर॥ संपूज्यःसर्वकार्येषुनिर्विघ्नार्थंगजानन॥ २९॥ त्वामादौसर्वका
र्येषुपूजयंतिसुरासुराः॥ अनभ्यर्च्ययतांविघ्नंभवस्येवपदेपदे॥ ३०॥ इत्थंप्रसाद्यगणपंवरेणैवप्रजापतिः॥ गजान
नात्मयादेवींपूजयामाससवैविधिः॥ ३१॥ गंधैःपुष्पैश्चवासोभिर्भूषणैर्भूष्यमेनया॥ गिरिराजंसमेनाकंगिरीनन्यांतदा

शि॰व॰ मुदा॥ ३२॥ गंधैःपुष्पैश्चतांबूलैनदांबांतुष्टुवेविधिः॥ ब्रह्मोवाच॥ धत्तापायेकायेभिषगधिपजायेममसुदेमहोच्छाये
र॰ मायेभवविपदुपायेगिरिसुते॥ जगद्रक्षादीक्षासकरुणकटाक्षात्वमचिरात्कदासाक्षाद्राक्षारसवदपरोक्षायभव
३४ सि॥ ३३॥ यशःस्फुरमतस्फारंस्वरुचिधिःकृत्वाहस्फारंसदिंद्रमणिसुंदरंरुचिरमैंदिरंमंदिरं॥ चिरन्तनपदंधनंधनद
यावदिंधनंबंधनंशिवायनमिदंधनंत्वदपरंधनंदंधनं॥ ३४॥ इत्थंस्तुत्वातदादेवींमुनिभिःसंस्थितोविधिः॥ गिरि
राट्गिरिभिःसार्धंगंधपुष्पफलैःविधं॥ ३५॥ तांबूलैःपूजयामासतत्रयेसंगतामुदा॥ ब्रह्माणंप्राहविनयात्तत्रैवं
गिरिराट्तदा॥ ३६॥ गिरिभिर्मेनयाचैवमेनाकेनविधिंतदा॥ हिमवानुवाच॥ पराशक्तिरियंसाक्षात्त्वंजानातिका
रणात्मन॥ अविनाभावरूपेयंशिवानंत्यामहेश्वरी॥ ३७॥ विचित्रशक्तिःसादेसादेवोसर्वेषांजननीशिवात्वयाति
प्रकृतेवात्रलोकपावनहेतवे॥ ३८॥ लोकधर्मंसमाश्रित्यत्रिःसत्यंप्रवदाम्यहं॥ ददामिशंभवेदेवींमायेयंमायिनेशि
वा॥ ३९॥ गिरीशमानुपत्न्येनस्तुतपत्नीमतेनच॥ त्रिसत्यंमांमहादेवःसमायातुसुरैःसह॥ ४०॥ पवित्तुंमत्कुलं
ब्रह्मन्श्वःप्रभातेमहेश्वरः॥ सएवभगवानीशोगणानामधिपःशिवः॥ ४१॥ सर्वात्मासर्वगोदेवःपरमात्मासना
तनः॥ विश्वाधिकोमहादेवःगौर्यापतिरुमापतिः॥ ४२॥ दत्वागौरींमहेशायकृतकृत्योभवाम्यहं॥ मैनाकेनगि
रिश्रेष्ठैःमेनयाकृतमंगलः॥ ४३॥ प्रतीक्ष्येहसुराञ्श्वसंगौतमेनसहादरात्॥ अस्मिन्याशिगृहेदेव्याःसंविधत्स्व
विधेद्विजैः॥ ४४॥ मांप्रसाद्यदेवेशनिवृत्तोनिवसाम्यहं॥ विधिर्गिरिवचःश्रुत्वाप्रभातेकृतनैत्यकः॥ ४५॥ पू
जितोगिरिराजेनतत्रोवासमुनीश्वरैः॥ पुरोहितंगौतमंतमनुमान्यप्रजापतिः॥ ४६॥ चक्रेमुनीश्वरैःसार्धंगिरिशा राम॰
चानुमोदितः॥ वेदींतांसमलंकृत्यरत्नसोपानमंडितां॥ ४७॥ पुष्पमंडपसंयुक्तांविनानाच्छादितांबरां॥ उत्फुल्ल ३४
कमलोदारमालिकासमलंकृतां॥ ४८॥ दिव्यमाणिक्यखचिततोरणोनचमंडितां॥ पुंडरीकोत्पलभ्राजत्केतका
वलिशोभितां॥ ४९॥ दिव्यसिंहासनोपेतांस्वास्तृतांचित्रवर्हशैः॥ धूपितांनगरामोदैर्दीपवृक्षैरलंकृतां॥ भंगा

रुकुंभकलशैः पल्लवोर्ध्वमुखैर्युतं॥ धूपपात्रैर्दीपपात्रैः पात्रैरंबुरशोभितैः॥५१॥ पाद्यार्घ्याचमनैस्तत्र गंधपुष्पसुगं
धिभिः॥ पंचामृतैः पंचपात्रैः मधुपर्कविराजितैः॥५२॥ हिमरूप्यसमुद्भूतैः रत्नपात्रैस्तथाविधैः॥ फलपात्रैः पूर्णपात्रैः
पुष्पपात्रैस्तथायुतैः॥ ५३॥ दिव्यचंदनपात्रैश्च तांबूलैश्च गुडैर्हविः॥ लाजाश्चयववगोधूमाः प्रणीताप्रोक्षणीतथा॥
५४॥ प्राज्याज्यपात्रैर्विपुलैः इध्मबर्हिर्युतैस्तत॥ नीराजनापात्रैः नारिकेलाम्रपनसैः॥५५॥ रंभाफलैश्च
तत्क्षौद्रकर्पूरागरुचंदनैः॥ गणाधिपं च तत्रस्थं चक्रे परमासने॥ ५६॥ भूषणैर्भास्वरं ब्रह्मा गंधपुष्पविराजितं॥ सेवि
तं प्रथमैस्तस्य चलच्चामरवीजनैः॥ ५७॥ सम्यगर्चिवं प्रतिष्ठाप्य स्वधया चारुविग्रहं॥ भूषितं भूषणै रम्यैः प्रदक्षिणं शि
रवंस्थितं॥५८॥ मुनिभिर्वालखिल्यैश्च वैखानसकुलैस्तत॥ वसिष्ठो गौतमो गार्ग्यो धौम्यो दक्षस्तथांगिराः॥५९॥
भृगुश्चैवांगिराश्चैव पुलस्त्यः पुलहोत्रिकः॥ विश्वामित्रो भरद्वाजो अगस्त्यो बभ्रुरेव च॥ ६०॥ शांतिं प्रतिसरं तत्र कारया
मास वै विधिः॥ तान्यतो ब्यान्नपानाद्यैः गोहिरण्यांबरादिभिः॥ ६१॥ संपूज्य गणनाथं तं स्वस्तिवाच्य द्विजैः सह॥ आकांक्षन्
न्यस्य पादाब्जं वीक्षितुं भगवानजः॥ ६२॥ नारदं प्रेषयामास शिवागमनकारणात्॥ ससंभ्रमेण महता गिरिभिर्मुनि
भिर्विधिः॥ ६३॥ कमलालिरिव प्रतीक्ष्य मित्रं विधिरास्ते द्विजपुंगवैर्महेशं॥ गिरिभिः सुरसत्तमैस्तदानीं परिबध्यांजलि
रीशपादसक्तः॥ ६४॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे विधिसंविधानं नाम षोडशोध्यायः॥ १६॥ ॥
श्रीईशानाय नमः॥ श्रीस्कंद उवाच॥ नारदो देवदेवेशं प्रणम्य प्रार्थयन्तत॥ विष्ण्वादिभिर्देवगणैर्नंदिभृंगीश्वरादि
भिः॥ १॥ समावृतं स्थितं तत्र मंदरे चारुकंदरे॥ नारद उवाच वाग्याविधिः पूर्वं संगतो गिरिशोनहि॥२॥ संभृत्य सर्व
संभारं मुनीन्द्रैस्त्वां प्रतीक्ष्यते॥ गिरिशोपि समेनाको मेनया ह्यत्र तिष्ठति॥३॥ अनुग्राह्यो यमधुना मुहूर्तस्त्वरयाप्रभो
॥तन्नारदवचः श्रुत्वा तपसोस्याय शंकरः॥४॥ यद्येव्यमिति लोकेशः प्राह देवो महेश्वरः॥ शिव उवाच॥ नंदिन्मद्गण
पायेऽत्रसमायांतमदंतिकं॥ विष्णोः सन्नत्युतां सेनां सुराणामस्त्रशोभितां॥ ५॥ नंदी विष्णुः प्रणम्येशं शाक्रमा

शि॰व॰ नंदीविष्णुः प्रणम्येशं शक्रमाशु व्यज्ञापयन्स्तदा॥ हरिरुवाच॥ सन्नद्धानां महासेनासुराणां सपताकिनां॥ माविलंबोभव
र॰ त्वत्रनिर्गच्छतिमहेश्वरः॥७॥ गिरिशस्यालयं देव्याः कर्तुं पाणिग्रहं विभुः॥ देवानां पत्नयो याश्च मातरो भूषणान्विताः
३५ ॥८॥ मंडयित्वा स्वकांगानि वासोभूषणगंधकैः॥ पुष्पैर्दिव्यांगरागैश्च नीराजनकरास्त्रियः॥९॥ समागच्छंतु देवस्य पा
शिग्रहणमंगले॥ इंद्रोध्यापयामास आनेतुं मातलिं प्रति॥१०॥ समातलिस्त्वरायुक्तो देवसेनाः समानयन्॥ शाक्र
खगणापाये ववज्रोद्यतकराः शुभाः॥११॥ मकुटोज्ज्वलमस्तास्ते युवानो मृष्टकुंडलाः॥ रक्तचंदनलिप्तांगाः क्रोधो
कालत्रचागताः॥१२॥ पताकावैजयंतीभिः पटहानकनिस्वनैः॥ तथा यमगणास्तत्र कृष्णांगा विकृतायुधाः॥१३॥
करालदंष्ट्रा रुक्षशिखाः मुसलायुधपाणयः॥ समागता यमेनैव पाशहस्ता युतत्रयं॥१४॥ वारुणा गणपास्तत्र हरि
तावाङ्कुशालिनः॥ पाशखड्गकराः सर्वे नियुतं वरुणेन हि॥१५॥ यक्षाधिपेन सहिता यक्षा शिक्षाविशारदाः॥ प्रयु
तं खड्गखेटाभिः समायामामदोधुनाः॥१६॥ वायुर्नवायुगणपानो मरासकृपाणयः॥ समागतास्ते बलिनो यु
वानो नियुतं तदा॥१७॥ अग्निनाचाग्निगणपा रक्तवर्णा गदाधराः॥ समायाता युतं तत्र गंधस्रक्वरभूषिताः॥१८॥ नि
ऋतेगणपा येत्र प्रासासिवरपाणयः॥ देवेन तेन चायाता अयुतं भूषणान्विताः॥१९॥ ईशानो गणपैस्तत्र समाया
तः सहस्रशः॥ निषंगभिः कवचिभिः हेतितोमरपाणिभिः॥२०॥ इषुमद्भिश्चापधृग्भिः दिविभूम्यंतरिक्षगैः॥ अ
थायाताश्च मरुतः सहस्राण्यत्र षोडश॥२१॥ वसवो बलिनस्तत्र त्रिंशत्सान्द्रसमूर्तिताः॥ आदित्या द्वादशास्तत्र स
हस्रेण रथवरूथक॥२२॥ सुधन्वान सहस्रेण धनुर्वाणधरागताः॥ अश्विनौ द्विसहस्रेण बलेन शरपाणिना॥२३॥ ना
गाः किंपुरुषास्सिद्धाः गंधर्वा वाद्यवादकाः॥ पिशाचागरुडा यक्षा राक्षसा दैत्यनायकाः॥२४॥ नागाप्सरा वयोरूपं लाव राम॰
ण्यागीतपेशलाः॥ पितरो यातुधानाश्च डाकिन्यो योगिनीगणाः॥२५॥ किंनरा भैरवास्तत्र चामुंडा शाकिनीगणाः॥ गा ३५
वीथमानरस्तत्र समायाताः सुपेशलाः॥ सर्वाभरणभूषाढ्या स्रग्गंधाश्च सुवाससः॥ धृतनानाविधास्त्राश्च नानावाद्य

कृतादराः॥२७॥अथादितिर्दितिर्लक्ष्मीः दनुर्वाणी च कालिका॥पुलोमा विपुला चैव सिंहिका सुरसा तथा॥२८॥सिद्धिर्वृद्धिः
त्रिपीडुर्गाः स्वधा स्वाहा दनुः कुहूः॥राका सूत्हासिनी वाली लसावुद्धिर्मतिः शची॥२९॥अरुंधती च सावित्री गायत्री रो
हिणीमुखाः॥गार्गी मैत्रायणी चैव अनसूया पतिव्रता॥३०॥लोपामुद्रा तथा गार्गीः संनतिः सुनितिः क्रुधा॥रंभा मत्तं
वसा चैव मेनका सहजन्यका॥विप्रचित्तिर्मिश्रकेशी नमेका उर्वशी तथा॥विश्वाची च घृताची च मित्रविंदा अलंवुसा॥३२॥
एताश्चाप्सरसश्रेष्ठाः अप्सराः कोटयो नव॥हावभावमनोज्ञेन नत्तौर्यत्रिकयुता ययुः॥३३॥सागरा गिरयो मेघाः नद्यः
संवत्सरा ग्रहाः॥सोमेन सह्तेसर्वे समायातास्त्रिकोटिकं॥३४॥मनो हरेरा वै घेराश्चकृष्णाशि ऋषयो मनूः॥वेदा मंत्रा
स्तथा यज्ञाः छंदांसि प्रणवस्तथा॥३५॥मंत्रग्रामं तथा सर्वपुराणानि च शास्त्रकं॥स्वरूपवेषाभरणाः तत्र जग्मुश्च
संघशः॥३६॥उद्वाहः शंकरस्येति देवदेवाज्ञया तदा॥भासयंतो भूवनौघं शस्त्राणां वाद्यनिस्वनैः॥३७॥त्रिषष्टि
कोटि तुरगाः रुक्मभीड परिछदाः॥जविनो बलसंपन्नाः संस्थिताः सुरसादिनः॥३८॥खुरघंटामहीं चक्रुः हेमाभूषे
कसन्मुखाः॥तोमरांकुशवाणाग्रपताकावलिभूषिताः॥३९॥गजा महामात्रयुताः दंतवेष्टशराग्रकाः॥उद्यत्कुं
भा कर्णतालसं वितालोलचामराः॥४०॥त्रिंशत्कोटिं ययुस्तत्र मेघा इव भुवंगताः॥रथाः पंचाशतं कोट्यो सुतुरं
गाः सुचक्रकाः॥४१॥सुपताकाः सावरोधाः सदश्वा यंत्रचोदिताः॥रथनेमिस्वनैस्तत्र गजाश्वरवबृंहितैः॥४२॥
धूपमात्रपताकाग्रैः शंखदुंदुभिनिस्वनैः॥बधिरीकृतदिक्चक्राः पंक्तिशः संस्थिताः सुरैः॥४३॥प्रणं तु श्री महेशा
नं तत्र तस्थवकाः स्ववकाः॥गणा द्वावारणौ द्वाभानंदिकेशाज्ञया गताः॥४४॥उद्वाहः शंकरस्योते तत्राजग्मुः पृथक्पृ
थक्॥स्वर्णाभासंस्ववर्णाश्चरक्तनीलारुणप्रभाः॥४५॥सुपीताद्दूरितास्तत्र युवानो वलशालिनः॥कोट्योपसं
ख्यातेषां तु तत्र नामानि मे शृणु॥४६॥नंदिकेशोथ दशभिः भैरवोष्टाभिरेव च॥भृंगी द्विकोटिभिस्तत्र रिटिकोट्या
समाययौ॥४७॥नवकोट्या वीरभद्रो कालाग्निर्दशभिस्तदा॥वाणस्त्रयेण विवभौ चंडीशो पंचभिर्वृतः॥४८॥सोमनं

दीचअयुतंमहानंदीनियुत्वतः॥ दशभिः केसराख्यश्चविश्वतोष्टाभिरेवच॥ ४९॥ पंचभिस्तुकपालीशाषड्भिश्चात्रपिचंडिलः
॥कुंभकश्चकुरूंडश्चद्वेद्वेवोद्वौसमीयतुः विष्टंभोकोटिगणपैः भेरुंडश्चात्रकोटितः॥पिप्पलःसन्नयश्चैवप्रयुतंनियुतं
तथा॥ ५१॥ आवशनसहस्रेणनवसाधुंधुलोगणः॥ सप्ताशीतिसहस्रेणमहाकालस्तुकोटिकः॥ ५२॥ अभिन्नोदश
साहस्रैः सुमुखः पंचसाहस्रं॥पिंगलः त्रिंशत्साहस्रैः कुसुदोष्टसहस्रकैः॥ ५३॥ पूर्णभद्रोयुतेनागात्सुभद्रः सप्तभिर्ययौः
विलोमादशसाहस्रैः पिंशलोथाष्टभिर्ययौः॥ ५४॥ कुंभांडः नवसहस्रेणरणभद्रोथविंशतः॥ प्रयुधानोविधानोविधा
नश्चअष्टाशीतिसहस्रकैः॥ ५५॥ एतेगणेश्वरास्तत्रसमायाताः पृथक्पृथक्॥ एतेचान्येप्यसंख्यातातत्राजग्मुर्ध
तायुधाः॥ ५६॥ सर्वेभस्मावदाताश्चजटामुकुटधारिणः॥ नीलकंठात्रिनेत्राश्चहारकेयूरपंनगाः॥ ५७॥ निबं
गिणोदंसनांगाशरकार्मुकपाणयः॥ समागतान्तान्गणपान्निवेद्यसुरसत्तमान्॥ ५८॥ नंदिकेशःपुरात-
स्थौहरिणाजिष्णुनातथा॥ तानागतानथज्ञात्वामहादेवोवृषंनदा॥ ५९॥ चक्रेतुरंगमाकारंश्वेताभ्राशिखरो
पमं॥ रत्नकल्याणसंयुक्तंसुखलीनास्यफेनिलं॥ ६०॥ स्वयंचमुकुटोद्दामशोभीचंद्रार्कभासुरः॥ रत्नमुक्तालसद्धारोर
त्नग्रैवेयकांगदः॥ ६१॥ त्रिलोचनारविंदाक्षः लसद्दिव्यांवरोविभौ॥ सुमनोवर्षीनकरैः अभिवृष्टोमहेश्वरः॥ ६२॥ दुं
दुभीनांनिनादैश्चवेदवंदिकृतस्तवैः॥ जयेतिगणदेवानांस्तवैर्नीराजनैस्त्रियां॥ ६३॥ नंदिनोहस्तमालंब्यनंदुसं
धृतछत्रकः॥ वीरभद्रेणभद्रेणपार्श्वचामरवीजितः॥ ६४॥ रत्नपादुकपादाब्जोनिर्ययौसगणैः सुरैः॥ हरिणा
चाथचक्रेणप्रोत्साहितसुरासुराः॥ ६५॥ आलोकनेनसर्वेषांप्रणामालिंप्रभल्पच॥ नदत्सुगजभेरीषुशंखाध्मा राम
तासुदिक्ष्वपि॥ ६६॥ वर्षत्सुकुसुमासारंनृत्यंतीष्वप्सरस्सुच॥ नारदोतुंवरश्चैववगीतैर्गायंश्चतत्रवै॥ ६७॥ तुंगंतु ३६
रंगमधिरुह्यपिनाकपाणिरश्वाधिपः सुरवरैः गणवृंदसंघैः॥ पाहीतिभिर्हरिमुखामरसिद्धसाध्यैः संपूजितो
गिरिवरस्यगृहंजगाम॥ ६८॥ तुंगतुरंगसुखलीनविचालनेनन्यस्यत्पदाहतिमुखोद्धतपादयुग्मं॥ मायूरवीज

स्रवीजितचामरौघैः छत्रावृतास्तमगजापतिमीदृशं दृष्ट्वा ।। ६९ ।। हिमाचलगृहं प्रययौ सुरवरैर्गणेशो द्विजैः ।। नदत्सुगजपृष्ठ
गासुजितकाथिभेरीरवैः ।। ७० ।। सुवर्षितसुरांगनाकुसुमसारसार्द्रांसितैः सुरोरुसुपताकिनीचलदृपारवंत्राग्रकैः ।। ७१
।। नदत्सुगजबृंहितैः हयवरोरुहेषास्वनैः रथांगपरिवर्तनैः श्रुतिवरास्यसारस्तवैः ।। द्योतंति तत्र गणपाः किल कामरू
पाः भूलासिवाणवरहस्तधृतोर्ध्वचापाः ।। ७१ ।। देहप्रभाविजितत्तप्तसुजातरूपाः यूपा इवोग्रनिकरा अपि भूपरूपाः
।। कूपा इवाश्मनलरुक्षजगद्विधूपाः ईशानपूजननिरस्तसमस्तपापाः ।। ७२ ।। धूलवाणगणा गणेश्वराभगणेशा
नविलासिसल्लकपिर्द्दीः ।। फणिभस्मविभूषणायपुर्वैर्गणांतैशरणां हृदासदाप्रपन्नाः ।। ७३ ।। इति श्रीशिवरह
स्येईशानाख्ये द्वादशांशे शिवोद्वाहसमारंभसकलसमागमसमेतंगमनंनामसप्तदशोऽध्यायः ।। १७ ।। ।।
श्रीईशानायनमः ।। श्रीस्कंद उवाच ।। तथाश्वादयस्तद्वा घनंदिनादत्तसत्करः ।। रत्नभ्राजितपादाब्जयुगलालंवि
पादुकः ।। १ ।। गिरिराजसुविस्तीर्णद्वारिरोधसुरासुराः ।। कृशिशाकरसूजद्वैः त्रप्रोत्सारितामरः ।। २ ।। रत्नपात्रकरध्वो
तिनीराज्यार्तिसुमौक्तिकैः ।। अक्षतोत्कीर्णमकुटो तारा इव नभश्युताः ।। नगांगनाकरोत्कीर्णसुमलाजहिरण्य
जैः ।। विकिरंत्येव गिरयः प्रणाममुखराः शिवं ।। ३ ।। तदा विवेश भगवान् गिरिराजगृहं महत् ।। विवाहमंडपं चि
त्रं ब्रह्मणा मुनिभिर्युतं ।। ४ ।। सब्रह्माद्याश्च मुनयः प्रणेमुर्भक्तिनिर्भराः पुरस्थितं गणेशानं प्रणतं पादयोः शिवं ।।
६ ।। उत्थाप्यालिंग्य चाघ्राय कुंभास्योद्गतकुंभितं ।। ब्रह्मणाज्ञापितो देवः गौर्या पुत्रः प्रपूज्यतां ।। ७ ।। इत्थं गणे
शं देवेशः सुरैर्द्विजगणैर्गिरीः ।। संपूज्य पुष्पगंधैश्च फलैर्वासोविभूषणैः ।। उवाच वरदो देवो महादेवस्तदा सुदा
।। ईश्वर उवाच ।। मां वा नारायणं वापि ब्रह्माणं वापि पुत्रक ।। त्वामनभ्यर्च्य कार्येषु विघ्नस्तेषां भविष्यति ।। ९ ।।
त्वां गंधपुष्पधूपाद्यैः परिपूज्यादिमं सुराः ।। लभंति वांछितान्कामान्त्रिसत्यं प्रवदाम्यहं ।। १० ।। ब्रह्मविष्ण्वादयो
देवा गणेशो द्विजवरैः सह ।। गौर्याः पुत्रं च मत्वा तस्मै गणपः पूज्यतां सर्वैः ।। शिवाज्ञां शिरसा गत्वा ब्रह्मविष्ण्वादयो गह

शि.च. णाः॥ संपूज्य फलपुष्पाद्यैः भक्ष्यभोज्यैस्तुवनतदा॥१२॥ देवा ऊचुः॥ पाशांकुशकरासक्तमोदकं विघ्ननोदकं॥ बोधकंस
र. र्वशास्त्राणां भजामि विघ्ननाशकं॥१३॥ वेतंडगंडं ईशशिखंडचूडं दानोदगंडं नतदेववंडं॥ स्वभक्तविघ्नार्तिहरप्रचंडं न
३७ मामपखंडं सुवहस्तिचंडं॥१४॥ नाकिनायकनताजपादुकं विघ्ननाशकविनायकं भजे॥ विष्णुसायकसुभक्तिदायकं
प्रणमताघसुराः गणनायकं॥१५॥ हृदंतविभांतधियं चोदयंतं ऽमाकांतमोदप्रदं सत्सुतं तं॥ प्रशांतं सुदंतं हसंतं
नदंतं वसंतं मुदांतं भजाम्येकदंतं॥१६॥ सुरावनं सुपावनं रणावनी हुताशनं सनातहृदैकवासिनं भजामतंगजाननं
॥ सनातनं निरंजनं फलादिसारभोजनं स्वभक्तविघ्ननाशनं भजामतंगजाननं॥१७॥ चराचरादिकारणं स्वभक्त
पापहारिणं भवांबुधेः सुतारणं प्रशांतकामपूरणं॥ गजाननप्रसादमंपठंति ये मनीषिणः॥ नते भुदुःखिताननं
भवेन्महाघभेदनं॥ इतिसंस्तुत्य संपूज्य गणेशं सुरसत्तमाः॥१८॥ समायाताथ गिरिराट् मेनयासहतत्रवै॥ वे
दिं प्रवेशयामास महादेवं सुरैस्तदा॥२०॥ रत्नसिंहासने दिव्ये संस्थाप्य परमेश्वरं॥ पादौ प्रक्षाल्य देवस्य रत्नभृंगारु
जैर्जलैः॥२१॥ मेनाकरोत निर्याणैः संप्रोक्ष्याथ स्वमौलिषु॥ ब्रह्मविष्ण्वादिविबुधाः कृतार्घा गिरिणा सह॥२२॥ त
त्राह विष्णुः देवेश्च ब्रह्माणां तं विलोकयन्॥ भवान्नहं समुत्पन्नौ देवस्य भुजयोः पुरा॥२३॥ ललाटतटतो रुद्रः सुर
मुनिगणैः सह॥ यस्य मूर्तिरियं शैलगिरिराजस्य यास्थिता॥२४॥ एषा हैमवती गौरी माया सा परमेष्ठिनः॥ संजा
तं लोकसिध्यर्थं मुद्वाहार्थमिहागतः भवो सौ जगतां धाता पितात्वममापि च॥ माता देवी सदास्माकं च ययोरुद्वाहमं
गलं॥२६॥ पश्यामो धन्यनेत्राभ्यां ऽविमुक्तभवबंधनाः॥ अस्यैव मूर्तिभिर्व्याप्तं जगत्सर्वं चराचरं॥२७॥ क्षित्यपि राम.
वैंदुसूर्यात्मापवनो दीक्षितात्मकः॥ महादेवो महानात्मा स्वतंत्रः सर्वहृद्गतः॥२८॥ तदासगिरिराट् तत्र मेनया ३७
पूजयत्परं॥ मधुपर्केण विधिना पुष्पैर्गंधैर्मनोहरैः॥२९॥ धूपैर्दीपैश्च नैवेद्यैः वासोलंकारभूषणैः॥ गामर्घ्यं च
भवेद्दत्वा तामनुज्ञाप्य शंकरः॥३०॥ संस्थितः सुरसंघैश्च गणैर्वीजितचामरैः॥ नदत्सु देववर्येषु गायत्सु मनोहरं॥

३१॥ हेमपुष्पैः किरन्त्वीशे नन्दयत्पस्रसः सु च॥ सदस्येषु सुरेन्द्रेषु गणेषु च महोत्सवे॥ ३२॥ गर्गोदिते तदा लग्ने गिरिराट्
मेनया तदा॥ गिरिजां समलंकृत्य विमलाम्बरभूषणैः॥ ३३॥ समानीय महादेवीं तदा प्रत्यङ्मुखस्थितां॥ वीजितां चामरै
स्तत्र सखीभिः संवृतां शिवां॥ मध्ये पटं धरावास्तां तदा शान्तं हरीमुदा॥ सुराः सांबूलहस्ता हस्तान स्थुः प्रांजलयो गणाः
३५॥ स्त्रिमितेवाद्यघोषे च जेपुस्तत्र महर्षयः॥ वसिष्ठो वामदेवश्च गौतमोत्रि भृगुस्तथा॥ ३६॥ जमदग्निः कश्यपश्च
भरद्वाजो महर्षयः॥ प्रत्येकं मंगलं ह्यद्यं पशंभोर्महोत्सवे॥ ३७॥ वसिष्ठोवाच॥ मौर्वी मूर्धिरथः शरास्तन शिरः सं
चारिचक्रद्वयं चक्रांतर्निहितः शरस्तदुदरे सतः तदास्यहृयाः॥ तेषामेव शिरः स्थदेष्णुवसतिः स्वपितियस्याश्च
नं देवश्चित्र परिच्छदः सभगवान्कुर्यात्सदा मंगलं॥ १॥ वामदेवउवाच॥ योदेवः श्रुतिशेखरेषु विदितो यं भासकं ज्ञानिनो ये
नभ्राम्यति लोकजालमखिलं यस्मै नमः कुर्वते॥ यस्मान्नापरमस्ति किंचिदपि ध्येयं स्यांगमेतज्जगत् यस्मिंस्तिष्ठति स
र्वमेव भुवनं कुर्यात्स नो मंगलं॥ २॥ गौतमउवाच॥ विश्वात्मा भगवान्चराचरतनुः विश्वाधिको यः शिवो वेदांतप्रथितो
रुद्रैव भवपदो निश्वासवेदो हरः॥ यो गौरीरमणो ह्यनिर्जरवरो विश्वप्रकाशात्मको विध्वस्ताखिलभक्तपातककुलः
कुर्यात्सभे मंगलं॥ ३॥ अत्रिरुवाच॥ यं वेदान्तविज्ञाननतेषु रहस्यं शंभुं भवानीपतिं विश्वात्मानमनंत विष्णुविधिभिः
संसेव्यपादांबुजं॥ तं सर्वादिगुरुं मनोज्ञवपुषं गौरीविवाहोत्सुकं तस्याद्यं बुजलोचनात्ममचिरं भूयात्सदा मंगलं
॥४॥ भृगुरुवाच॥ यद्भीत्या पवते निलोपिसहसाविश्वोदयस्थो रविः अग्निश्चोर्ध्वशिखो भवत्यनुदिनं शक्रः सु
रान्पाति वै॥ मृत्युर्धावति यद्भयेन सुतरां मृत्युंजयस्याज्ञया तं सांबं हृदये भजंति मुनयः तेषां सदा मंगलं॥ ५॥ ज
मदग्निरुवाच॥ यो विष्णोर्जनितासुरासुरगुरुः वेदान्तवेद्यो हरः यस्यांघ्र्यंबुजपूजनेन सुरता धन्या कृतार्थो भवत्॥ ध
न्यो यं गिरिराजराजतिलकः कन्या सुपात्रार्पणात् तान्यं जानयशंकरास्तु रवराः कुर्यात्सदा मंगलं॥ ६॥ का
श्यपउवाच॥ सेवार्थागतविघ्नराट्गुहहलसद्वाहेसराणाभ्युत्थतत्प्रत्यायातभुजंगफूत्कृतिकनत्फालाग्निकी

शि॰व॰ लोलकैः॥ निष्यंदेंदुसुधोपजीवितचकोरव्याघ्रादिना दर्भटीभीतोक्षावनतेस्य गिरिसुताकांतेस्मयान्मंगले॥७॥ भरद्वाजवा
१० च॥ कारुण्यामृतसारपूरितलसन्नेत्रां तसंवीक्ष्य रात्रैलोक्यावनदीक्षितं जयपदं तो राजत्करांभोरुहं॥ सांबं निर्जरदीर्घिकाप्रवि
३८ लसत्संफुल्लपद्मावलीधूलीधूसरकर्बुरोज्वलजटारे स्वं भजे मंगलं॥८॥ एवं मुनिप्रवचनोरुसुमंगलेन सन्मंगलाभोलि
वरे तदास्तताः॥ मुदे त्वीरतत्सापिशशांकमौलेर्मुदे किरद्भक्ष्यगणाद्ववाद्यस्तताः॥९॥ भेरीमृदंगपणवानकवाद्यघोषैः
वेदप्रकर्षवरघोषविजिताध्वघोषैः॥ घोषामुखं समभिवीक्ष्य मुदो रुदहर्षोच्छ्वोष्मनाक्ष हृदयो खिलमंगलांतां॥१०॥
छायारवीविधृतपार्श्वगवेदिकुंभसंस्थापने प्रमुदिताः गिरिवर्यसंघाः॥ तत्राभिवीक्ष्य रतिमेव सुदुःखनम्रामंबाम्
दैक्षत शिवः स्मरसंप्रदाने॥११॥ साशर्ववक्त्रकमलोदरभृंगसंगकारुण्यपांगकलनैर्मदनं सहेंदे॥ कृत्वा सुराम्
रमदंप्रतिवेश्यरत्या तत्र्वारुगौलिनिलयं पदमासदुस्तेः॥१२॥ अत्रोपिलाजैर्वरवह्निमौलौ जुहाव मंत्रैर्मुनिवर्यजु
ष्टः॥ स्वचारुवक्त्रैः शशिखंडभूषणं विलोक्य नेत्रैर्मुदमाप विस्मितः॥१३॥ ददौ सभृंगारुककैकधारया समेतया
भूधरनायकः करे॥ हरस्य तत्पाणितले भवान्याः पाणिं दधन्या त्रम हीव बभूव॥१४॥ सुरा न दोग्धुर्मनयो गिरीश्वरं
धन्यो हिमान्यो हरपात्रदाता॥ प्रतिगृह्णीतापि महेश्वरः स्वयं धन्या किलेषा जगतां जनित्री॥१५॥ पाणिग्रहे पर्वत
राजपुत्र्याः पादांबुजपाणिसरोरुहाभ्यां॥ अश्मानमारोपयतः स्मरारेः मंदस्मितं मंगलमातनोतु॥१६॥ प्रदक्षिणा
वर्तशिखं हविर्वह्नि विभ्यंतमेवक्रमणेन तौ शिवौ॥ परीत्य शोबविधिना समाप्य मुदा तदा तस्थतुरेव हर्षितौ॥१७॥ नीरा
ज्यगौरीसहितं महेश्वरं मेना तदा सा प्रणनाम हृष्टा॥ गिरीश्वरश्चापि गिरींद्रसंजये लग्ने महोत्सवो भूद्धराभृत्सु राम॰
रासुराः॥१८॥ तांबूलविश्राणनगंधपुष्पैः सुरासुरान्भूधरनायकांश्च॥ चकार पूजामिरतीव तुष्टान तुष्टान्क ३८
रोति विष्णुरथो शिवाज्ञया॥१९॥ गावो हिरण्यं वसनं कांचनं च सुद्विजेषु सर्वर्षिषु शंकराज्ञया॥ विश्राणके वैश्रव
णो मुदा भूत्तदा शिवायाः सुविवाहमंगले॥२०॥ रुद्रं हरिं ब्रह्मगमुमा चकार सान्यस्त तं द्राधिष्ठं चंद्रशेखरं॥ तदा

द्विपत्नीगणगीतमंत्रैः सुचंदनांद्रंपदयासहूपितं॥२१॥ हरोपि देव्या विजहार हर्षितः चकार पुष्पैः सहकारपूजं॥ कुंजेस्व
पश्यसाजामहेश्वरंगायत्समुत्सुल्लसितांबजवक्त्रं॥२२॥ इति श्रीशिवरहस्ये ईशानाख्ये सूतशौनकसंवादे गौरीशंकरविवाहेअ
ष्टादशोध्यायः॥१८॥ श्रीईशानायनमः॥ श्रीस्कंद उवाच॥ ततःशंकरं भक्त्या देव्या गौरीं च सुरसत्तमाः॥ विष्णुब्रह्मादयो
देवाः गणेशा मुनिसत्तमाः॥१॥ ययुस्ते वासस्थं तत्र हिमशैले मनोरमे॥ गिरिराजाभ्यनुज्ञाता आवासं सुरसत्तमाः॥२॥
देवभोग्यानावसथान्निर्मितान्विश्वकर्मणा॥ भक्ष्यभोज्यान्नसंकुलान्वनवाटी विराजितान्॥३॥ भूषणैश्चैव वासो
भिः गंधपुष्पैर्विराजितान्॥ शय्यासनविहारैश्च सरोवरकुलैस्तथा॥४॥ नंदिकेशादिगणपाः कुबेरस्तत्र शिवाज्ञया॥
॥ मुनयोप्याश्रमेष्वेव निषेदुर्ध्यासनद्विजाः॥ ५॥ कृतनित्यक्रियास्तत्र शिवलिंगसमर्चकाः॥ गणाः सुरगणास्तत्र
संतित्रिदिवाधिके॥ ६॥ विष्टपं कष्टमिव ते अष्टमूर्तिकृपावशात्॥ न स्मरंति वसंत्यत्र शिपिविष्टपरार्चकाः॥७॥ नानैः
गैयैर्भक्ष्यभोज्यैः सदारा सुखिनो वसन्॥ गिरींद्रो गिरिभिः सार्धं मेनाकेन च मेनया॥ ८॥ नदत्सु देवतूर्येषु नृत्यंतीष्व
प्सरस्सु च॥ गौतमेनाप्यगात्सर्वान्विमानेनार्करोचिषा॥९॥ नंदिकेशादिगणपान्विष्णुब्रह्मादयः सुरान्॥ मुनी
न्सर्षिशिष्यान्तत्रैव उद्वाहार्थं समागतान्॥ १०॥ गंधर्वसिद्धसाध्यांश्च नागाः किंपुरुषाप्सराः॥ विद्याधरान्स्नाग
रांश्च नद्यर्क्षाणि ग्रहांस्तथा॥११॥ निमंत्रयन्सर्वाँस्तान्सास्तं गिरिसत्तमः॥ तत्पत्न्यापि निमंत्र्याथ मेना सा
हृष्टमानसा॥ १२॥ पूजितो गंधपुष्पाद्यैः गौतमेन गिरीश्वरः॥ तांबूलदानैर्गिरिभिः वस्त्रालंकारभूषणैः॥१३
देवपत्नीभिरपि सा मेना गिर्येगनागणैः॥ गंधपुष्पैश्च वासोभिः पूजिता निर्ययौ तदा॥१४॥ गिरिराजविमाने
न पूजिताभिस्तत्र तत्र हि॥ एवं प्रति सुरं तत्र निमंत्र्य गणपान्मुनीन्॥१५॥ शिवाज्ञया गिरिवरः गृहे भोजयितुं सु
रान्॥ तत्रास्तंगत आदित्ये लक्षस्तंभोरुमंटपे॥१६॥ चित्रितेगंधपुष्पाद्यैः धूपितेसिक्तभूतले॥ कदलीदलवि
स्तीर्णपात्रोपरि सुरैः क्रमवैः॥१७॥ पात्रैः पात्रीशतार्कीर्णांश्च मसेर्वर्धनीगणैः॥ रंगवल्लीविरचितैः प्रत्यंतैः प्रो

शि·व·
स्थितैस्तदा॥१८॥ निष्टमशातकुंभोरुदीपस्तंभैरलंकृतैः॥ भक्ष्यैर्यवनगोधूमपायसापूपमंडकैः॥१९॥ फेणिकावट
र·
कैश्चैवपर्पटैर्घृतपाचितैः॥ शोकहारिमहाशाकैः सोपदंशविराजितैः॥२०॥ लड्डुकैर्मोदकैश्चैवदधिक्षीरादिशर्करा
३९
॥ मांसमुद्गावचंस्तत्रमत्स्यमैरेयमाजकैः॥२१॥ निष्टसंघृतसंतप्तंलवमेलामुपाचितं॥ प्राज्यमाज्यंगंधसुभगंवर
पात्रेष्वलंकृतं॥२२॥ वसंतमल्लिकाकलिकासमानंगंधभासुरं॥ सगिरिर्गिरिपत्नीभिः परिवेषयदंजसा॥२३॥ मां
सोदनैस्तथाचित्रैः दधिक्षीरान्वितैस्तदा॥ मध्येवेद्यांमहादेवपात्रंगौर्याश्चभासुरं॥ रत्नमुक्ताविचित्रेणरंगवल्ल्याविरा
जितं॥ रत्नदीपमहास्तंभैः पर्यंतेष्वप्यलंकृतं॥२५॥ त्रिपदीमौलिभागस्थरत्नपात्रद्वयेनदा॥ दिव्यस्यदिव्याश्चचिरंभ
क्ष्यभोज्यविराजितं॥२६॥ सिंहासनद्वयंतत्ररत्नपर्यंतभासुरं॥ निधायगिरिराट्तत्रसुरानाह्वयतानारायणान्॥२७॥
मुनीनन्यानारायणांस्तत्रप्रतिपात्रंनिवेशयत्॥ हेमचित्रेषुपीठेषुसंनिवेश्यानुपूर्वशः॥२८॥ सुस्नातान्तान्सुवसना
न्नाचांतानांधपुष्पितान्॥ भृंगारुकलशोपेतानआस्थितान्पंक्तिशस्सुरान्॥२९॥ वामदक्षिणपार्श्वेषमहेशस्य
हरिंविधिं॥ न्यवेशयगिरिश्रेष्ठोमुनिपंक्तौमुनीश्वरान्॥३०॥ शक्रादीनांसुराणांचपंक्तौतेसुरसत्तमाः॥ नंदिके
शादिगणपाः स्वगणैः पंक्तिशस्थिताः॥३१॥ गिरयोपिस्वपंक्तिस्थाः मेदीकृत्यहिमाचलं॥ मैनाकमग्रतेसर्वेसं
स्थिताविष्टरेष्वथ॥३२॥ दिव्यांगनागणानांचपत्न्योमुनिपत्न्यः॥ प्रावर्तंतगृहेतत्रमेनयागिरिपत्निभिः॥३३
॥ रंगवल्ल्यादिरचितदीपस्तंभैरलंकृते॥ पात्रेषुभक्ष्यभोज्यान्नपूर्णेष्वथसुवासस्सः॥३४॥ सर्वांगभूषणो
पेताः निशाकुंकुमभूषिताः॥ सल्लापालापकुशलाः अन्योन्यंचक्रिरेकथाः॥३५॥ हेमपीठेषुलक्ष्म्याद्याः शचीवाण्याद
योगनाः॥ अरुंधतीमुखास्तत्रसुपशाद्यागणांगनामेनयापूजितास्तत्रसंस्थिताकलशैर्युताः॥ देवानुपाविश्यगि राम·
रिः महेशंप्रांजलिस्तदा॥३७॥ उवाचगौर्यासहितंरत्नमंचस्थमीश्वरं॥ गिरीश्वरउवाच॥ देवास्समागताः सर्वेतवै ३९
वाज्ञाकरागणाः॥ मुनयः सहपत्नीभिः सुराणांगणांगना॥ मेनयासंस्थिताः सर्वाःपूजिताश्चयथाविधिः॥३८

पंक्तिशः संस्थिताः सर्वे प्रतिपात्रेषु शंकरं त्वां प्रतीक्षंति विश्वेश गौर्या भोक्तुं सुजग्मिनः॥४०॥ त्वत्प्रसादान्नभोज्यानी भुक्तास्ते
सुरसत्तमाः॥ हृत्तमोनाशकं भोक्तव्यं नैवेद्यमुत्तमं॥ ४१॥ इत्युक्तो गिरिवर्येण महादेवो वयासह॥ सुस्नात्वा वाससायुक्तो भू
षणैर्मंडितांगकः॥ ४२॥ मकुटोद्भासिचंद्रांशुधवलीकृतदिङ्मुखैः॥ त्रिपुंड्रगंधरेखांकोगंधपुष्पैरलंकृतः॥ गणेश्वरैः
पादुकान्तपादाभ्यां परिवीजितः॥ चामरैः सततं गौर्या सर्वाभरणभूषया॥ ४३॥ सययौ सुरपंक्तिं तां प्रणाममुखरे
स्थितां॥ आलोकयसोमधामांशुसुधादृष्ट्या सुराङ्गणान्॥ ४४॥ मुनीनगिरीन्सविश्वेशो देव्या वैद्यां वरासने॥ निषसा
द महादेवः सीदेतेति तदाब्रवीत्॥ ४६॥ शिवाज्ञया ततः सर्वे यथापूर्वं व्यवस्थिताः॥ ब्रह्मविष्ण्वादयो देवाः गणामुनि
गणास्तथा॥ ४७॥ रत्नभृंगारुकलशैर्वर्धनाशीतलैर्जलैः॥ देव्या करांबुजस्पर्शिसंप्रोक्ष्य परिषिञ्च॥ ४८॥ गौर्यास
बुभुजे शंभुः गणेशैः परिवीजितः॥ देव्या सखीगणैस्तत्र वीजितासा महेश्वरी॥ ४९॥ शिवनैवेद्यशेषं तल्लब्ध्वा क्षीरामृतमु
त्तमं॥ बुभुजे सा तदा गौरी वरालं परया मुदा॥ ५०॥ अनुज्ञाता सुरास्तत्र मुनयोऽगिरयो गणाः॥ बुभुजुः शिवनैवेद्यं गि
रिराजेन पूजिताः॥ ५१॥ मेनापि देवपत्नीभिः बुभुजे पूजयन्स्त्रियः॥ न कश्चिद्व्याजहारेशसंनिधौ पंक्तिसंस्थितः
॥५२॥ परिवेषकरास्तत्र संचरंति सदा स्त्रियः॥ हेमभांडैः रत्नपात्रीकरा दर्वीकरास्तया॥ ५३॥ भक्ष्यभोज्यकरास्तत्र
सोष्णान्नकृषिवाः कराः॥ पानकापूपभक्ष्याज्यकराक्षीरकराः तथा॥ ५४॥ रसवंतीच पानानी मधुमांसकरा स्त्रि
यः॥ कदलीफलमांम्रादिकरास्तत्र वरस्त्रियः॥ सुपंच पायसापूपपात्रीकरधरा स्त्रियः॥ शर्करापात्रसुकरा दधिमं
डकराः स्त्रियः॥ ५६॥ मांसमुद्राचवचं लेत्यं चोष्णभूत्यकरास्त्रियः॥ सुशीतपाटलोशीरगंधपुष्पांबुदायिनः॥ ५७
॥ परिवेषकरा सदा युवानो मृष्टकुंडलाः॥ रणन्नूपुरपादाब्जाकरकंकणनिस्वनैः॥ ५८॥ संचरंति स्त्रियः पंक्तौ संघ
शस्तटिदुज्वलाः॥ प्रतिपात्रं समुद्वीक्ष्य यद्भोज्यं यस्य यत्प्रियं॥ ५९॥ मनसा चिंतितं दृष्ट्वा तत्पात्रे तत्क्षिपंत्यपि॥ न चाव ज्ञा
यते कश्चित्स्त्रीभिर्वा सूदसत्तमैः॥ ६०॥ गल्पनामन्नभोज्यादि यद्यस्याभिमतं स्थितं॥ इति सूदा वदंत्येव प्रतिपात्रं सहस्र

शि.व. शा:॥ ६१ ॥ त्रिंशत्त्रिकोटिदेवानांमुनीनांकोटयोनव॥ गणानांपंचकोटयोघस्त्रीणांकोटित्रयंतथा॥ ६२॥ गिरीशांवृष्टि
र. साहस्रंरुक्मपात्रीषुभुंजते॥ तदामुदागिरिश्रेष्ठोवाचमूर्त्तेविनीतवत्॥ ६३॥ गिरिरुवाच॥ यद्वैष्णवेनथाब्राह्मेय
८० छाङ्गेचामरालये॥ तदस्तुभोज्यंसर्वेषांप्रीतिवनरमस्तुमे॥ ६४॥ मयिप्रीत्यायसर्वैवैशिवनैवेद्यमीदृशं॥ अथतया
वालस्येनदत्तंयत्संतुमर्हथ॥ ६५॥ स्कंदउवाच॥ इतितत्रगिरेर्वाक्यंश्रुत्वातेसुरसत्तमाः॥ ऊचुःसर्वेमुनिश्रेष्ठाग
णाःसुरगणैःसह॥ अहोधन्यावयंसर्वेधिक्कृतामन्नमुत्तमं॥ ६६॥ महेशपंक्तौनैवेद्यंशिवस्यपरमात्मनः॥ भुक्तवंतो
मुक्तियुक्ताःभक्तिःकृष्णकमस्तुते॥ ६७॥ धरणीभगवरोसित्वंब्रवीषिमधुरंवचः॥ नब्राह्मेनचवैकुंठेनशाक्रेभोज्यमी
दृशं॥ ६८॥ इतिसंतर्पिताःसर्वेशिवेनसुरसत्तमाः॥ तदानींनारदोवाक्यमवादीत्पारिहर्षितः॥ ६९॥ नारदउवाच॥
शंभोभर्गमहेश्वरेश्वरमहादेवेशविश्वाधिकविश्वाशास्यदयानिधेश्रुतिशतैरुद्घोषितोत्सवप्रद॥ तेनैवाद्यसु
त्सवदोत्पसुरनाथधन्यैर्मुनीन्द्रैः गणैर्नात्पत्रप्रविशाममहेशकृपयानित्यंप्रयोदामहे॥ ७०॥ नित्यंमंगलमस्तुतेप्र
निपदंस्यात्मंगलायाःपतिः॥ इत्युक्तेचमुनेःतदामुनिगणाःश्रुत्वावचोहर्षिताः देवास्तेगणपाःशिवेनशिव
याउतस्तुरीशात्तया॥ ७१॥ संप्रक्षाल्यपदद्वयंचवदनंहस्तौतदाशार्करापारापूरनिमग्नचेतससुरास्तेभूसु
रास्तेगणाः॥ दिव्यांतांविविशुःसभांद्युतियुतांवस्त्रैस्तथाभूषणैर्वध्नोत्भोपकिरीटकुंडलधराः तस्थुस्तदा
तेसदं॥ ७२॥ नासंवाधमवस्थिताश्चब्रह्ममुखालेखामहेशोन्मुखाः॥ मान्यास्तेगणपुंगवाश्चमुनयाःसिंहा
सनस्थंशिवं॥ ७३॥ गौरींचापितदंकसुंदरमहापर्यंकसंस्थांसुरानेषुस्तत्रशशांकदीधितिधरंसंवीजितच्चामरं॥ राम.
शंभुस्तत्रहिमाचलेनगिरिभिःसंपूजितस्तामरैर्गंधस्रग्वरपुष्पशेखरकरानांवूलरागास्यकाः॥ ७४॥ वीक्ष्यांतित्रि ८०
दशामहेशवदनंनत्वेत्रसत्कादराः॥ तत्रातोद्यसुनर्तिताप्सरवरंसाहस्त्रमत्यद्भुतं॥ तालोत्याहतितंत्रियंत्रिततत
दत्तृताभ्रटीशोभितैरंगभ्राजितरम्यवेणुनिनदैःसन्मर्दलानांस्वनैः॥ ७५॥ भ्राजद्रत्नपरिष्कृतामरसभाधिष्ठा

रिशीतस्यभाराजन्त्येवसभापतेः प्रमुखनोधूपालिदीपप्रभा॥ मेनाचापिमुदान्वितासुरमहाभामाधुनापूजितातांवूलामल
गंधपुष्पविलसध्धमिह्लमालायुता॥७६॥ रंभाद्यप्सरसांनरुष्मराग्नगणारावेकृनत्तादरावासाभिः सुनिशासुकुंकुमव
रैःसंपूजितातताःस्त्रियः॥ सूतउवाच॥ एवंवर्षमहर्निशंसागिरिराट्संपूज्यसर्वामरान्विप्रान्तद्दक्षिणाघासदारतनयान्मा
र्घ्यंनुवासादरात्॥ शंभुंनांजगदंविकांगिरिवरेपुनः समुक्तोभवत्ध्यतंभक्तिविभाविनात्मल्हदयोनान्यद्विजानात्ययं
॥७८॥ इतिश्रीशिवरहस्येहरदशांशेईशानाख्येअसुरभोजनवर्णनंनामएकोनविंशोध्यायः॥ १९॥ श्रीईशानायन
मः॥ श्रीस्कंदउवाच॥ एवंस्थितेनतदादेवीस्यन्नद्गिरिजयासह॥ भूधरेणार्चितंदेवैः सुरकार्यार्थमुद्यतः॥ १॥ वासुदेवोगि
रिश्रेष्ठंरहसिस्वैरमब्रवीत्॥ विष्णुरुवाच॥ धन्योमान्योसिगोत्रेषुकृपापात्रंमहेशितुः॥ नवभाग्यस्यनांमोस्तियतःस्वं
शंकरार्चकः॥ किंतुमेसांप्रतंवाक्यसुराणांहितमाचर॥ इयंगौरीनवसुताज्ञानामायामहेश्वरी॥ २॥ यस्यामुत्पद्यते
स्माकंकुमारःसैन्यपालकः॥ नमयाचसशक्रेणासुरैश्चासुरसूदनैः॥ नजेतुंशक्यतेदैत्योतारकः शूरसंयुतः॥ स
कोट्यक्षौहिणीयुक्तोषट्कोटितुरगावृतः॥ ५॥ पंचकोटिगजैर्युक्तः नवकोटिरथावृतः ब्रह्मदत्तवरोदैत्योसन्न
द्धकवचायुधः॥ ६॥ नान्येनसमरेजेतुंशक्तिहस्तंविनागिरे॥ शिवोविहरतुस्वैरंकैलासेवासुमंदिरे॥ ७॥ क्षिप्रंदेव्या
महादेवः तदेतेनत्वःपरिहितं॥ कर्तुमर्हसिसाहाय्यंतमनुज्ञातुमर्हसि॥ ८॥ नत्वंवियोगंदेव्यायः सहसेखेदजंगिरे॥
चिरंकन्यापितृगृहेधन्यावसुमिहार्हति॥ ९॥ शिवेनप्रेषयास्माकंहितार्थंभूधरोत्तम॥ तदाविष्णुवचः श्रुत्वामहेशा
नंयथौगिरिः॥ १०॥ लोकप्रामाण्यहेत्वर्थंकन्यादानंप्रदर्शितं॥ गृहप्रवेशनीयांगंचक्रेकर्मविधानवित्॥ ११॥ मुकुटै
र्भूषणैश्चित्रैः गंधपुष्पैर्गिरीश्वरः॥ प्रणम्यपूजयामासगौरीशंकरमेवच॥ सास्त्रा स्तामेनयाकंन्यांददौहस्तेहरस्यतु॥ न
त्यंत्यप्सरसांसंघाःजगुर्गंधर्वनायकाः॥ १३॥ ववृषुःकुसुमाकारंमेघास्तेघोषवच्चरं॥ गिरिराजेनदेवेशोसुरैर्द्विजग
णैर्गणैः॥ १४॥ स्वच्छछत्रावृतमुखापार्श्वयोवीज्यचामरः॥ गौर्यातदामेनयाचविष्णुब्रह्मगिरिव्रजैः॥ १५॥ स्तुवतांवे

हसंघानां संस्तयं परमेशिनुः॥ नंदिनो हस्तमालंब्य सर्वालंवोपि शंकरः॥ १६॥ हेरंबेणामुदा पुत्रसुरसेनाभरैर्गणैः॥ धूतनाना
विधभ्राजदायुधैः सुरसत्तमैः॥ १७॥ गणेंद्रैर्वीरसेंद्राभैः धारधन्वाणपाणिभिः॥ चंद्रांशुधामकोटीरप्रभावीजितदिङ्मुखः
१८॥ हव्यवाहस्फुलिंगोर्ध्वनयनोग्रप्रभायुतः॥ प्रभाकरकरभ्राजन्नयनध्वस्तदिक्तमः॥ १९॥ वृषं महागजं चक्रे च
तुर्दंतं सुपांडरं॥ ककुत्तस्याभवत्तुंभौ सास्ला करैर्विरेजतुः॥ २०॥ घंटाकुशकुथास्तीर्णरत्नचित्रपरिष्कृतं॥ रत्नभ्राजित
कक्षाप्रमुक्तागुच्छविराजितं॥ २१॥ रत्नवेष्टनदंताग्रसितधाराविराजितं॥ पादरक्षैर्गणेंद्रैश्च वीरभद्रादिनंदिभिः॥ २२॥ हरिब्र
ह्मादिहस्ताब्जसमालंबिविषाणकैः॥ वामदक्षिणभागस्थौ गजवर्यस्य नो हरी॥ विराजते विधिः पश्चात्सुरासुरगणैः स
ह॥ नीराजिते गिरिस्त्रीभिः रत्नमुक्ताक्षतादिभिः॥ नदत्सुगजभेरीषु पणवानकगोमुखैः॥ शंखमृदंगपटहाकाहला
नांचनिस्वनैः॥ २५॥ नंदिनोऽत्मारितसुरो महादेवो वृषध्वजः॥ पुरोयायिभिरत्युग्रैः खड्गहेतिधरैर्गणैः॥ २६॥ नृत्यत्सु
रंभामुख्यासु समारुह्य वृषं तदा॥ गजाकृतिं महादेवो रत्नमंडपरुद्धगं॥ २७॥ भ्राजद्धितानकुंभाग्रपताकावलिभू
षितं॥ रत्नपंकजमालाढ्यं यो यासाकं महेश्वरः॥ २८॥ केदारेशालयं तत्र प्राद्दक्षिण्यमुपाययौ॥ स्तुवंति देवा मुनयो
वेदास्तत्र महेश्वरं॥ २९॥ वेदा ऊचुः॥ भजाम यामिनीधवप्रियोत्तमांगसंगतः स्फुरत्कपर्दगांगजोल्लसत्सरागरं
जितं॥ ३०॥ प्रफुल्लहल्लकावलीसुचंपकालिमालिकाक्षमल्लीकसत्कपोलकां भजाम हेम्यकालिकां॥ ३१॥ विहारभू
मिं धवं हरं हरं हरंत मेनसां गिरिपरं गरं परं भजाम सोमशेखरं॥ नगप्रियोरुद्धारिकां स्वभक्तपापहारिकां सुमे
नताकुमारिकां भजाम हे कुमारिकां॥ ३१॥ विभ्रम्य विभ्रम्य नदामुदा हरो सुरैर्गणेंद्रैश्च सुपंक्तिशस्स्थितैः॥ रंभादि
संरंभकृतोरुनृत्तं विलोक्य विश्राणयदंबरे तदा॥ ३२॥ तांबूलपुष्पैर्वरचंदनैश्च सर्वान्सुपूज्याथ मुदा गिरीनसुरान्
॥ गणेश्वरान्वीजितचामरौघः तदाययौ वाग्वरवैर्महेशः॥ ३३॥ पश्चान्महेश्वरगजस्य सुमेनयायुता लक्ष्म्यादयः स्त्राः
सुरवीप्रपत्यः॥ गणेश्वराणां गिरिवर्यकाणां प्रोस्फुल्लपुष्पांबरभूषणाढ्याः॥ नीराज्य हस्ताक्षतजातमौक्तिकैः समु

त्किरंत्योशशिधाममौलौ॥ गौर्यांप्रपश्यात्तनवस्त्रमार्गेयपुर्भुदासंचरत्नाणविभूतः॥३५॥ सपारिबर्हंप्रददौ
भवान्यागिरीश्वरोयंप्रमुदेषिताधनं॥ सुवर्णमुक्तामणिपद्मरागसुपुष्पशंगंवरहीरकंच॥३६॥ प्रवालवैडूर्य
समणींद्रनीलगोमेदसन्मारकताछगर्भं॥ तुलामलालक्षसुसंख्ययाभिःविभूषणान्यप्यतिरत्नसैभगं॥३७
दिव्यांवराणांभरलक्ष्यसंख्यंनिशादिसत्कुंकुमरोचनाढ्यं॥ दासीगणानांचसहस्रशोभिः सयौवनोन्मादभरंवि
भूषितं॥३८॥ गजाश्वगोवृंदमहोक्षवत्संशतांगसंघंसुपताकलाश्वं॥ सहस्रशस्तत्रददौगिरींद्रः कन्याधनं
मानधनोगिरीशो॥३९॥ मुदान्वितोचुर्मुनयोसुरेश्वरागणेश्वरास्तत्रगिरीश्वरंतं॥ धन्योसिमान्योसिसदामहांस्त्वं
हिमाचलोभक्तियुतोसि गौर्यां॥४०॥ ददौयतेकनकदंडविराजितैश्चसच्चामरैःप्रचलकुंडलसुंदरीभिः॥ दि
व्यांगनास्तनविराजितभूषितांगाः कृत्वानुचामरयुतावरवस्त्रपूजा॥४१॥ वर्णिततत्रमुदिताःपुरुहूतदूताभ
धाअमोघहृद्यासुमनालिभिरत्ते॥ द्योतंनिरूक्षाणिगृहाश्चकाशिरेववुश्चवाताशिखिनोपिजज्वलुः॥४२॥ प्र
दक्षिणावर्तशिखाः सुखायतेखामहेशानपदाब्जसन्मुखाः॥ ययुस्तदांमंदरकंदरोरुससौधसुंदरत्नप्रकरं
महेशः॥ भ्राजत्पताकावलिशातकुंभगुच्छैश्चशोशुभ्यदिवार्कबिंबैः॥ सुरम्यरत्नावलितोरणौघैः गणोरुहस्ता
ब्जजलाजवर्षैः॥४४॥ अवारुह्यनागात्सगौर्यामहेशोमहासभांप्राप्यसुरत्नचित्रितां॥ निषाद्यसर्वानमरेंद्रवि
प्रान्गिरींद्रसंघांश्चसदारपुत्रान्॥४५॥ गजाननंपूज्यसपर्ययाशिवोगौर्यागणेंद्रैःप्रतिपूज्यसर्वान्॥ गंधाक्ष
तान्लिश्चसुवाससांभरैःपुष्पादितांबूलवरैःप्रहर्षितान्॥४६॥ चकारतस्योत्सवलोकनेनसर्वानशेषान्हर
एवतत्र॥ परेद्युरामंत्र्यगणौः सुरद्विजैः गिरींद्रसंघैश्चतदंगनाभिः॥४७॥ भक्ष्यैश्चभोज्यान्नवरैःसपंक्तौसंभो
जयामासतदागिरींद्रान्॥ एवंतमासाध्युषितासुखेनसुराद्विजास्तेगिरयोगणाश्च॥४८॥ प्रणम्ययाताःस्वग
हेषुतर्पिताः हराज्ञयातेविविशुः स्वधाम॥ मेनातदाभूधरनायकेनमैनाकयुक्ताप्रययौहिमाचलं॥४९॥ म

शि॰व॰ हेश्वरश्चापि गणेंद्रयुक्तो गजाननेनापि मुदा स्तगीर्या विराजिते स्सौधवरे महर्द्धिभिः तत्कंदरे सुंदरपुष्पशाखिभिः॥५०
४२ तदा प्रणम्य प्रसभं महेशमुवाच भक्तो घटजो महेश्वरं॥ कल्याणशैलधनुषं महिषीसमेतं कल्याणयुक्तवपुषं
हृदये दधामि॥ ५१॥ सदा मुदा मद्धृदये वसेदा वियोगभीतः प्रकरोपि किं ते॥ श्रीस्कंद उवाच॥ तदा महेशो घटजं
वदत्तदा वसैव भूमौ विहरस्व कामं॥ क्षेत्रेषु ते दर्शनमेतदेव भवेत्सदा याहि मया त्वया द्विज॥ ५२॥ नत्वा महेशाज्ञ
पदं भवानीययोर्मुनींद्रो यसा दक्षिणाशां॥ विंध्यं प्रशाम्याथ मुदा महेशं कल्याणवेषं समपश्यदंजसा॥ ५३॥
क्षेत्रेषु वेदारण्यककानने हरं श्रीसुंदरे शैलवरे महेशं॥ नत्वा वसंते पि सुरेंद्रसंघाः कुमारजन्मप्रसमीक्ष्य संस्थि
ताः॥ ५४॥ ये वा पठंतीदं महेशमंगलं सर्वार्थसिद्धिं च लभंति मंगलं॥ ५५॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वा
दशांशे मंदरागमनं नाम विंशोध्यायः॥२०॥ श्रीईशानायनमः॥ श्रीस्कंद उवाच॥ तदा मंदरशैलेनु शैलेंद्रसु
तया शिवः॥ नंदिभृंगिमहाकालचंडीकेशादिभिर्गणैः॥१॥ गजाननेनापि मुदा सेवितो वृषभेण च॥ उवास मणि
सौधेषु विहारशयनासनैः॥२॥ भक्तैर्भोज्यैर्महादेवं सेवंती परमेश्वरी॥ रत्नव्यजनहस्ताग्रा पर्यंके तमवीज
यत्॥३॥ मणिदंडाग्रधवलचामरैः सा दुधाव हः॥ फलालिवरपात्रैश्च मधुमैरेयदानतः॥४॥ दिव्यांगराग
गंधैश्च पुष्पाभरणसेवनैः॥ प्रासादतलसंचारैः सुरम्यवनदर्शनैः॥५॥ हंससारसचक्राह्वकोकिलाशु
कशारिकाः॥ शिखंडितांडवं पश्यन्विजहार स्वकान्त्वहो॥ दोलांदोलनक्रीडाभिः रत्नमंचेषु तौ शिवौ॥ प्रमोद
मापतुः स्वैरं शिवौ हल्लीमलास्यकैः॥७॥ कंदुकक्रीडनरतौ अक्षैर्दीव्यन्तुरीश्वरौ॥ मंदरापारशिखरेष्वेश
मधिरूह्यतौ॥८॥ गजाननेन गणपैः सेवितौ नंदिना मुदा॥ विलोकयच्छिखराग्र्यद्वा विजह्रातेमुदा शिवौ॥ राम॰
९॥ क्वचित्प्रफुल्लसालाग्रं क्वचित्तालरवाकुलं॥ क्वचिदाताम्रशाखाग्रसहकारवनावृतं॥१०॥ क्वचित्प्रफु ४२
ल्लवल्लीभिः मल्लीभिः पुष्पितं क्वचित्॥ क्वचिद्दाडिमरक्ताभफुल्लपुष्पविराजितं॥११॥ तमालकुलनीलाद्य

पुष्पगुच्छयुतं क्वचित्॥ क्वचित्कदंबनिबिडगुच्छपुच्छदलिव्रजं॥१२॥ क्वचिदारग्वधालोलमारुताकीर्णगुच्छकं॥ क्व
चिन्मंदारपुन्नागशिरीषार्जुनशोभितं॥१३॥ देवदारुवनाक्रांतकोविदारवनावृतं॥ कपित्थशिंशपालोध्रधवधसर्ज
वनावृतं॥१४॥ पलाशकाशगुच्छाग्रैः धूम्रवद्भिः कर्णिकारकैः॥ शोभितं निविडच्छायैः कोकिलारावभूषितं॥१५
भ्रमन्मातंगसारंगविहंगविरुतं क्वचित्॥ बिल्वामलकजंबूभिः संवृतं वेणुगुल्मकैः॥१६॥ वनसूकरदंष्ट्राग्र
विदारिघनशिलातलं॥ मातंगमदधाराभिः सिक्तभूतलसंयुतं॥१७॥ उत्पुच्छचामरकुलैः वीजितं गंधितं सदा
॥ कस्तूरिकामृगभ्राम्यद्गंधकेतकमारुतं॥१८॥ मयूरपक्षविक्षिप्तपतच्चंद्रकभूतलं॥ गंधर्वकिंनरानीकगा
यनासक्तसन्मृगं॥१९॥ वल्मीकोर्ध्वफणाभ्राजवक्त्रपूरितमारुतं॥ उत्फुल्लहल्लकैः पद्मैः उत्पलैः सरसीगणैः
२०॥ संवृतं गैरिकाक्रांतं नानावर्णावृतं गिरिं॥ चंद्रिकां शारदीं प्राप्य पुलिनेषु महेश्वरः॥२१॥ कालिंदीगिरिना
स्तत्तटे संशोभिमारुते॥ सेव्यमानो गणैस्तत्र क्रीडते गिरिजायुतः॥२२॥ देवमानेनतहर्षे निनाय परमेश्वरः॥ दे
वास्तेतारकारातिसेनाभिः परिपीडिताः॥२३॥ विष्णुब्रह्मादिभिर्देवैः शक्रेणागुरुणा युताः॥ केदारे शं पूजयंतः
संस्थिता कालवीक्षकाः॥२४॥ महेश्वरं प्रार्थयंति सेनापतिसमुद्भवे॥ देवा ऊचुः॥ जयजय देव महेश दयाव
नलोलदृशा सदृशा परिपाहि विभो तारकहारकसंगसुतोद्भवकारणशंकर पाहि सदा नः॥१॥ जयजय पन्न
गभूषण सल्लगवास सदाशिव पालय नः॥ तारकजन्मसुसंभ्रमखेदमपाकुरु कुरु करुणां॥२॥ जयजय वि
भ्रविनोदनदक्षयमांधकसूदन पाहि दयारसचारुदृशा नः॥ तारकसंगरवारकघातकहरवरसुरतापुध्व
रनः॥३॥ जयजय विश्वविधायकसायक हरिवर भद्रविधायक पापनिवारक पाहि सदा॥ तारकजन्मविषा
ब्धिविनाशकवाडवनेत्रविधायक पाहि सदा॥४॥ जयजय देव महेश्वर शंकर कुरु कुरु करुणां शशिमौ
ले॥ तारकसैन्यविदारणसारशरासनधारकमाशु संसृज कुमारं॥५॥ जयजय पाहि मुदा हृदयेन कुमार

शि.व. शरावणृतारकसंघं॥पापमपाकुरुकुरुकरुणांशिवदेवसमूहविमोहविनाशं॥६॥ इत्थंदेवस्तुतिंश्रुत्वाक्रीडन्नास्तेशं
४३ करः॥शतवर्षसहस्रंतत्रमंदरेचारुकंदरे॥७॥ऊर्ध्वरेताविरूपाक्षःतदाग्निर्द्वारसंस्थितं॥प्रवेश्यतामितिप्रोच्यनंदिनं
गणसत्तमं॥८॥ततःसप्रांजलिर्वह्निःबिभ्यन्नागान्महेश्वरं॥विनयावनतस्तस्थौदेवास्तस्यैकवीक्षणैः॥९॥नि
रीक्ष्योपिहरप्रीत्यातमवोचन्महेश्वरः॥ श्रीशिवउवाच॥देवानांकार्यसिध्यर्थंमद्रेतोरुक्मसंनिभं॥वहपातयगंगा
यांवन्हेमाभीतिमावह॥१०॥ इत्थंशंभोर्वचश्रुत्वातदाग्निःप्रांजलिस्थितः॥अपानयन्महादेवोहिरण्याभंमहेश्वरः
११॥हिरण्येनताभगवान्दशवर्षाणितन्मुखे॥अग्निरप्यतितप्तोभूतश्रमेणमहतायुतः॥१२॥ गंगाद्वारेशरवणे
तत्पातयदंजसा॥ तदागंगाशरवणंहैमंकुर्वेनवस्थितं॥१३॥ रेतोमहेश्वरस्येत्थंप्रवहंस्तद्दिनस्ततः॥तस्यांतत्रै
लास्सर्वेपिसंदीप्तास्तत्प्रभावतः॥१४॥ हिरण्याकारतामापुःतदाब्रह्मादयःसुराः॥जहर्षुर्मुनिभिःसाकंययुस्त
त्रैवविष्णुना॥१५॥तदेकत्रकृतंदेवैःरेतोमाहेश्वरंतदा॥षडास्योद्वादशभुजःद्विपाद्वादशलोचनः॥१६॥संवृत
पीनकौमारवपुरासीद्धिरण्मयः॥षट्कृत्तिकाःसमागम्यस्वंस्तन्यंपाययन्मुदा॥१७॥ववृषुःकुसुमासारंदेवास्तू
र्याण्यवादयन्॥जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥१८॥जेपुर्महर्षयोमंत्रान्राघोत्क्षेपास्तत्रसंघशः॥वि
श्वकर्मासमागम्यकुमारोज्वलभूषणं॥१९॥ धनाधिपतिदत्तेनरत्नजालेनतंतदा॥अभूषयत्तदंगेषुमुदा
चारुषुभासुरं॥२०॥षट्स्वस्रमुकुटान्येवकुंडलानितदामुदा॥कनकांगदकेयूरग्रैवेयाण्यर्पितत्रहि॥२१॥कां
चीसुरत्नखचितांमणिजालकितांतरां॥रणन्मंजीरपादाब्जंचक्रेतत्रसुभूषणैः॥२२॥विरजांबरभूषांगंरक्तगं राम.
धानुलेपितं॥देवपुष्पोरुमालाभिःपरिभूषितविग्रहं॥२३॥ददौपितामहःशक्तिंअग्निश्चापंशरावरं॥विष्णु ४३
श्चक्रंदैत्यहंतृदद्युर्देवामुदान्तदा॥२४॥कुमारोयंचसेनानीराग्नेयोवरषण्मुखः॥ददुर्दानानिभूरीणिहि
रण्यंगोधनानिच॥२५॥धनंधान्यंचविप्रेभ्योजातहर्षास्तदासुराः॥तारकस्यापशकुनान्यासंतत्रसहस्रशः

॥२६॥ स्वात्कबंधंपापानेऽमीविघ्नस्यापनकृद्धे॥ सशर्करोववौवायुः कर्कशोंगारदारुणः॥२७॥ शाम्यंतिचाग्नयः स्त
त्रगृहावक्राश्चतेभवन्॥ तदासकात्यस्यगिराशांतिंच क्रेयतारकः॥२८॥ श्रुत्वाकुमारजन्मेन हृदयेनाविदूयत॥
सुसंनत्यतदासेनाः प्रशासस्त्रिविष्टपं॥२९॥ विष्णुब्रह्मादयोदेवाः तुष्टुवुस्तंप्रणम्यच॥ शतोष्टनामभिस्तत्रत्रिपु
रारितनूभवं॥३०॥श्रीषण्मुखनामाष्टोत्तरशतं॥ श्री॰ षण्मुखःसुमुखस्तातालेखसेनापतिःप्रभुः॥शक्तिहस्तो
दुराधर्षोवीतिहोत्रांगजोशिखी॥शिखिवाहोद्वादशाक्षः गौरीप्रियतनूभवः॥ सेनापतिर्वीतशोकोमहाबलपरा
क्रमः॥२॥ स्कंदोनंदित्ववृंदारोमारमारात्मजोबली॥ क्रौंचाद्रिमथनोयोगीसुब्रह्मण्योमखेडितः॥३॥ गांगेयोवै
घ्नुतोमोघोतारकांतकरोरविः॥ महासेनोद्वेषघ्नोग्रगण्वार्यप्रकाशकः॥४॥ महासेनोशरवणोभवोद्भवसुतोग्रमः
॥ विनायकानुजः श्रीमान्शूरसंहारकारकः॥ ५॥ सेनानीर्दुर्दुरोवीरोगर्भोविश्वपतिःकविः॥ गुहोहरिहयःशा
स्त्राशरासनकरःशरी॥ ६॥ आपकोनंतशक्तिश्चकुमारोउज्वलांगकः॥ वीरबाहुगणाध्यक्षः अक्षप्रीतोविशारदः
७॥ कांतःशांतोजितारातिःउमाकांतात्मजोपरः॥ वल्लीपतिर्जितारातिः कुक्कुटोत्तमकेतनः॥ ८॥ शिवलिंगार्चनप्री
तोगंधपुष्पाद्यलंकृतः॥ मकुटीचांगदीचक्रीगदीशंखीशिखीजटी॥ ९॥ सनातनःपरस्तारःतारकःता
रकांतकृत्॥ संवर्तोयौवनोघोराबालोलीलाविनोदकृत्॥१०॥ प्रसन्नाक्षःपंकजाक्षोशंबरोशंबरप्रियः
॥ सुपल्लवशिखीधन्वीखड्गखेटकरःसुतः॥११॥ विश्वप्रियोनंतशक्तिःसुराध्यक्षोदुरासदः॥प्रमोदोमेघ
दमनःशक्रपूज्यःशतक्रतुः॥१२॥ कृत्तिकासूनुरमलःकृत्तिवासप्रियोविराट्॥ स्वाहाप्रियःकार्त्तिकेयोह
रणोवेगवत्तरः॥१३॥ स्वर्णवर्णःपारिभद्रोतांप्रसारणतारकः॥ सुपुष्करमहीमालोललितांगःसुरावषः
नः॥१४॥ यशस्करोमरप्रियोगीतनन्तप्रियोर्तिहा॥ वीरभद्रमहाशास्तानंदीसख्येकतत्परः॥१५॥ निरंज
नोनिराधारःशंकरोमापतिर्बटुः॥ ब्रह्मचारीगिरिचरोसर्परूपोदुरासदः॥१६॥ षष्ठीप्रीतःसत्कुमारःस्म

रस्मेरास्यसुंदरः॥ विज्ञानदः शिवज्ञानी शिवभक्तशिरोमणिः॥ १७॥ नृत्यैर्नामभिस्तुत्वा नवा देवाः सवासवाः॥ जहृषु
स्तंकुमारंचशतपुष्करमालिकं॥ १८॥ विमानेनार्कवर्णेन निन्युर्देवा महेश्वरं॥ नदत्सुदेवतूर्येषु ननृत्युस्त्वप्सरसः
सुखं॥ १९॥ वर्षत्सुकुसुमासारं गंधर्वैः कृतगायनैः॥ तेनरम्यंदरीगिरिंसंप्राप्य प्रमथाधिपं॥ २०॥ प्रणम्यास्थितजास्त
त्रमुदमापुर्महेश्वरः॥ दृष्ट्वाकुमारंमाराभं गौरीवीक्ष्याननं हरः॥ प्रमुमोद महादेवः इत्याख्यालिंग्य शंकरः॥ स्वां
कपर्यंकसंस्थितं चकार परमेश्वरः॥ २२॥ तदा पंचमुखस्तत्र जिघ्रन् गौर्याबह्वाननं॥ गौर्याः सह महेशोऽपि तदा पंचद
शाक्षिभिः॥ २३॥ पश्यन्ननिमिषैर्नेत्रैः स्वरूपेदृनलशोभितैः॥ तनुश्रिमध्यगौदृष्ट्वा सशिखिपिविषस्तनूभवं॥ २४॥ गौरी
५९ नर्पणीयक्ता मवस्वामिने॥ कान्तारांगिरिगुल्मगह्वरनदीकुंडात्मकानां सदा गोप्त्रे नैष्ठुवसर्वतो निवसते नानाविधप्रा
णिनां॥१६॥ अध्यक्षाय वनस्य धर्मगहनं त्रात्रे नमस्ते नवा यस्मिन्विश्वमिदं स्थितं भवति यस्तस्मिंस्थितः सर्वतः॥
यः शक्त्या भुवमातनोति विजया कर्ता धनस्यापि यस्त्राता वर्त्मपतां धनस्य कृतिनां दत्ता तमाद्यं धनं॥ १७॥ यस्त्रा
ता धीरवस्तूनां करुणायायैनैव विश्वात्मना वारीशात्मतया च वारिणि सदावासः कृतो येन च॥ भूमात्मा स्वयमो
षधीः प्रजनयन्ग्राम्यास्तथारण्यकास्ताः सोमात्मतया च याति सततं तस्मै नमस्ते नमः॥१८॥ नम उच्चैर्घोषा
०॥ उच्चैर्घोषवते महार्णवमहामेघादिरूपाय ते शंभो पाहि शिवेति भक्तनिवहैरुद्घुष्यमाणाय च॥ यश्चाक्रंदयते
रणेऽसममसमाह्वानैर्भटानां मुहुर्यः शक्तोपि जगंति जेतुमखिलान्येकः स्वयं लीलया॥१९॥ पत्तीनां च पतिः प
दातिशतकोटीनां च नेता भवंस्तस्मै देव नमो नमोस्तु भवते कृत्स्नांतकाले जगत्॥ नमः कृत्स्नवीतमभूच्च येन ह
रता कृत्स्ने च भूते सदा चासीनोपि च संनिधावपि सदा कल्पांतरात्रौ तथा॥२०॥ योसौ केवलसर्वरूपहि शिवः
कृत्स्नात्मकः शिघ्रं ते भक्तरोधयति प्रसीदति पुनस्तस्मै च शीघ्रं सदा॥ वत्सं गौरिव चानुधावति परित्रातुं स्वभक्तं
जनं नेत्रेभ्रह्वाविलासमनेकविधसत्वानां च तस्मै नमः॥२१॥ मेधाराज्यवशित्वमावरवधूः शत्रुक्षयाद्यं फलं भक्ता
नां प्रदिशंतमीशमृषिगणामंड्रुवन्ध्याम्नाचिरं॥ ध्यातं रुक्ममहं भजे सुरतरोर्मूले निषण्णं सदा भोर्यामेतिक
भूषणांगममलं वालेंदुगंगाधरं॥२२॥ श्रीस्कंद उवाच॥ नमस्ते रुद्राद्यैः प्रतिपदनमोंतैर्मनुगणैर्ऋषे देव राम·
ध्यानप्रतिवचनवाक्यार्थमधुरैः॥ निरुक्तैः स्तोत्रौघैः श्रुतिशिरसि बोधाय सुगममुपायस्तेऽध्यायानकथयदु ५९
मायै स भगवान्॥२३॥ गौरीनाथकभावितोयमगजाप्रीत्यै नुवाकद्वयस्यार्थस्तंधिषणो मिशंकरमुखाच्छ्रो
तं यथा निर्गतं॥ ततिसूक्तिभवौघबंधहरिहरब्रह्मादिभिर्गम्यं मुने भाष्यं खेतदपारदिव्यसहितः संश्राव्यमुक्तो

भव॥२६॥ इतिश्रीशिवरहस्येईशानाख्येद्वादशांशेरुद्राधीनरूपशांनामसप्तविंशोऽध्यायः॥२७॥ श्रीईशानायनमः॥
श्रीस्कंदउवाच॥ नमः सहमा०॥ हर्तुंभर्तुंमाश्रुचगत्कर्तुंकृतंचान्यथाकर्तुंदुर्घटमेवसंघटयितुंशक्तस्त्वमेकःप्रभुः
॥तस्मात्तेसततंनमोस्तुविजयाशक्त्याभिभूतंजगत्सर्वंस्वात्मनिकुर्वतेचसहमानायापराधान्सतां॥१॥ साधूनाल
यितुंखलांश्चनितरामाविध्यतेनेत्वलंयासेनाअभितःपरानभिमुखानतासांचनेत्रेनमः॥ देवेशायनमोमहारुषक
कुद्मागाधिरूढायतेप्रोद्यत्खड्गमहाग्रहारपटवेचौर्यायलीनात्मनां॥२॥ चोराणामपिभक्तवत्सलतयासंरक्ष
काथाथवातेषांश्रेष्ठतमायसर्वहरणाढ्यंतेनमस्तेनमः॥ उद्यत्खड्गवनेजनेषुनितरांभक्तेषुसक्तायवात्रूशीरोत्त
मधारिणेपरहरन्तांसाक्षान्महारण्यके॥३॥ नमोवंचते०॥ व्याधानांपतयेनमोनमइदंतेवंचनांकुर्वतेयःकुर्व
न्नपिविप्रलंभमभितोव्याहन्यतेनापरैः॥ तस्मैतेपरितःसदाविचरतेहर्तुंपरेषांधनंनित्यंकृत्रिमसाधुवेष
मयतांनानाविधछद्मनां॥४॥ नमोनिचर०॥ स्तायूनांपतयेनमोनमइदंसंहारशीलायतेदार्ढ्यौर्घ्येनितरां
वनेषुसततंत्राणंजनानामिनान्॥ सृष्यकंपरितःसदैवचरतेस्वामिन्नरण्येनिशंदस्यूनांवसतांनमोस्तुप
तयेतेभ्योपिनित्यंनमः॥५॥ नमस्सृका०॥ येरुद्राःसतशास्त्रयाधृतमहावज्राद्यनेकायुधास्तेषांवानुचरा
वरायुधधरास्तेमाविनाशेथवा॥ मर्त्यायेप्यथहिंसकाश्चधनधान्यादीन्यसंमुष्णतांव्याधानांपतयेनमो
स्तुभवतेतेभ्योपिनित्यंनमः॥६॥ नमोसिम०॥ उत्कोशासिधरेभ्यआशुनगरेनक्तंचरद्भ्यःसदाचौर्यायैवहरंनियो
निशिधनंहत्वैवतेषामपि॥ नाथायास्तुनमोनमोधृतमहोष्णीषायतुभ्यंनमोव्याधैःसंचरतेहरंनिरथिर्वांये
वाप्रकृंऽत्ताबलान्॥७॥ क्षुद्रारण्यगिरिप्रदेशपतयःक्षुद्रक्रियाभिर्धनाहर्तारःकुलकुंचकाश्चपतयस्तेभ्यां
नमस्तेनमः॥ नमइषुमः॥ ॥ हस्तेनैकतमेनसंप्रतिदधानेभ्योमहेषुंधनुःसव्येनान्यतमेनवःपथिकरेणा
त्तंवहद्भ्योनमः॥८॥ अस्यभ्यश्चनमोथकुर्वतइमेयुष्मायसज्यानालंसज्येदिव्यधनुष्यमोघशरसंधानंमुहु

शिव. वैंगतः॥ कुर्वद्भ्यश्चनमोनमः शरवरान्संधायचापेसमाकर्णेभ्यो विसृजद्भ्यएवचनमोभूयोनमः सायकान्॥ ज्यामुक्ता
६० नभितःपरानभिमुखान्संप्रापयद्भ्यः शरांस्तैः शत्रून्प्रहरद्भ्यएवपरितः शश्वन्नमोवोनमः॥ नमआसीनेभ्य॥ आसी
नेभ्यइतस्ततोभुविशयानेभ्योगृहेभ्यांतरेष्वायासेनचवोनमोनमहृदंतेषुस्वपद्भ्यः सुखं॥ ११॥ जाग्रद्भ्यश्चनमोन
मः क्वचिदधिस्तिष्ठद्भ्यएवक्वचित्थावद्भ्यश्चनमोनमः समुपविष्टेभ्यः क्वचित्संघशः॥ स्वामिभ्यः सदसांनमोनमद्
हंचाश्वग्रहेभ्योधवायेवांश्चलनवितमात्रमपिनैवास्तितेभ्योपिच॥ ११॥ अश्वास्यश्चनमेः स्यउज्वलमहास्त्रे
भ्योनमः श्रीमतोदेवस्यानुचराः किंबराःनवपुषः श्रीरुद्रसंघाः परे॥ लीलासंभृतविग्रहाभगवतस्तस्यांशभू
ताः सदायेचान्येबहवः श्चरंतिपरितस्तेभ्योपिनित्यंनमः॥ १२॥ स्वात्मानंहृदिभावयंतमनिशंरुद्रंरिपुध्वंसनंरा
ज्ञामात्मसमस्तराष्ट्रपुरहस्त्यश्वादिरोगापहं॥ बर्हीतंसधरंकिरातवपुषंदेवंयुवानंश्वभिर्भूतंश्वावृतमग्रतोऽस्तुनि
जैनैर्ध्येयंसदाचिंतये॥ १३॥ योत्रानुवाकत्रयमेतदद्भुतंयोर्थतथा ध्यानमिदंहृदामुदा॥ संधायमंत्रांश्चशिवस्य
भावतः पठेत्सुमुक्तिंसमवाप्यमुक्तधीः॥ १४॥ इतिश्रीशिवरहस्ये ईशानाख्येद्वादशोंशेस्कंदजैगीषव्यसंवादे
तृतीयानुवाकःसमाप्तः॥ नमआधिनी॥ सर्वाभ्यश्चनमोस्तुयाभगवतः सेनाः समंतात्खलानांविध्वंसिजगत्स्थिता
यविविधंयास्ताडयंत्युत्थितान्॥ याऽऽलक्ष्यगणौश्चपतिनिवहैः पूर्णाश्चयाहिंसिनीर्यापारान्परिगृह्यंतिकुश
लप्रज्ञाविशेषाश्चये॥ १॥ तेषांयेपतयश्चयेत्वनियतांवृत्तिंमुहुः संश्रितानानाजातिसमुद्भवावहुविधस्तुक्रि
याजीविनां॥ संसक्ताअथतानवंत्यपिचयेयेभूतरक्षोगणारुद्राः पारिषदास्तथाधिपतयस्तेनांश्चयेयेपरे॥ राम.
२॥ नग्नामुंडितमस्तकाअतिविकृताकाराश्चयेस्वेच्छयासिंहव्याघ्रगजाश्वसैरिभवृकाद्याकारभाजमहिष ६०
श्चये॥ ज्ञानाकारगुणप्रभावविभवैर्नित्यंमहांतश्चयेक्षुद्रज्ञानगुणप्रभावविभवायेवारथ्याधिष्ठिताः॥ ३
येचुत्येषुरथ्यान्वितेषुचरणैर्धावंतिशत्रून्मुहुर्येचंद्रार्कमहामुखाः सुरगणाः प्राप्तारथ्यत्वंविभोः॥ येरक्षंति

रथान्वक्रन्त्वयमपारुल्यैवशक्त्यास्वयायेरुद्राः परितः शिवस्यपुरतः सेनान्यमेत्यासते॥१८॥ येतासामधिनायकाः
सुखवरायेसूतरूपाः सुरायेगरुड्नंनिरयेभुरश्मिनिवहान्सुता इयाकिंकराः॥ येसुर्वधंकिज्ञा निज्ञा अपिचयेरक्षार
घानांकृतौयेज्ञानाश्चकुलालज्ञातिभुतथा येलोहकाराश्चये॥१९॥ नानापक्षिसमूहबंधनविधौदक्षाश्चयेवैज
नामत्स्यादिप्रतिघातकाअपिचयेकुर्वंतितीक्ष्णानिभून्। येवाधन्वकृतश्चयेवनमृगव्याधाः सदायेतरानेता
रश्चभुनांचवत्तिनिरतायेवाभुनामाकृतिं॥२०॥ विप्राराणाअघयेभुनांचपतयः शंभोरघांशांशकाः सर्वमर्त्याः
जगद्धनाः कुमनुजाविश्वेश्वरांशाश्चते॥ येभूमौदिविचांतरिक्षसर्वधरणौब्रह्माग्निविष्ण्वादयोयेरुद्राश्चजगन्तिर्यं
तिपरितः पूर्णाः शिवस्यांशकाः॥२१॥ येसंतिप्रमथादिरूपचरिताः सर्वेभ्यएवाधुनातेभ्यः संप्रतिपूर्वसंस्तुति
नतिंकृत्वानमस्कुर्महे॥ शंभुंदुःसहदुष्टकष्टविविधव्याधिज्वरापस्मरप्रक्षेपस्मारमजंशिवंस्मरहरंदुर्वासना
मार्जितं॥२२॥ भस्मोद्धूलितविग्रहंत्रिनयनंभास्वज्जटामंडलंस्वासीनंवरभोगिभिः परिवृतंसांबंसदाभा
वये॥ श्रीरुद्रंयजुषोचमध्यममहाकांडेचतुर्थेस्थितंसंसारामयभेषजंप्रजपतांविघ्नेशभक्तिप्रदं॥२३॥
तस्मिन्नर्थयुतोविभासतिहृदामत्रानुवाकोमुदाचातुर्थः सकलात्मतांभगवतोवक्तुंप्रवृत्तोमुने॥ इतिचतु
र्थानुवाकः समाप्तः॥ इतिश्रीशिवरहस्येईशानाख्येद्वादशांशेस्कंदजैगीषव्यसंवादेअष्टाविंशोध्यायः
॥२८॥ श्रीईशानायनमः॥ श्रीस्कंदउवाच॥ नमोभवाय०॥ विश्वंयः सततंबिभर्तिसमधिष्ठायैवमूर्त्या
एकंयस्ताभिस्तनुभिः शिवाभिरनुगृण्हातीवतस्मैनमः॥ यः सर्वत्रसुपूर्णएवभवतिस्वस्मिन्विलीनंजगद्
योभावयतिस्थितंभवतितद्यस्मिंश्चयोभाव्यते॥१॥ योगींद्रैर्भगवानपांस्वयमधिष्ठाताचयोसौरुजांनिस्सं
द्रावयितासतांस्वयमधिष्ठानाचसूर्यस्ययः॥ तस्मैनित्यमिदंनमोस्तुयुगपत्कल्पांतकालेजगत्सृष्ट्वाभुवि
हिंसतेस्वयमधिष्ठात्रेतथाग्नेरपि॥२॥ आज्ञादंडधरः प्रसारितमहामायोरुपाशः पशून्ब्रह्मादीनवतीह

शि॰व॰ भूतनिवहाधिष्ठानरूपश्चयः॥ तस्मैसर्वसुराधिकायजगतामीशायतुभ्यंनमोनीलग्रीवकलेवरायशितिकंठायतु
६१ भ्यंनमः॥३॥ नमः कपर्दिने॰॥ योगीशायकपर्दिनेखिलमहायोगेषुदीक्षाभृतेतुभ्यंभ्रसशिरोरुहाययजमानाका
रायतुभ्यंनमः॥ नमः सहस्रा॰॥ देवेशायसहस्रलोचनभृतेशक्रात्मनेतेशतायंतोत्तमधन्वधाराविविधानेका
युधानांयुधि॥४॥ नमोगिरि॰॥ विश्रागायनमोगिरीश्वरकृतावासायदिग्वाससेरश्मिभ्रान्तवनार्कमंडलस
माविष्टायसर्वात्मने॥ सर्वप्राणिहृदंबुजेषुवसनेतुभ्यंनमोरेतसः सेक्रेदिव्यहिरण्मयस्यचहरेगर्भेविधात्रेवि
धेः॥५॥ ह्रस्वायात्नमहेषवेनमइदंस्वल्पप्रमाणायचस्वेच्छासंकुचितांगकायचनमस्तस्मैवहुरूपिणे॥ ज्ञाना
कारवयस्तपोभिरभिवृद्धायतस्मैनमोवृद्धायाधिकदीर्घकालवयसांस्तोत्रैः प्रवृद्धायच॥६॥ सम्यग्वर्धयतेसभ
क्तनिवहान्देवायतस्मैनमोविश्वाग्र्यायतथाप्रधानपुरुषायेदंनमोस्त्वाशवे॥ नमः शीघ्रि॰॥ शीघ्रानेकगतिप्र
भेदकुशलायेदंनमः शीघ्रगास्वाविर्भावयतेचनासुविविधाकारप्रवाहासुच॥७॥ नमऊर्म्या॰॥ नित्यंसंनि
हितायतेनमइदंस्त्रोत्रमहोर्मिष्वपांनिष्कंपाविगतस्वनाःपुनरवाचीनस्वनाश्चापियाः॥ आपस्तासुचसर्व
दानिवसनेतस्मैनमः स्रोतसांमध्येसंनिहितायकिंचवसनेद्वीपेष्वपुण्येषुच॥ ८॥ नमोज्येष्ठाय॰॥
तुभ्यंदेवनमःपितामहहरीन्द्रेभ्यःप्रशस्तायचज्येष्ठायातिमनोज्ञनित्यतरुणाकारायनित्यंनमः॥ विश्व
स्मादपिपूर्वमेववसतेस्त्रोत्रेचतस्मात्परंजन्मांतादिविवर्जितायचनमोमध्यप्रसिद्धायच॥९॥ ली
लाशैशवधारिणेनमइदंतुभ्यंजघन्यायचास्थित्यंतादिमतामशेषजगतांमूलायतुभ्यंनमः॥ गांधर्वे राम॰
नगरेतथैवनगरेष्वन्येषुसर्वेष्वनुस्त्रोत्रेधीशतयाप्रतीपसरणोदक्षायतुभ्यंनमः नमोयाम्याय॰॥ प्रा ६१
णिप्राणसमूहसंयमनमप्यंतेस्वयंकुर्वतेनित्यंसंवसनेयमस्यचपुरेकालांतकाद्यात्मने॥ विश्वक्षे
मविधायिनेनमइदंसोरात्मनाचोर्वरास्वाविर्भूयसमस्तसस्यनिवहस्यावर्धयित्रेसदा॥ १०॥ धान्या

द्यात्मतयाऽखिलेषुवसतेतुभ्यंनमः सर्वदाश्लोकेवात्मतयास्थितायसततंदेवैः सहक्रीडते॥ कल्पांतेप्यविनाशिनेश्रुति
शिरोवेद्यायतुभ्यंनमः स्वारण्यायचवृक्षजायचनमः शुश्रूषमाणायच॥१२॥ वर्णाध्वन्युभयात्मनाश्रुतिपुराणादौ
प्रसिद्धायचप्रत्युक्तिप्रतिशब्दरूपिणइदंतुभ्यंनमः शीघ्रगां॥ नमआशुषेणाय०॥ सेनांपालयतेनिशीघ्रगारथा
येदंनमः सद्यतेशूरश्रेष्ठनमायदुष्टनिवहान्संभिंदतेतेनमः॥१३॥ नमोवर्मिणे०॥ वर्मश्रेष्ठभृतेविशिष्टविः त्वस
द्देहायतुभ्यंनमोदिव्योपायनभस्मभाजनशिरस्त्राणादिकंबिभ्रते॥ आग्रस्यंकस्थलबिंबबंधुकभेनित्यंनमो
स्तुश्रुतिख्यातायश्रुतिविश्रुधायुधभृतेविख्यातसेनायच॥१४॥ ध्यानं॥ शंभुंशत्रुभयापहंजयमहासाम्राज्य
सत्पुत्रदंगौरीपाणिसरोरुहार्पितमहाहेमाद्रिबाणासनं॥ बाणालंकृतपाणिमेणविलसद्बालेंदुगंगाधरंशां
तंसुंदररूपिणंवृषवरारूढंभजेसर्वदा॥१५॥ रुद्रार्थविश्रुतपदार्थसुबोधसारवाक्यार्थवैभवमिदंप्रकटा
नुवाद॥ पंचास्यशांतश्रुतिविश्रुतपंचवाकवेदानुवाकमिदमेवमहार्थसारं॥१६॥ नमोदुंदुभ्या०॥ देवीशा
यनमोस्तुदुंदुभिमहानिःश्वानरूपायचप्रौढात्युन्नतवैभवायवसतेदेवैश्चसार्धंसदा॥ भेरीवादनदंडरूपि
णइदंतुभ्यंनमः सर्वदादुष्टान्धर्षयतेविमर्शकुशलायाशेषविद्यासुच॥१७॥ निर्भ्यंभक्तजनेप्रकृष्टकरुणा
शीलायतस्मैनमोदैत्यंकर्मचकुर्वतेसुमनसांत्राणायवन्द्यात्मने॥ भक्तेभ्यःकृपयाप्रकृष्टधनदायेदंन
मोबिभ्रतेखड्गंचेषुधिमुत्तमंनमइदंतीक्ष्णेषुहस्तायच॥१८॥ तीक्ष्णानेकवरायुधायचनमः सौम्योत्तम
स्त्रोचितामोघानेकमहायुधायशुभसत्कोदंडहस्तायच॥ नमस्तुत्या०॥ तुभ्यंदेवनमोस्त्वनेकविविधक्षुद्रा
र्थसंचारिणोप्रख्यातायचरायचाचरमहालिंगेषुपूज्यायच॥ नीप्याय०॥ निर्मग्नांभसिभूतलेसदुदकेदे
शेशुचौकर्दमेविख्यातेषुसरस्सुविश्रुतनदीश्रेष्ठासुनादेयिच॥ वैशंताय०॥ देवाद्यर्थनिवेशितेषुनिवहिकू
पेषुगर्तेषुचसदूर्याभसिभूतलेसदुदकेविद्युत्सुतस्थांभसि॥२०॥ ईध्रियाये॥ शीघ्राभ्रेस्फुरदानपेषुचमहा

शिव. वातेचरिष्णमहाभूतवातयुगांतदुःसहशिलावर्षोग्रसंवर्तके।।ग्रीष्मेवातसमुत्थपांसुनिवहेवात्यासुवान्यत्रवाय्याःसंत
६२ स्यनदात्मनाजगदिदंमाप्यस्थितायनिशं।।२।।वास्तुपाय०।।यःसर्वाशासदैवपातिपरितोवस्तूनिवास्तोष्पतिस्त-
स्मैवास्तुनमोस्तुसर्वभुवनव्यापायसर्वात्मने।।ऋषिदेवते।।रुद्रंभीमकनामकेनमुनिनाश्रीहेमकोशेनचध्यानंव
श्यसुरूपवृष्टिसुतसत्संपतिमेधायुषां।।२२।।विद्यारोग्यसुधेनुपदसत्साम्राज्यमोक्षश्रियांदातारंहृदिपद्मर्मेलं
बितजटासर्पांघ्रिचिन्हंभजे।।रुद्रार्थसारवरमंत्रपदार्थसारपुण्यानुवाकविशदःखलुषष्ठसप्तः।।२३।।विश्वा
धिकप्रणतिबोधकसर्वभावयुक्तोहिभक्तवरमुनिगशक्तिः।। दायी।।२३।।इतिश्रीशिवरहस्येईशानाख्येस्कं
दजैगीषव्यसंवादेस्कंदप्रोक्तरुद्रभाष्येएकोनत्रिंशोध्यायः।।२९।। श्रीईशानायनमः।। श्रीस्कंदउवाच।। नमः
सोमाय०।। लोकानुग्रहकाम्ययाखिलसतांध्येयाःशिवाःसर्वदाधत्तेयःशिवशंभुशंकरमुखानेकाभिधा
नास्तनूः।। तस्मैदेवनमोस्तुयःकरुणयाप्रादुर्भवत्यग्रतोभक्तान्यातिसहोमयाप्रतिदिनंदेवाग्नितृप्त्यानवा
न्।।१।।अन्यानप्यमितेनतर्पयतियःसोमात्मनापञ्चतःसर्वानभ्युदयेनयोजयतियःसोमादियागात्म
नाः।। रुद्रायेत्या।।यश्चद्रावयतिस्वयंप्रणमतांनित्यंरुजंयोगिनांतस्मैदेवनमोस्तुनित्यमुदयेकाश्मीरताम्रा
यच।।२।।अरुणायः।।सिंदूरारुणकांतयेतदनुतेस्वर्णाभनेदंजगत्द्युत्याद्योतयतेचशंगमयतेप्रायश्च
भतंजनं।। पशुपतये०।।सर्वाम्पालयतेपशूंस्त्रिविधिमुखान्चोराग्निपश्चधारोगेभ्यःकृपयाचतेनमदृदंते
दुष्प्रधर्षायच।।३।।दुःखाद्यैःपचमानमूर्तयइदंयेभ्यःसमस्तंजगज्जन्मव्याधिजराविपत्तिमरणाद्यैर्यो राम.
विभेनीदृशाः।। यस्मान्मुक्त्यतिनेपितेभगवतेतस्मैवियन्मूर्तयेतुभ्यंदेवनमोयदाखलजनाःसाधूनजिघां ६२
संतिय।।४।।आविर्भूयतदग्रतःप्रथमतस्तेषांनिहंत्रेचयेदूरंत्वामपहायसर्वजगदाराध्यंकुमार्गेस्थिताः
नमोहंत्रेच०।।तेषामेवदुरात्मनांशिवतरेकालेप्रहंत्रेनमोहंत्रेहंतिवलनयेनमहतांहंतव्यमाशुक्षणात्

५॥ तद्रूपायपशून्कृत्वाविषमहासंहारकालेबलस्यात्यंतातिशयेनहंत्यपिहरिब्रह्मेंद्रमुख्यामरान्॥ अतोयश्चरा
चरस्यजगतस्तस्मैनमोस्तुप्रभोरुद्रः पंतिजगंतियेचपरितोरक्षादिरूपाः परे॥ ६॥ हरिकेशे०॥ येरुद्राहरिताभ
केशानिवहास्तेभ्योपिनित्यंनमः संसारार्णवमाभृतारयंतियस्ताराक्तमकः सर्वथा॥ ब्रह्मब्रह्मविदांचिराद्गुपदिश
न्तस्मैनमस्तेस्तुयद्दुःखापायमयंसुखंयदिचतद्भोग्यंपरंब्रह्मच॥ ७॥ नमः शंभवे०॥ साक्षित्वेनतयोः शमित
पिमयश्चैतौहविख्यातयोर्दृष्टेनित्यसुखात्मनेनमइदंश्रीशंकराख्यायच॥ सर्वस्मैजगतेकरोतिकृपयायः
शंमयः श्वानिशंतस्मैतेस्तुनमः शिवायचगुणातीतायशुभ्रायच॥ ८॥ इच्छाशास्त्रतयावियुक्तचिद्धनशरी
रायाव्ययायात्मनेपूर्णानंततरायपूर्णसुखदायाजस्रपूर्वायच॥ शेतेस्मिन्जगदीशतेदिशतिचश्रेयः प्रजा
नामसौशांतियानिसमस्तमंगलगुणग्रामैकसीमायते॥ ९॥ इच्छाशक्तिमुपैतिनिर्मलतरश्चाशतेप्रकृत्यैतिच
ग्राचष्टेशिवनामयस्यविभवंतस्मैपरस्मैनमः॥ शिवतराय०॥ लोकानामविपर्ययेणकुरुतेत्यंतंशिवंयः सदातस्मै
चास्तुनमः प्रयागबदरीकेदारकाश्यादिषु॥ ९॥ तीर्थ्याय०॥ तीर्थ्योयोहिमरुद्धधादिसरितांकूलंचगोदावरीकृ
ष्णासिंधुसरस्वतीमुखसरित्पारंतदर्वाक्तटं॥ नित्यंसंनिहितायतेषुजगतांत्राणायतुभ्यंनमः प्राप्येवोत्तम
येनिजजन्मगुणामृत्तकर्मक्रमात्प्राणिनां॥ १०॥ नमः प्रतरणा०॥ मग्नानांभवसागरेकरुणयायोन्मज्यतेभ
वादूर्ध्वंयोध्वरतेनमः क्रमवशात्पारंभवांभोनिधेः॥ प्राप्तान्कर्मवशेनजंतुनिवहान्नावर्तमानान्पुनः कंतुप्रे
रयतेधियस्तदनुतान्मध्येभवाब्धेश्चिरं॥ १५॥ नमः शष्प्याय०॥ सर्वान्क्रामयतेनमोस्तुभवतेपुण्येषुदर्भा
दिषुक्षुद्रप्राणिकुलेषुबालतृणवत्स्वल्पप्रमाणेषुच॥ येनेकेनवदल्पकालमथवाजीवन्तुजंतुस्तहोप्येव
तत्सिकतासुतद्वदधिकस्थुद्रेषुनार्पिच॥ १२॥ नानापुण्यनदीप्रवाहनिवहेतत्तुल्यभूतिष्वपिश्रेष्ठाप्रा
णिषुवेणिषुचतथानित्यक्रियामानिषु॥ प्रख्यातेपथिचप्रकृष्टतरसन्मार्गानुवर्तिष्वपिक्षुद्रानेकशिला

शि॰व॰ तिकर्कशतरेदेशेकुशीलेजने॥१३॥स्वयशाय॰॥वस्तव्यंविजनेजनेष्वपितथायोगेष्वचैतेष्वयःसर्वंचैवमनुग्रहायजग
६३ गतामास्तेविभुःसर्वतः॥तस्मैनित्यनुनमःकपर्दिनेदर्दंसत्कुंडलाय॥नितंभक्तानांपुरतःस्थितायत्वनमोगोष्ठेगृहाभ्यं
तरे॥१४॥नमस्तल्प्या॰तल्पेनतल्पनरानिरत्नविविधप्रासादमध्येतयाकोटेपर्वतगह्वरेकूलवरेनीहारवारिण्यपि
पि॥ह्रजस्पाय॰॥सत्संसोविषमेरजस्यपितथाशुल्केपिचार्द्रेपिचदेशेलुम्पनशादिकेचपरितःपूर्णोत्तरणाद्यैःस्थ
ले॥१५॥नमऊर्म्याय॰॥ऊर्म्यामध्यविलाकृतिप्रतिकृतौपर्णेचपर्णाव्रजेशूरेचस्वितेशिवोयमेवमभितःसन्नि
ध्यस्वांशैःस्वयं॥भूतंभाविचवर्तमानमनुगृण्हात्येवबुध्यास्सतांभक्त्याभावयतांसएवसुलभस्तस्मैनमस्कु
र्महे॥१६॥अभिघ्नते॰॥हंतव्यानभिहंतुमायुधवरैरुद्यम्यसंधावतेदुष्टांस्तेरभिनिघ्नतेनमइदंकांश्चित्सम
पीडनैः॥प्रस्त्रिवदते॰॥कांश्चिच्चापिखलानवलस्यमहतःस्वस्यप्रकर्षेणचाखंनंभेदयतेसमस्तजगतांक्षेमा
ययोगावच॥१७॥आनिर्दयता॰॥स्वात्मानंहृदिभावयंतमनिशंरुद्रंचसारूप्यदंसाम्नाज्यादिरिपुक्षयाद्विनि
खिलाभीष्टप्रदंध्यायतां॥सप्तद्वीपमहाधिपत्यदमनंतोद्यद्दिनेशद्युतिंभूतेशंभुजगेंद्रभूषिततनुंकंठेक
लंकंभजे॥१८॥नमोवः कि॰॥ईषत्तुच्छफलप्रदाःक्रतुभुजोनानाधिकारास्त्रयस्त्रिंशन्मानमितैर्गणै
स्त्रिगुणितैःस्वांशैर्गणेशान्वितैः॥प्रत्येकंपरिवारिताःस्वसदृशैरेनश्चवायोस्तथासर्वस्याग्रविभूतयःक्र
मपुनाप्येकादशैकादशा॥१९॥संधीभूयवसंनिवेधिपतयोभूम्यंतरिक्षद्युपुत्रिश्चन्यैसहूवद्भिरेवममरैः
सर्वैःसहप्राणिषु॥श्रीशोऽत्रीशाशनानिचीयरिनयत्रिंशश्चदेवाभयंत्यंशाःजीवघनस्यपंकजभुजोवन्हेः राम॰
स्फुलिंगाश्च॥२०॥तेदेवाःकथमीश्वराःकथमपिध्यानेनयोगेनवादत्त्वाश्चपरमेश्वरात्भगवतोज्ञानं ६३
त्वर्चित्वानपि॥ज्ञानीयःकथमल्पकाःवयमयापिस्वेच्छयेदंजगत्कुर्वंत्यःकृतमेतदेवनितरांविस्तारय
न्यःसदा॥२१॥देवानांहृदयेषुयोगजधियातेषांवसन्योयथाप्रज्ञंभातिवशानदांतमहदारुद्रात्मनःस्कु

र्महे॥ नमो विष्णुरावे०॥ प्रारब्धाखिलकर्मबंधविनिवृत्त्यर्थं स्वयाथात्म्यनामाधिव्याधिजरादितस्करमहासर्पादिनक्रादि
भिः॥२२॥ क्षिपवस्यो विविधं नमस्तनुभृतां कर्मानुरूपं फलं दातुं दुष्कृतिनस्त्विमेसुकृतिनश्चेमेकिलेत्यन्वहं॥ लोका
नुग्रहकाम्ययापि च विविधेभ्यो नमो वो यदामर्यादं च वसु निश्चितं च नियमेनायुः क्षयेप्राणिनां॥२३॥ हंतस्य श्वन
मः कथंचिदपि सर्पेयुः क्वचित्पापिनः प्रायेणोतिहिताभिनुं तनुभृतः सर्वान् संनात्मदा॥ नीरंध्रं सविजृंभितं
जगदिदं व्याप्यः स्थितेभ्यो नमः श्रीरुद्रानुचराश्च युष्ममपरे यं संनितेभ्यो नमः॥२४॥ दैवताध्यानविनि०॥ स्कंद उवाच॥ कन्या
पुत्रसुवर्णराज्यमनपवश्यादि दृश्यात्स्त्रियः शत्रोर्नाशधनायुरुत्तमयशः पौत्राश्वगोजादिकं॥ साम्राज्यं प्रदिशं नमात्म
निभजं तं तं सहस्राक्षिपक्षोत्रघ्राणशिरोभिरावृतमसुं विश्वेश्वरं विनये॥२५॥ इति श्रीशिवरहस्ये ईशानाख्ये रुद्र
शांशे स्कंदजैगीषव्यसंवादे स्कंदप्रोक्तरुद्रभाष्ये त्रिंशोध्यायः॥३०॥ श्रीईशानाय॥ श्रीस्कंद उवाच॥ अनन्य
तया चराचरमयं विश्वं सदानंदहिर्यो भ्राविश्वभवाभवस्थितिकृते विश्वात्मको विश्वपाः॥ विश्वस्मादधिकाश्च वि
श्वपतयस्तन्निग्रहानुग्रहव्यग्रात्युग्रसुशांतविग्रहकृतो रुद्रास्तु दृशाश्रये॥ तद्रूपेणवयं न निस्तुतिशतैस्तोषो
णायं तो ध्रुवाः सुप्रीतं वरदं कृपालुमभयं संप्रार्थयामः शिवं॥१॥ द्रापे अंध०॥ विभ्राणः कवचं विभाति भगवान् यः
पापिनां दुर्गतेः प्रेत्येदं खलु दुःखदुःसहमहासंसारदारिद्र्ययोः॥ योसौ पापहतान्समस्तभुवनध्वंसात्मिका
यागतेः शश्वत्कारयिता च योखिलजगन्नाथोल्लदोपि स्वयं॥२॥ दरिद्र॰ अंशान॰ निस्वश्चागतिरेकएव निखि
लालक्ष्यस्वरूपः सदैवास्ति तस्य दरिद्रवज्जगदिदं यन्नामरूपात्मकं॥ सर्वस्थूलशरीरमेव यदिदं यस्यास्वह
यं शांतोयः संभूय च नीललोहितइति ख्यात शिरः पंचमं॥३॥ उद्धृतस्य विभेदधीनुरगजा विष्णोश्च वामं वपु
र्यो दत्वा सविलाससलोहिततनुर्निर्दोषरूपश्च यः॥ कंठे नीलमतीवलोहितनिभं चान्यत्र गात्रे शिवं धत्ते यः सत
तं दयामयतनोसत्वं प्रसन्नोधुना॥४॥ एषां पुरुषा०॥ यन्नात्पुत्रकलत्रमित्रपरिवारादीनि मातृगोमहिष्य

शि॰व॰ श्चादीन्निहतःपशूंश्चनमतान्भीतानक्रुधामाकृथाः॥ दुःखान्नैश्चकदापिमागमयतादांतिप्रसादान्नवस्वामिन्किंचिदपि
६७ ज्वरादिकमिमान्माबाधतांक्वापिच॥ ५॥ मंत्रदेवता॰॥ अध्यानंपुलहेनरुद्रस्मनिदर्शभूताभिचारादिकंद्रोहारिष्टभयापहंध
नमहासिद्धिप्रदंध्यायतां॥ आग्रल्यंसितवंबुकंडमरुकौघुर्कलसत्कुंडलंध्यायेकुंडलिपुत्रपंसुतिलकंसन्नूपुरंभै
रवं॥ ६॥ यानेरुद्रशि॰॥ त्वंगत्तुंगतुरंगसंयतमहामातंगमध्यस्फुरत्थावल्लीढरथायुतावृतलसज्जांबूनदस्यंदनं॥
अध्यास्यत्र्यवनिक्षितिनिरथिवरैर्मार्गिकसिंहासनेब्रःह्माजादिनिजाश्रितैर्जनवरःसंपूज्ययामानवः॥ ७॥ दंद्रब्रह्म
पदेचसंयमफलंसाक्षाच्चमोक्षश्रियंसालोक्यादिचतुर्विधांचभजतांनश्यगघसाम्यंफलं॥ यानेस्तुरूषस्यरुद्र
शिवदापूर्वातनूर्योगिनांसर्वेयच्छतियाचदक्षिणानतुःसंसाररुग्भेषजी॥ ८॥ प्रक्षीणाखिलकर्मभिन्नहृदयग्रंथि
प्रनष्टाखिलाज्ञानंछिन्नसमस्तसंशयमपास्तमद्वैतमस्ताऽखिलं॥ ज्ञानंप्रत्यगभिन्नचिन्नयपरब्रह्मैकलक्ष्यंपरंस
र्वान्बोधयतःसदामुनिजनानचिन्मुद्रयाभद्रया॥ ९॥ रुद्रस्यादिगुरोःसतांशिवमयीयास्याननूरूर्ध्वगानस्यज्ञा
नघनाभिकानवगुणातीताशिवास्याःसदा॥ नित्यात्मानंदरूपं धमुनिफलदाचेशानमूर्तेःसदाताभिरेतैस्तुभि
स्तनूभिरभितस्त्वासक्तनैकार्भिनः॥ १०॥ यावन्मानुषभोगलाभजनितानंदेनदीर्घायुषंत्वामाराधयितुंशिवं
सुखयनःशंभोदयांभोनिधे॥ इमारुद्रा॰॥ ज्ञानैश्वर्ययशोदयादिसगुणैःसर्वैरनंतैर्बलैःसंयुक्तःकृपयासकृत्स्न
रामतामध्येकभक्त्यासतां॥ ११॥ यःसंवर्धयितायएवनिखिलब्रह्मांडविध्वंसनाविर्भावोद्वहनैकधुर्यपरमंधत्ते
बलंकेवलं॥ कपर्दिने॰॥ योसौदिव्यकपर्दभद्धमभितस्तेवीरभद्रादयोवीराश्चाधिवसंतियस्यमहतावीर्येणधी राम॰
रोत्थना॥ १२॥ क्षीयंतेनिखिलाःखलाभगवतेरुद्रायतत्तेप्रियंनित्यंतांबिभृमोवयंमतिमियंयामानसार्चाम ६७
यी॥ सर्वोत्कृष्टफलार्थिभिर्मुनिजनैःसर्वेश्वरःसर्वथाध्यातव्यःशिवसर्वविंच्चवधुधायच्छसवानिशं॥ १३॥
स्तोतव्यःपरिकीर्तनीयइतियाविच्छेदनीयामतिस्तांलब्ध्वाशिवमेवसर्वमितरत्संत्यज्यसर्वात्मना॥ ॥विश्वं

पुष्टंग्रा०॥ ध्यायंतः सततंभजामहृन्नः देहाकारस्यप्रभोतस्यैनत्कृपयायद्यात्स्वपरिवाराणांस्वधिकंचाधुना॥१४॥ग्रा
मेस्मिन्निवसन्नशेषमपियद्यत्प्राणिजातंचनत्तुष्टंपुष्टमनातुरंचसुखितंभूयानथोयास्मके॥ मद्रानोरु०॥ स्वामि
न्रुद्रनमस्क्रियाभिरनिशंस्तोत्रैर्हविर्भिः क्षयद्वीरंत्वावयमाह्वयाम्यचिरेमास्मासुकुर्वन्कृपां॥१५॥ दारापत्यधना
दिभिस्तुसुखितानस्मान्कुरुष्वापिचब्रह्मानंदमयंचमयत्तत्पिनः श्रेयः कृपांभोनिधे॥ यद्वह्मप्रार्थनयानयानयाभिल
शंभोयमारोधुनामक्तिः सर्वफलप्रदाभवतुनः सर्वात्मनासाल्विवी॥ संसारज्वरदुःसह्यार्तिहरणस्वामिन्त्वयानु
ग्रहः पूर्णोनः किमसाध्यमस्तिभजतांतस्मात्त्वयास्मत्पिता॥१६॥ यच्छंचयोश्च०॥ स्रष्ट्वेननियोजितः सभगवा
न्लोकेश्वरः स्वस्ययत्प्राप्तानागतदुःखहेतुशमनंवांछंस्तदाज्ञाक्रमं॥ नातिक्रामतितत्तथैवचवयंतस्यामहेत्म
नुःस्मर्तासोयत्कृपयासमस्तजगतांक्लेशप्रहाणक्रमं॥१७॥ कार्त्स्न्येनोपदिदेशसर्वभुवनंस्रष्टाविधिर्मानयन्नास्त
चवयंचदुर्लभमपिप्राप्स्यामहेतत्तथा॥ ॥ कविध्याना०॥ देवंगोधनवर्धनंप्रणमतांहस्त्यश्वरक्षाकरंसांड
स्येनमहर्षिणार्चितमुमाकांतंप्रसन्नाननं॥ चंद्रोद्भासितशेखरंमुनिजनैः संस्तूयमानंप्रभुंध्यायद्रुद्रमभीष्ट
दंप्रणमतांसिंहासनाधिष्ठितं॥१८॥ मानोमहांत०॥ स्वामिन्रुद्रमदीयवंशमखिलंरक्षयुवानंशिशुंगर्भस्थंपितं
रंचमातरमिहास्माकंरुणामावधीः॥ माहिंसीश्चप्रियास्तनूर्बहुविधाश्चाध्यादिवातातपैः शस्त्रास्त्राग्निम
हाहिवृश्चिकअरिव्याघ्रोग्रसिंहादिभिः॥१९॥ ध्याना०॥ सर्वाभीष्टफलप्रदंप्रणमतांदेवंदयाशेवधिंदेवेशं
हृदिदेवरातमुनिनाध्यातंगणेशावृतं॥ तंनंदीश्वरवंदितंसुविमलंबालेंदुचूडामणिंबालादित्यसमानकां
तिमनिशंश्रीरुद्रमेवंभजे॥२०॥ मानस्तो०॥ स्वामिन्रुद्रवयाहविश्चरुपुरोडाशाज्ययागैर्मुहुः प्रीतिंतेनम
साचसंप्रतिवयंसंपादयं॥ नोधिकं॥ देवनांकरुणानिधिंपरिचोरमास्मासुकुर्वन्कृपांभक्तानामपराधिनाम
पिवयः पुत्रेषुपौत्रेषुवा॥२१॥ मानोगोघ्न०॥ गोघ्नश्चादिषुचास्मदायुनिरुष्महिंसांविभोमाकृथाः किंचास्मलु

शि·र· लवर्धनानिहरणोद्यनेवधर्मेधने॥ वलांस्तन्यपरांस्तथैारससगणान्मानोवधीः किंतुतान्॥ वर्धिष्णून्स्त्रिसञ्जीविनश्चकुरु
६५ तान्नः प्रार्थनीयंविभो॥२३॥ स्वात्मानंहृदिभावयंतमनिशंरुद्रः चिरायुर्महामार्गस्थेमसुवर्णपुत्रकनकश्रीकन्यका
दिप्रदं॥ लाभिकादशधाविभक्तवपुषंतेजोनिधिंशूलिनंचंद्रालंकृतमौलिमिंदुधवलंशांताकृतिंभावये॥२३॥ आ
रातेगोघ्नं॰॥ अश्रांतंपुरुषांश्चगांश्चनितरांतेनिघ्नतः सर्वदाप्रीतिर्हिंसनगोचरातिभयदं रूपंचदूरेस्तुनस्॥ विश्व
त्राणपरायणासजगतांमास्मासुभूतस्ययाचंडोशाग्रवक्त्रेस्तिसास्तुमयिसाप्रीतिः सदास्मास्विह॥२४॥ सुम्नम
स्मे॰॥ भक्तानांशिवदंसदाशिवशिवंरूपंचयत्तच्छिवायास्माकंपुरतः परिस्फुरत्विदंकिंचाधुनास्मान्विभोभल्या
न्नःसपरस्परानमधिकंदाक्षिण्यपूर्णंवचः क्षेमंयोगमहंवदामिभवतामित्यादराद्बूहिनः॥२५॥ इतिश्रीशिव
रहस्येईशानाख्येद्वादशांशेस्कंदेशेजैगीषव्यसंवादेस्कंदप्रोक्तरुद्रभाष्येएकत्रिंशोध्यायः॥३१॥ श्रीई
शानायनमः॥ श्रीस्कंदउवाच॥ अथाचन॰॥ श्रीरुद्रार्थवशर्मपन्थभगवन्नाप्नुष्मिवंचैहिकंकस्तादृक्
सुखवर्धनः प्रणमतांदेवत्वदन्यः प्रभो॥ ऊर्जि॰॥ आयुः श्रीसुखवर्धनंमुनिवरैराराधितंचात्रिणादेवं
तंसहिरण्यसन्निभलसन्मूर्तिंप्रसन्नाननं॥ विश्राणंज्वलनंज्वलंतममलंकुर्वाणमग्रेस्वयंदेव्यास्तांडवमा
दरात्सुरगणैरासेव्यमानंभजे॥५॥ स्तुहिश्रुतं॰॥ अस्मानेवसदाविनुंकरुणयास्विल्लार्थभूमयेयोदेवाह्नि
पुरान्पुरासमवधीद्योगींद्रहत्पंकजे॥ मार्तंडस्यचमंडलेत्रिभुवनव्याघ्रप्रभामंडलेनित्यंव्योम्निपरेत्तभूमि
षुचयः प्रादुर्भवंस्तिष्ठति॥२॥ यः सर्वः श्रुतिषुश्रुतेषुनिखिलेष्वन्यंतसारेषुचात्यंतंविश्रुतदिव्यकीर्तिगुण राम·
चारित्रोयुवायः सह॥ मृगान्नभीम॰॥ सिंहव्याघ्रमुखानिघोररूपायद्भीमाकृतिंर्द्दृहंयोवध्यानखिलानज ६५
स्रमुपसहंत्रेखलानुघनः॥३॥ यश्चान्यानभिभूतशक्तिरसदृग्क्षोभाकृतिर्मत्तुवद्धिंसत्यंतिखलांश्चयस्त
मनिशंदेवंमहेशंस्तुहि॥ इत्यात्मानमहंप्रसादविमुखंत्वांप्रेरयामिस्वयंभक्त्यास्तैमिचभक्तभीतिहराणांहेरु

रुद्रोऽभव॥ स्तोनमेऽपि सुरेश्वरौ हरिविरंचाद्यैः प्रपन्नः किलापन्नो यं जनस्त्यनन्यदाश्रयांमामपश्यतो नाथ्यकं॥ स्तोतारं सुख
यप्रसादसुमुखः किंचान्यत्किंचित्परं भूतप्रेतपिशाचराक्षसमुखा घोरा भवन्त्यैनिकाः॥५॥ अस्मत्तोऽन्यमधिक्षिपंतं तु स
ततं रक्षंतु नः सर्वदा सर्वस्माद्दुरिताद्भयाच्च भगवन्नित्यं प्रसादात्तव॥ परिशो रुद्रस्य॥ दुर्ज्ञेया विधयो विभिन्नमतिभि
र्नीताश्च भिन्नार्थतां उनलंघ्नविभिन्नविस्मृतमहाशाखा सहस्रायुताः॥६॥ वेदास्तत्रिहितास्तथाव्यकुविधास्तेऽपव्यका
लक्रिया मंत्राः स्वल्पतरं च जीवितमतो वाल्याच्च शक्तिर्मितिः॥ दुर्वृत्ते यततां सुदुःष्करमतः कर्माखिलं तद्भवत्यानः सफ
लं भवेदिति पद्माम्रज्ञं यथासंभवं॥७॥ यज्ञात्माखिलयज्ञभुक्त्वमिति हि त्वां देवयक्ष्यामहेऽप्यज्ञैरेव यया हविश्च रूपु
रोडाश्राज्यवंतो वयं॥ दंभाहंकृतिदर्पपूर्णहृदया देवान्यजंते परान्ये तेषामयमिच्छतस्तव मुहुर्हृन्तुं प्रदोषाकृतेः
॥८॥ अस्मात्परिरक्षा०॥ उग्रानिग्रहरूपिणो स्थिरतरा यादुर्मतिर्मा कृथास्तामस्मासु कदाप्यनो मतिरियं हे नित्थ
रुद्रस्यते॥ भक्तान्दूरत एव देवपरितः साक्षर्जपत्वद्यनः सर्वान्किल्बिषमुंचचापमधुनज्यां बध्यमस्मत्कृते॥९॥
मीढुस्तमेकाये०॥ सृष्ट्वा विश्वमिदं महेश्वर तदेवानुप्रविश्य प्रजाश्चाविच्छिन्नतया समस्तजगतिस्त्रं पुंस्त्रियां॥ यो
निषु॥ वीर्यं सिंचसि यत्प्रजापतिरतो मीढुष्पिता त्वं हि नस्त्वत्पुत्रानिह पौत्रकांश्च सुखयन्श्री रुद्रं शंभो प्रभो॥१०॥
देवताध्या०॥ वंशोत्थारकशक्तिभक्तिसगुणश्रीकीर्तिमत्पुत्रदं ध्यायंतं भगवंतमंतरनिशं स्वात्मानमेवाख्व
यं॥ नानाप्रस्फुरदायुधं नतमहापापौघदुःखापहं देवेशं गजचर्मसंवृततनुं श्रीकृत्तिवासं भजे॥११॥ मीढु
ष्टम०॥ नाथो यः प्रकृतेः परश्च पुरुषः सर्वांतरात्मा जपा होहि यं स्फटिकादिके प्रतिवपयः पुंभावसंभावितः
॥ पुंभावः पुरुषे विभाति जगति स्वांशप्रधाने ह्ययः स्त्रीत्वेव प्रकृतिप्रधानतनुषु त्वं वीर्यमासिंचसि॥१२॥ यो त्वं
तं शिवदस्समस्तजगतां स्वत्वं प्रसादार्थिनामस्मा वंत्व शिवो भवाद्य सुमनाः ह्या निर्नतेता वत॥ धन्यास्साम वयंच
किंचपरमे वृक्षे क्वचि दूरतो निक्षिप्यायुधजालमेतदखिलं पापात्मनां भीनरां॥१३॥ ध्यानादि०॥ सोम्यं वा ढुवि

शिव. भूषणांकरतलेविभ्रत्पिनाकंधनुःशांतंकांतमुपेत्यनागसवपुःकृत्तिवसानःशुभां॥वैराग्यंवनमध्यतःकरुणायाःस्मा
६६ गच्छपाहिसवकान्॥रक्षन्नःपुरतश्चराचरहितंश्रीरुद्रशंभोप्रभो॥१४॥ विधिरिदं॥अर्थप्राणविपत्तिसंशयभयक्लेशा
रिष्टोरुव्यथाभीतिघ्नंहृदिभावयंतमनिशंशंभुस्वरूपंस्वयं॥अध्यायांनमनीवसुंदरतनुंसन्मंगलैकालयंसानंदंच
पिनाकिनंवनचराकारंयुवानंभजे॥१५॥लौहित्येनविवर्जितंगिरिजयायस्त्वागमर्थंसदायंवेदांतगिरोवदंतिस
ततासंगोह्ययंपूरुषः॥कालुष्येणविवर्जितःशिवइतिख्यातश्चयःपूजितःसद्भिःसर्वविधाभयान्निभयहृत्संसा
रघोरापदां॥१६॥यस्त्वंखंडयितासिकांडनिवहान्चंडान्प्रकोपोभितःदंडयान्दंडयसिस्वयंचहरसिस्वैर्भीतिरो
गप्रधैः॥ज्ञानैश्वर्ययशःसुवीर्यकरुणावैराग्यभाग्यामितःश्रीभिःपूर्णधनायुधस्तुभगवन्नस्मैनमस्तेधुना
१७॥सहस्राणिसहस्रशोय॰॥यास्तेसंतुसहस्रमायुमतयःस्नाहेनयःपाणिनांशास्तःकंचिदधिक्षिपंत्यघवतां
मध्येस्मदन्यंतथा॥भक्ताएववयंभवामभवनःसर्वात्मनासागसःपाह्यस्मान्विनदंमेवतेसुमनसोनित्यंसमा
शास्महे॥१८॥तिर्यक्जंतुमहांजलस्थजननावश्याधिसिद्धिप्रदंदेवंसर्वजयप्रदंचभजतोशंभुंपुलस्त्यार्चि
तं॥सस्कंदंजगदंबयायुततनुंदेवादिरुद्रैस्तुतंसांबंकुंभविवाहमंगलविधिंस्मेराननंभावये॥१९॥सहस्रा
णिसहस्र०॥प्रत्येकंचसहस्रधाबहुसहस्राणांसहस्राणियाःसंत्युक्तंमहेनयस्तवशिवासंख्येयवाहूशिवह
॥ताःसंक्षेपणात्तसमुद्भवमहाहिंसाविधानादिकंध्वंशानोभगवन्ननुसृजस्यवसितश्चित्रंकिमत्रप्रभो॥ राम.
२०॥पुण्यापुण्यकृतःपरस्परमसंभिन्नानलस्पंशस्वशात्तलक्ष्मीकृत्यनुपूर्णपापवशात्तस्तन्निग्रहानुग्रहे॥ ६६
हर्तुंभर्तुमशेषलोकमयियोत्वंभाविकामीशतांधत्सेनःकरुणावशाच्छरणानत्रातुंसदास्मान्प्रति॥२१॥
हेतीनांतुसुखानिवानभिमुखान्यस्माकमस्मद्विपांनित्यंचाभिमुखानिदेवकुरुनःसौख्यप्रदानिप्रभो॥
दैवोपद्रवराजपीडनमहाकांतारजोरुव्यथाभीतिघ्नंहृदिनारदेनमुनिनाध्यातंसदासर्वदं॥२२॥रुद्रंसर्व

मनोज्ञभूषणाधरंसर्वायुधालंकृतंसर्वाघौघहरंचसर्वजगतामीशंमहेशंभजे॥ कल्याद्यैर्विधिनार्चितेनकृपयारुद्रैःपदे
निर्मितास्तत्तुल्याःकृतयस्तदीयकृतयस्तस्येतयस्तद्धियः॥२३॥ लोकानुग्रहनिग्रहैकनिपुणाःकर्मानुरूपंफलंयच्छं
तोनिवसंतियेचपरितःसर्गानिलाग्न्यशकाः॥ विश्वेदेवगणाःप्रसिद्धसुगुणास्तेजोमरुत्पार्थिवाकाशाद्येचमहेश्वर
स्यवक्त्रधानित्यंविभक्ताःकृतेः॥२४॥ भक्तानुग्रहतत्परास्यबहवःसानुग्रहाविग्रहायेभक्ताशिवभावनामधिगता
रुद्राःसख्याहिते॥ वैय्याघ्राजिनभोगिभूषणभृतोबालेंदुगंगाजटाजूटालंकृतमस्तकंत्रिनयनाःसांबाःसानंदी
श्वराः॥२५॥ चंडेश्वानुचराश्चदेवसदृशादेवागणाधीश्वराःसर्वेमेभजतांशिवात्मकतयासंसाररुक्त्रावकाः॥
प्रत्येकंत्रुसहस्रशीर्षबहुसहस्राणांसहस्राणियेरुद्राश्चाधिवसंत्यधीश्वरतयाभूम्यंतरिक्षेदिवि॥२६॥ येसर्वत्रभ
वाभवेनसदृशाअस्मिन्महत्यर्णवेरक्षंतिनःपरिपूर्णमेघनिवहैःपूर्णांतरिक्षेपिच॥ येहालाहलनीलकंठवपुषःशर्वाः
क्ष्मायामधःपातालेप्सुचयंनियेपिबंतिदिव्यंरुद्रासदीयाश्रिताः॥२७॥ तानेवस्तुनिभिःसदैवनतिभिश्चाराधयंतान्वयं
तेषामयसहस्रयोजनमितेदूरेस्थितानामपि॥ अर्वाक्तन्यरतःपुरश्चपरितःसज्यानिधन्वान्यलंविज्यान्यातनुमः
सुखायसततंक्षेमाययोगायच॥२८॥ यज्ञांशादिविनाशनंप्रणमतांघोराभिचारैःक्रियासंभूताघनिवारणंचमु
निनादूर्वासमाराधितं॥ बिभ्राणंत्रिशिखंप्रदीप्तवपुषंस्फूर्जज्ज्वलन्मूर्धजंभोगीन्द्राभरणंभजेभयहरंदंष्ट्राकरा
लाननं॥२९॥ अयमनुवाकचतुष्टयस्यरुद्रप्रियप्रयोगस्यउपासनाविशेषः॥ अथवारत्नतोलघायहृष्टान
वमोयंदशमःशमान्वितानां॥३०॥ श्रीस्कंदउवाच॥ अकर्तुंकर्तुंवाभुवनमखिलंयेकिलभवंत्यलंतेपादांतेपु
रहरवलंतेसुरवराः॥ कुटीरेकोटीरंत्वमहहकुलीरायक्रतवान्भवानविश्वस्येष्टंतवपुनरधीष्टंहिवरुणा
॥३१॥ श्रीकांताद्यास्त्रिदशतिलकाःश्रीमतोमर्त्यपंतेयांतेहर्षिस्यहृयन्निजजनःसेवनस्येवकिलासौ॥ अध्यारत्ना
गतिरियमयेनाथतेवामंमीषामध्यंतस्येसमुचितक्रमाकांतमंतुनमंतु॥३२॥ इतिश्रीशिवरहस्येईशानाख्ये

शि·व· ह्यवशांशे स्कंदजैगीषव्यसंवादे स्कंदप्रोक्तशतरुद्रीयभाष्ये द्वात्रिंशोऽध्यायः॥३२॥ श्रीईशानायनमः॥श्रीस्कंद उवा
६७ च॥ये वृक्षेष्विहितात्मकर्मवशतः धावृष्य्यमानेष्विमांक्ष्मामावत्य चराचरात्मकतया तिष्ठंति जीवेषु ये॥अंतर्व्याप्य
जगंति येखिलजगत्पीडाकराणां सदा हंतारोसितकंधरा बहुविधा ये नित्यनिष्कल्मषाः॥१॥ भूतानां पृथिवीजला
ग्निमरुदाकाशात्मनां येधिपाः स्थित्वा तेषु जगंति ते घ्नंति परितस्तत्कार्यभूतैः फलैः॥ नानाभूतगणाधिपाश्च
विविधज्वालोज्ज्वलन्मूर्तयो ये चावीतशिखा विचित्रविशिखा ये चाकपर्दोज्ज्वलाः॥२॥ ये अन्नेषु चतुर्विधेषु च तदा
पयेषु वान्नादन व्यापारा हि विचित्ररूपचषकाः मंत्रादिके तस्थिताः॥ पापिष्ठान्फलतोर्थतश्च विविधं पापानुरू
पं जनान्नूनाधिक्यविचित्रधातुगतिभिर्विध्यंति च व्याधिभिः॥३॥ तेषामप्यसहस्रयोजनमिते दूरे स्थितानां व
यं विज्यान्यास्तनूमोघनूंषि सततं क्षेमाय योगाय च॥ राज्ञां शान्तनपाविमरणमहासिद्धिप्रदं तादृशां भक्ताना
मखिलाघसंघहरणं श्री देवलाराधनं॥४॥ रुद्रं भीषणभोगिभूषणधरं दंष्ट्राकरालाननं विभ्राणं त्रिशिखं प्र
दीप्तवपुर्वध्याये ज्वलन्मूर्धजं॥ ये मी लौकिकवैदिकादिविधया नानाविधानां पथां सर्वेषामपि रक्षकास्तनुविधः
र्मानुरूपेण ये॥५॥ वर्णत्वादिमानिप्रसक्तविविधव्यापारशून्यास्थिरध्यानाधास्तसमस्तकल्मषमनः साक्षा
त्कृतब्रह्मणां॥ ईशान्यस्तसमस्तदुर्भरमहासंसारभारात्मनां अन्नं दातुमचवलं करुणया हस्ते दधानाः सदा
॥६॥ ये दुष्टाप्लवभिः खलैरतिबलैः संपीड्यमानान्सतः संरक्षंति हरंति कर्मवशतः स्वायुः परेषामपि॥ ये ती राम·
र्थानि चरंति तीर्थफलदास्तीर्थादिदूषः संततं हंतुं धाराकृपाणकार्मुकसकाबंतो निषंगोद्यताः॥७॥ तेषाम ६७
प्यसहस्रयोजनमिते दूरे स्थितानां वयं विज्यान्यातनुमोघनूंषि सततं क्षेमाय योगाय च॥ विद्वद्दुर्लभवर्यवंश
करसत्पुत्रप्रदं आयतां सौम्यत्वेन समस्ततीर्थफलदं श्री देवलाराधनं॥८॥ रुद्रं भीषणभोगिभूषणधरं दं
ष्ट्राकरालाननं विभ्राणं त्रिशिखं प्रदीप्तविशिखं ध्याये ज्वलन्मूर्धजं॥ एतावद्भिरिहोदिते ईशाम हांमंत्रैः प्रका

श्रीकृताःचैतावस्थिरियंतयापरिमिताभूम्यंतरिक्षादिभिः॥ ९॥ येत्रैलोक्यमतीत्यसर्वभुवनंव्याप्यास्यसर्वात्मकाभू
यांसश्चवसंतियेदशदिशोरुद्राःसमाक्रम्यच॥ तेषामेवसहस्रयोजनमितेदूरेस्थितानांवयंविज्ञाप्यानतमौध
नंविसनतंक्षेमाययोगायच॥ १०॥ विद्यापुत्रवरांगनाधिसुमहामातंगतुगाश्वदंदिव्यस्यंदनदिव्यसद्मसुमहीभो
गादिहेमार्घदं॥ रुद्रंभस्मविभूषणंफणिगणाभूषोज्ज्वलात्कंधरंचंद्रोद्भासिशिरंप्रदीप्तवपुषंध्यायेत्त्रिशूलीकरं
॥ ११॥ श्रीरुद्रेभ्यइदंनमःप्रथमतोवाचैववाक्भूनयेकर्मरूपम्यपथयेवसंतिचपृथक्भूम्यंतरिक्षादिषु॥ हत्वानंबहु
दक्षिणादिपुरतस्त्वांकार्यशौर्यादिभिःपापिष्ठानाद्वंधनादिजनितक्लेशाकुलान्कुर्वतां॥ १२॥ अस्यास्मैरधिकाधि
कैर्मुहुरकालोत्थैर्मरुद्भूर्यशौर्यैर्वापीड्यतांजगंत्याधिकृतनामन्नंचवानास्तथा॥ वर्षंतोबुसमूहवत्रिनयमध्येतज्जग
जीवंतंहिंसासाधनमासदुष्कृतकृतांक्षेमायनित्यंसतां॥ १३॥ तेभ्योवःपुरतोवयंत्विहदशप्राचीःप्रतीचीर्दक्षा
वाचीर्वीर्यदशोजलैरथवरोदीचीर्दृशीर्ध्वजलैः॥ आरोग्यायशिवायकायिककृतनमस्कारानिमकान्सर्वतःकृत्वा
चिंतितसिद्ध्यैथमनसातेभ्योनमस्कुर्महे॥ १४॥ तेरुद्राःसुखयंतुनःप्रणमतस्तेमीभजंतोवयंनिध्याप्य
स्तुतिपूर्वकैर्नतिशतैर्युष्मत्कृपाभाजनाः॥ तस्मादस्मदरिंतुपापपुरुषंहंतुंसयत्नाद्विराद्यंह्यष्मःपरिपीड्यं
न्मनुदिनंदारिद्र्यरोगादिभिः॥ १५॥ योस्मान्दूषितमेवदंतनिवहेकालात्मनांबोद्ध्यास्यत्यंतंसुखितान्हि
तान्कुरुतनःपूर्वान्सदारक्षतुः॥ कालज्ञानदमन्नदंप्रणामतांजानिस्मरत्वप्रदंसर्वाभीष्टदमात्मनात्मनिनि
जात्मानंभजंतंसदा॥ १६॥ रुद्रंदेवमनंतरुद्रवपुषंविश्वेश्वरंविश्वतश्चक्षुश्रोत्रकरांघ्रिमूर्जितमहाकाला
त्मकंचिंतये॥ श्रीस्कंदउवाच॥ कस्त्वांव्यस्तसमस्तरूपमिहसंस्तोतुंसमस्तात्मकंसामर्थ्येपिसमस्तलांन
भजतेह्यन्यस्यकावाकथा॥ जल्पंतंकिमपिस्तनंधयमिवप्रीत्यापितानाववंभक्तंमामवपेत्वमेवहिपितामा
ताचदातानघा॥ १७॥ अमामोदीदिशःकृतसुकृतवाराशिरभसाकृतस्तुत्यानत्वाव्यकृतकनमोतैःपदवैः॥

तयादेव्याद्दिव्यंपदकमलमालोकनधियंस्तुतस्कंदंनंदनकथयदहोनष्टतमसं॥१८॥श्रीईश्वरउवाच॥त्वंरुद्रार्थ
वचोभिरुग्रतपसास्तोतार्थपारीणवान्।ओंकारप्रणवप्रवीणमननःज्ञानास्वयंपावनः।नित्यंरुद्रसंस्तवमर्थंच
त्वंदिवसदारुद्रार्थयज्ञेऽपिवाध्यानेनाधिगतंमयैवकृपयानेतुप्रसन्नःपार्वती॥१९॥यस्यास्तन्यरसामृतंप्रपिब
तेविज्ञानवारांनिधेःभक्त्याख्यानिललोलचंचलशिवज्ञानोर्मयोजृंभिताः।तेषांसीकरसारसारसारसुमनः
सौरभ्यभावंगणाःदेवाभूसुरसत्तमाश्चनियतंप्राप्ताःशिवज्ञानजं॥२०॥धन्यस्त्वंजगदेकपावनकरीक्ष्मावण
यन्मेकथांजैगीषव्यमुखेषुशंभवम्मुनिब्रवंप्रसन्नात्मन॥संसारामयभेषजंममममहारुद्रस्तवंकेवलंम
त्प्रीत्यैभवतासमीरितमिदंभूयानवश्रेयसे॥२१॥एवंध्यानजपानुबोधनपदव्याख्यानवित्यावनःपूजा
संयमनप्रवीणमननोयोवाभवेदात्मनः।कामानाप्नुलभेतभूतिविलसद्गात्रस्त्रिपुंड्रोल्लसद्रुद्राक्षामलहारकं
ठवलयोभूयात्रिनेत्रप्रियः॥२२॥निष्कामोयदिरुद्रयाप्यपरमोमुक्तिंलभेत्सकधीः ध्यानार्काणविशेषमं
त्रपदविल्काम्यंसहस्रोत्तरं॥ जप्त्वाहोमदशांशतर्पणविधिंकृत्वाचशैवार्चनंभूत्वाकृच्छ्रपराकपावितत
नुस्तांस्तांलभेत्कामनां॥२३॥जप्यःपश्चिमलिंगवक्त्रमभितोध्यायन्हृदब्जेवक्रवान्बालेंदुद्युतिकोटिसन्निभसुमा
कांतंसदाशांतधीः॥पापौघंप्रशमय्यभस्मावरधरक्षमुक्तोविमुक्तंगतस्तत्रैवामरणोवसन्नपिनरोमुक्तिंलभेतांप
रां॥२४॥यस्त्वेकवारंशतरुद्रजापीपापैर्महद्भिःप्रविमुक्तएव॥द्विवारमप्येतदिहैवात्रसंपठनाऽपोतमःसंभवि
ताचिराय॥त्रिवाररुद्रंप्रजपन्नघघ्नंमय्येवलीनःसभवेद्धिपूरुषः॥२५॥भक्तोविमुक्तंसमवाप्यमोदतेयांतेभ
वेब्राजनगोत्रवासी॥नक्तंदिवंवाप्रजपन्हिभक्तोमुक्तःसदाततःसविमुक्तपापः॥२६॥सक्तोऽपिसंसारवरोरुपा
शैःभक्तसमुक्तोममसंप्रसादात्॥२६॥श्रीरुद्रमंत्रान्प्रविहायमूढःपंचाक्षरीमध्यगतान्विमुक्तैः।येतेतयःसं
ख्यातपाशबन्धोमेकैवगांसोहिवरोदुहेदघथा॥२७॥धूल्योर्ध्वपुंड्रप्रजपेन्नितंयोरुद्रंतथापावनमस्यमुक्तिः॥

नलभ्यतेतेनसमन्युदग्धोममैवकिंस्यात्स्विकृतासुतैस्त्वं॥२८॥ योभासुरभूसुरजन्मवान्स्यात्तेनैवभस्माक्षधरेणजाप्यः
॥नचार्थलोभेननचान्यमानसाजप्यःकिलयंश्रुतिरत्नकोशः॥२९॥ श्रीस्कंदउवाच॥इत्युक्तंशिववचनंनिशम्यविप्रा
स्तुष्टोहंशिपिविष्टमष्टमूर्तिं॥ जुष्टस्तत्पदकमलेहृदीष्टभृंगंसंवेश्यप्रणतिमनाःप्रतुष्टवंहि॥३०॥ देवंतंजयपदपू
र्वेनस्वभव्यस्तव्येनप्रथपतिंचदिव्यवाग्भिः॥गव्येनप्लुतनवसर्पिषायथेद्धोहव्येनप्रकटशिखोयहव्यवाहः॥
३१॥ इतिश्रीशिवरहस्येईशानाख्येद्वादशांशेस्कंदजैगीषव्यसंवादेस्कंदकृतशतरुद्रीयभाष्येत्रयस्त्रिंशोध्या
यः॥३३॥ श्रीईशानायनमः॥ श्रीस्कंदायनमः॥जैगीषव्यउवाच॥सुब्रह्मण्यवदास्माकंजयस्तोत्रंत्वयाकृतं॥
विश्वाधिकस्यदेवस्यमहादेवस्यवेधसः॥१॥ श्रवणेवधनास्सर्वेगणामुनिगणाःसुराः॥येनस्तवेनस्तुवतांसुप्री
तस्यान्महेश्वरः॥२॥ स्कंदउवाच॥जैगीषव्यवचःश्रुत्वातंनत्वास्कंदोमहेश्वरं॥कृतांजलिपुटोभूत्वाजयस्तोत्रमु
दीरयत्॥३॥ श्रीसुब्रह्मण्यउवाच॥जयकैलासनिलयजयशैलात्मजापते॥जयमंदाकिनीभूषजयचंद्रार्धका
र्चित॥४॥जयकामांगदहनजयवामांगशैलज॥जयसोमकलामौलेजयभ्रूमध्यलोचन॥५॥जयरुद्रम
हादेवजयभद्रवरासन॥जयनागेंद्रकेयूरजययोगींद्रसेवित॥६॥जयगंगाधरेशानजयभोगापवर्गद॥जय
रागादिदोषघ्नजयरामाननप्रिय॥७॥जयविश्वप्रकाशात्मन्जयविश्वविधायक॥जयविश्वाधिपस्वामिन्ज
यविश्वाधिकप्रभो॥८॥ जयदिव्यपटीरांगजयहृष्टअग्रियाश्रय॥जयशंभोदृशारूढजयकुंभोद्भवस्तुते
॥९॥जयशक्तित्रयाराध्यजयमुक्तिसुखप्रद॥जयभक्तपराधीनजयमुक्तजनेडित॥१०॥जयप्रणतमंदा
रजयप्रणवविग्रह॥जयबद्धजटाजूटजयशुभ्रवराकृते॥११॥जयपुष्करपत्राक्षजयपुष्करमूर्धज॥जय
दुष्कर्मनिर्मूलजयनिष्कल्मषव्रत॥१२॥जयविनेशवरदजयमत्तेंद्रसूदन॥जयकोट्यर्कसंकाशजयना
ट्यविशारद॥१३॥जयकल्पितविध्वंसजयकल्पांतभैरव॥जयतेजोमयाकारजयवाजीकृतागम॥१४॥

जयक्षोणीरथारूढजयवाणीपतिसारथे॥जयपर्वतकोदंडजयमौर्वीकृतोरग॥१५॥जयपावककृष्णास्त्रजयके
शववर्द्धन॥जयत्रिपुंड्रनिटिलजयत्रिपुरशासन॥१६॥जयपंचाक्षरीरूपजयपंचाननोज्वल॥जयपंचत्वरहितज
यपंचदशांबक॥१७॥जयपार्श्वस्थितस्कंदजयशाश्वतवैभव॥जयवेदशिरोवेद्यजयनादपरायण॥१८॥जय
श्रीदक्षिणामूर्तेजयश्रीदमहेश्वर॥जयापस्मारन्यस्तांघ्रेजयविस्मयविक्रम॥१९॥जयवीरासनासीनजयघो
रऽनिवारण॥जयपुस्तकहस्ताब्जजयध्वस्तजलंधर॥२०॥जयनिस्तुललावण्यजयवासुघुपूजित॥जयरुद्रा
क्षमालाढ्यजयदोर्मुज्वलत्कर॥२१॥जयक्षुद्रजनध्वंसिन्जयरुद्रगणार्चित॥जयशौरीकृतस्तोत्रजयदूरी
कृतामय॥२२॥जयकेशववंद्यांघ्रेजयदेशिकपुंगव॥जयमायादिरहितजयध्येयावनीसुर॥२३॥जयवर्जित
सर्वाशजयभर्जितमत्सर॥जयनिर्जितदेहेशजयसर्जितदिङ्मुख॥२४॥जयनिंदितकां:॥ नाशजय
नंदितसज्जन॥जयवंदितदेवौघजयनंदिमुखस्तुत॥२५॥जयबोधितविज्ञानजयसमोदिततापस॥जयभेदि
तसंसारजयस्वादिगुणात्मक॥२६॥जयांतकवधेभीमजयांधकविनाशन॥जयवाचामनोगम्यजयवा
स्येतडित॥२७॥जयसद्भस्मलिप्तांगजयसद्भक्तवत्सल॥जयदारिद्र्यमूलघ्नजयदारितदुर्जन॥२८॥जयधर्मादि
फलदजयनिर्मोघसौख्यद॥जयचंडीशवरदजयचंडपराक्रम॥२९॥जयभृंगीमनोवासजयसंगीतपंडित
॥जयवर्णितचारित्रजयकर्णारिपूजित॥जयसांबकृपासिंधोजतांबूलदांबर॥जयकंसघ्नदुर्दर्शजयहंसस्थ
दुर्लभ॥३०॥जयभीमांगशरभजयसामांगपारग॥जयवैरानशारीरजयवैराग्यसिद्धिद॥३१॥जयदावा
नलाकारजयदेवारिमर्दन॥जयकालीकृतोल्लासजयकेलीविलासग॥३२॥जयदक्षमखच्छेदजयनक्ष
त्रहारक॥जयपुष्परदध्वंसिन्जयभेषजसत्तम॥३४॥जयकाशसुमाकारजयनाशभगांबक॥जयभ्रू
ध्यानरंमस्थजयमध्यांतवर्जित॥३५॥जयपद्मभवपूर्येशाजयभ्रमविनाशन॥३६॥जयप्रधानपुरुषज

यवेधास्यनाशक॥जयमौनव्रतपरजयदीनजनावन॥३६॥जयदेवर्षिसंस्तव्यजयदेवशिखामणे॥जयनारद
गानेड्यजयनीरदशेखर॥३७॥जयदारुवनांतस्थजयचारुकलेवर॥जयभिक्षाटनरतजयपद्मभगवनजयवै
कुंठचक्रद॥जयहृत्पद्ममध्यस्थजयसत्पदसंस्थित॥४०॥जयमंदरशैलस्थजयसुंदरसंविद॥जयमेरुशिरो
वासजयहारीकृतोरगं॥४१॥जयरामकृताघघ्नजयहेमसभापते॥जयस्थाणोपशुपतेजयवीणालसत्कर॥
४२॥जयव्याघ्रजिनधरजयव्याघ्रांघ्रिसेवित॥जयसप्तर्षिविनुतजयदीर्घशिरोरुह॥४३॥जयविभ्रवपाक
रजयक्षिप्रवरप्रद॥जयकर्मादिदूरस्थजयधर्मभूतांवर॥४४॥जयसद्गुणसंदोहजयनिर्गुणवल्लभ॥जयना
मांगरहितजयभामांगदायक॥४५॥जयक्षयकराजांड्जयध्येयमहामते॥जयजन्मजराहीनजयसंन्मनसि
स्थितं॥जयवल्लिमहीनांगजयपंक्तीलिंगपूजित॥जयटंकगदाहस्तजयशंकरधूर्जटे॥४७॥जयलिंगेशशरीरघ्न
जयसंगरकोविद॥जयकांतापत्रयच्छेदजयरूपत्रयात्मकं॥४८॥जयलावण्यनिपुणजयमानवदाकृते
॥जयमंदारसंभूषजयवदारुनंदित॥४९॥जयवाणीकृतस्तोत्रजयमाणिक्यकुंडल॥जयपद्मार्चितपद
जयपद्मारुणप्रभ॥५०॥जयहंसाद्यसुखदजयसंसारतारक॥जयकल्याणपुरुषजयकल्याणसंतत॥५१
॥जयकंदलितानंदजयकुंदरदद्युते॥जयमंदस्मितमुखजयचंदनशीतल॥५२॥जयविज्ञानवाराशेजय
प्रज्ञानकल्पक॥जयत्रिकालकालीत्मनजयत्रैकालबुध्दिद॥५३॥जयसर्वभवेशानजयसर्वज्ञकामद॥
जयभर्गमहावाहोजयदुर्गतिनाशन॥५४॥जयब्रह्मण्यगिरिशजयसंहारकारण॥जयमोक्षेश्वरवर्गांगज
यसाक्षीजगत्रय॥५५॥जयनित्यादिकलितजयभव्यामरद्रुम॥जयरोगाद्रिदंभोलेजयभागीकृताच्युत॥
५६॥जयाग्रसरविध्वंसिनजयाग्रहविनाशक॥जयशांतासुरध्वंसिनजयकांतारमध्यग॥५७॥जयचंड
सुरहरजयमुंडासुरांतक॥जयेशिकासुरहरजयदृष्टिफलप्रद॥५८॥जयक्षेमकराशिवजयहेमांगदोज्व

शि॰व॰ ल॥जयदेवविराड्रूपजयकैवल्यवल्लभ॥ ५९॥जयदेहात्ममोहघ्नजयमोहनविग्रह॥जयक्षराक्षरातीतजयधो
७० र्निखंडन॥ ६०॥जयरत्नगृहावासजयरत्नमयासन॥जयदौर्भाग्यतूलाग्नेजयगर्भस्थिताखिल॥जयसंचितदो
षघ्नजयकांचनदेहग॥जयविद्रुमतुल्यांघ्रेजयकद्रुसुतार्चित॥जयचंडप्रचंडेशजयदंडधनुर्धर॥जयक्रूराभि
चारघ्नजयदारासुतान्वित॥ ६३॥जयजीमूतसुखदजयभूमूलमंदिर॥जयखंडितपाषंडजयचंडगणान्वि
तः॥ ६४॥जयप्रशांतमहिमन्जयकोशांतरस्थित॥जयसर्वमनुध्येयजयसर्ववशीकृत॥ ६५॥जयपूर्णाद
याहृष्टेजयमार्कंडरक्षक॥जयोपमन्युसुप्रीतजयस्वच्छभास्कर॥ ६६॥जयपालननिर्माणजयसर्वविधान
वित्॥जयस्वतेजसाभासजयजन्मैवैकपालक॥ ६७॥जयाग्नींदुजलादित्यजयखानिलभूमय॥जयनिःसा
मपरमजयदेवपरात्पर॥ ६८॥जयप्रकृतिमुख्यादेजयत्रिगुणकल्पक॥जयनिर्व्याजलोकघ्नजयाविद्या
विधारण॥ ६९॥जयव्याससनंदेड्यजयाचिंत्यगुणोदय॥जयशौर्यमहाधैर्यजयधर्मैककारण॥ ७०॥
जयराजससत्वाढ्यजयरुद्रतमोगुण॥जयब्रह्मादिकीटांतजयव्यामल्हदंनर॥ ७१॥जयभूजलवानू
लजयतेजःखवारिक॥जयभाषापतिश्रीशजयवर्णितवैभव॥ ७२॥जयप्रलयसंजातजयकालाग्नि
रुद्रक॥जयसंकल्पनामात्रजयनिर्मितलोकप॥ ७३॥जयश्रीशविधींद्राद्यजयसर्वनियोजक॥जयहीं
नसमाधिक्यजयबार्धक्यवर्जित॥ ७४॥जयनीलोत्पलश्यामजयवर्णविराजित॥जयकर्पूरधवलजयचारुशु राम॰
भाकृते॥ ७५॥जयध्वजांकुशाभोगजयचक्रलसत्पद॥जयसौवर्णवसनजयराजत्कटीतट॥ ७६॥जयपीनो ७०
रुजघनजयरंजितविश्वप॥जयमुक्ताफलाहारजयवज्रांगदोज्वल॥जयदीर्घचतुर्बाहोजयकंकणमंडित॥
जयाभीतिवरोपेतजयवाक्रहूयान्वित॥ जयश्लेषचमहानीलजयभूषितमंगल॥जयसुंदरसस्मेरजयवक्त्र
विराजित॥ ७९॥जयकुंडलविभ्राजनजयकुंडलिकुंडल॥जयचांपेयनासाग्रजयबिंबाधरोज्वल॥ ८०॥ज

यपावकचंद्रार्कजयलोचनभूषित॥जयकोकनदोद्भासजयकोटीरशोभित॥८१॥जयापरिमितानंदजयसुंदरविग्रह॥
जयखंडपरशुधीशजयभद्रादिसेवित॥८२॥जयानेकमहाचित्रजयशातिगराशन॥जयनिस्तुलविज्ञानजयानं
दमहोदधे॥८३॥जयाविद्यांधकारार्कजयश्रीमन्महेश्वर॥जयकूटस्थपरमजयशूलायुधाश्रितं॥८४॥जया
प्रतर्क्यविभवजयसंततमंगल॥जयनित्यमहाभागजयलिंगार्चनप्रिय॥८५॥जयज्वरादिरोगघ्नजयश्रीरु
द्रमध्यग॥जयमार्तंडमध्यस्थजयपावकमध्यग॥८६॥जयचंद्रांतनिलयजयाबिंदुकलात्मक॥जयश्रीचक्र
संस्थानजयभूचक्रपीठभूः॥जयनादकलातीतजयवादविभेदन॥जयतत्पुरुषमंत्रार्थजयाघोरास्त्रनायक
॥८८॥जयेशानविरूपाक्षजयवामादिसंघक॥जयशुक्रकृतस्तोत्रजयनिर्जरार्चित॥८९॥जयकल्पद्रुमस्था
नजयरत्नांगराजित॥जयावसाननिर्मुक्तजयबिल्वार्चनप्रिय॥९०॥जयाष्टमूर्ते सर्वात्मन्जयाचारविवर्धन॥
जयापचारशमनजयापद्बांधवप्रभो॥९१॥जयोपचारसंदोहजयपाशविमोचन॥जयतस्करमूर्धन्यजयमस्क
रिरूपग॥९२॥जयकैकालरूपात्मन्जयशंकानिदूरग॥जयशापास्त्रदमनजयमार्तंडभैरव॥९४॥जयपंचा
सनासीनजयवंचकदुर्लभ॥जयकुंभगसंस्तारजयसद्भावभावक॥९४॥जयसर्वगसर्वेशजयसर्वशुभास्प
द॥जयविप्रवाहिजनवजयप्रमथनायक॥९४॥जयसोमाग्निविशिखजयसर्वमरुत्सख॥जयकर्पूरदिव्यां
गजयसर्वांतरंगग॥९५॥जयपलितसन्तोषजयदुरीकृताघक॥जयर्जितसत्वैरिंचजयवंचितवंचक॥९६॥
जयमानसनीरिक्षजयस्वच्छजनाश्रयजयविश्रुतकालांतजयसंस्तुतपद्मज॥९७॥जयपद्मस्थानिलाकार
जयस्मरस्मरकंकण॥जयवेदैकनिलयजयदीनैकसहृद्य॥९८॥जयगंगाजटाजूटजयसंध्यामहानट॥ज
यवर्णितवैकुंठजयमानितकर्मठ॥जयचंद्रमहाचूडजयभर्गविभोमृड॥९९॥जयहृत्पद्मसारस्थजयविश्वा
तिहन्दृढ॥जयदुःखादिहरणजयभोगीविभूषण॥जयबिल्वार्जनप्रीतजयभक्तसुखामित॥जयमन्नाघसंना

शि॰ व॰ ७९ यजयदारितमन्मथ॥१॥जयमेध्यसुपाथोदजयभक्तेष्टकामद॥जयतर्पितसन्मेघजयदुर्जनसंन्नथ॥२॥जयदे
हार्धकामीनजयभक्तानुरंजन॥जयदेवाद्विजनपजयप्रीतधनाधिप॥३॥जयरंजितवैरिंचजयकेशद्विरेफभ॥जया
र्जितसुखारंभजयविविजितद्विकबल॥जयपद्माभपादाब्जजयकोट्यर्कसंनिभ॥जयनाशितदुष्कामजयपूजितसंस्तु
म॥५॥जयकांतारनिलयजयसर्वजगन्मय॥जयनागेंद्रसद्धारजयदीप्यत्कलेवर॥६॥जयनीलालकालोल
जयदीनैकवत्सल॥जयविख्यातविभवजयसुग्रीवसंस्तुत॥७॥जयसर्वज्ञसर्वेशजयगौर्येकपालिन॥जयरत्न
महाभूषजयधारितदुर्विष॥८॥जयावारितदिग्वासजयप्रख्यातसाहस॥यजयवारिदसद्वारहजयस्वीकृतविग्रह
॥९॥जयकंठमहाम्भोलजयश्रीकृष्णापिंगल॥जयसर्वसुराध्यक्षजयविश्वाक्षकक्षगण॥१०॥श्रीस्कंदउवा
च॥इत्येवंमदनारातेःस्तोत्रंयस्तुपठेन्नरः॥विमुच्यतेजन्मबंधैःप्राप्यतेभोगउत्तमः॥११॥जयस्तोत्रमिदंपुण्यंपू
ज्यंतेनकीर्तनीयकं॥शिवस्यसंनिधौजप्त्वाशिवलोकंसगच्छति॥१२॥जयजयविश्वविधानदक्षशिवजयजयका
रुण्यत्र्यक्ष॥जयजयसर्वसुरानुरागसिंधोजयजयभक्तजनातत्कैकबंधो॥१३॥जयजयपुण्यपवित्रचारु
कीर्तेजयजयभक्तकदंबदारितार्ते॥जयजयनिगमांतघोषितायजयजयसंसृतिरुग्विनाशवैद्य॥१४॥जयज
यसर्वसुरोरुसर्वनाथजयजयपर्वतराजसनाथ॥जयजयचारुशशांकशोभिमौलेजयजयपापगिरींद्रभे एम॰
दंभोले॥१५॥जयजयकालकलाविनाशशीलजयजयकुंडलकुंडलीशमाल॥जयजयभस्मविभूषणां ७१
गसंगजयजयभक्तहृदब्जपापभंग॥१६॥जयजयकृत्तिवसानविश्वभानजयजयसर्वजनावनैकतान॥ज
यजयहेमसमानदेहधामजयजयदृग्विनादिशारुकाम॥१७॥जयजयदेहवरार्धशोभिकांतजयजयभक्तज
नैकभूषितांघ्र॥जयजयदेववरेंद्रमहारिजाजजयजयभक्तहृदब्जनाशमोह्य॥जयजयपंकजमित्रचारुने
त्रजयजयपर्वतनाथजाकलत्र॥जयजयभस्मविभूषणालयोभजयजयकंठविचित्रहारशोभ॥१९॥जय

जयगांगतरंगशोभिमूर्द्धजयजयविश्रुतवेदजालघोट॥ कारुण्यामृतसारपूरितलसन्नेत्रांतसंपूरितां त्रैलोक्याव
नदीक्षितांजयवटीराजत्करांभोरुहां॥२०॥ सांबंनिर्जरदीर्घिकाप्रविलसः संफुल्लपद्मावलीधूसरकर्बुरोज्वल
जटारेखंभजेशंकरं॥ त्वय्यासज्जमनस्त्वदेकशरणः वर्तेपुनस्त्वां विनास्वामिन्पर्वतसार्वभौमतनुभूज्ज्ञानेन
ज्ञानेपरं॥२१॥ सत्यंचेदिहनप्रसीदसिततः कंप्रार्थयेयंप्रभोजानंविश्वमिदंचशर्वनिभृतांद्वैतैकदुर्भिक्षभा
क्॥ ततश्चेतश्चेतोभ्रमतिनिमिषनोपरमतेकिमुद्दृश्यंचेदप्ययतिनवशंकिंनुकरवै॥२२॥ व्यासेराज्ञममेदं
यदिगिरिजयातन्ममभवेत्प्रसादप्रसादः तवचभवितायंसुरुचिरः॥ वंदेसिंदूरवर्णंसुरसरितजटाचारुचं
द्रावतंसंफालाग्निनेत्रमीशंस्मितमुखकमलंदिव्यभूषांगरागं॥ वातोद्धन्यस्तपाणिंतरुणकुवलयंसंदधं
त्याउमायाः वृत्तोत्तुंगस्तनाग्रेनिहितकरतलंवेदवंद्यंवेदहस्तं॥१२३॥ इतिश्रीशिवरहस्येईशानाख्येक्षुद
शांशेजयस्तुतिर्नामचतुस्त्रिंशोध्यायः॥३४॥ श्रीईशानायनमः॥ श्रीस्कंदउवाच॥ माहात्म्यंशंकरस्यात्ररह
स्यंशैवमद्भुतं॥ द्वादशांशसमायुक्तमिदमेवमहार्थदं॥१॥ शिवज्ञानमहासारंधर्मकामार्थमोक्षदं॥ शिवभ
क्तिकरंपुंसांकथारत्नमहोदधिः॥२॥ आख्यानत्रयमिदंभर्गोगौर्यैदिव्यंशिवोदितं॥ मयातदेकसंस्थेनश्रुतमेत
न्महोदयं॥३॥ पुण्यंशिवरहस्याख्यामितिहासमहोदयं॥ शृण्वतांपठतांवापिसर्वपापप्रणाशनं॥४॥ शिव
प्रसादकरणंस्वर्ग्यंपुत्र्यंमहाघभित्॥ आयुरारोग्यदंपुंसांदांभवानांमहात्मनां॥५॥ भक्तिभाग्यप्रदंशंभोः स
र्वरोगविनाशनं॥ माहात्म्यंशंकरस्यैवफलंश्रवणसंभवं॥६॥ अपात्रेपात्रमपिचश्रवणोधारणोविभुः॥ काल
वाचकपूजायाः महिमापरमोदयं॥७॥ मत्तः शृणुशिवांतत्त्वंरहस्यमिदमद्भुतं॥ गौर्यैप्रोक्तंशिवेनैवमयातच्छ्रु
तमादरात्॥ संहेभिर्गणमुख्यैश्चशृणुत्वंभूसुरैः सुरैः॥८॥ श्रीईश्वरउवाच॥ निगमागमसारमेतदाद्यंसुग
मंभक्तिमतांसुगद्यपद्यं॥ वरविद्यामदमेतदाद्यहृद्यंशिवशास्त्रंकिलपापभेदशस्त्रं॥९॥ शार्दूलेरक्षशैतैपिक

शि॰व॰ कशमहानकैश्चमीमांसकायासैर्घाससमैद्यः प्रबोधइवबोवेदांतदांतनाश्रये॥ श्राव्यकाव्यशतेपिनव्ययमुमेपाप
७२ स्यकिंमुक्तिदंस्मर्घानर्घकथासुबोधरसिकायैतेनराःपामराः॥१०॥ श्रुत्वेदंनिगमांतसारसुमधुप्राव्यंकिमन्यत्फ
लंश्रीविश्वेश्वरपादपद्मभजनैः मुक्तिःपराशांभवैः॥ लभ्यादेवशिवैकसत्कमतिभिःपापौघसंहारिभिः॥ना
न्यश्राव्यमुदारांतिकोकिलगिरंश्रुत्वैवकाकस्वरं॥११॥ वनहनविधिनाद्यवंचितास्तेसुरनिर्यनरासभासुवोभराः॥परि
ह्यायरहस्यशैवसारंपरिविद्यंतिमुधान्यशास्त्रलोकाः॥१२॥ लास्यालस्यादिहास्यैर्नयतिदिनमुमेस्वस्यनान्यस्फ
लंसोमन्येदंस्मसुदारभोगभवितश्चाभस्मभस्मस्मरतः॥ दुष्टालापदुरन्नभक्षणरतः कामेनयोषेश्वरीः क्षीणायुः
किलकालयोलसुमहाघोजेयासंहारितः॥१३॥ यज्ञाभिज्ञाकिलज्ञाससततमपरिचिंतनाथ्यादिशीक्षासुदीक्षाःनि
द्रातंद्रादरिद्रक्षुभितहृतधियोद्रावसख्यासुसौख्याः॥ दुष्पूरोदरपूरणोदनसदानक्रोदनेनास्तधीःकिंवा
स्यक्षरावीक्षणायपततेनोकोवराकःपरं॥१४॥ लास्यालस्यादिहास्यप्रियसुरतरतायोबिवांभावभूषाद्ये
षामाणामेदेहासुरनरमुनयोस्वस्यवीक्षासुलीक्षाः॥ कोवावक्ता शिवरहस्यविवेकसारंतत्रत्यचित्रसुपवि
त्रतरार्थशालं॥१५॥ अवेश्वको हि भिरपिप्रमथाधिनाथमक्तस्यशुभ्रमनसःप्रसरत्यवश्यं॥ विदग्धोपिमुग्धोम
वेद्वदग्धोनदुग्धांबुधेःपानकृत्॥ श्वानजन्मा॥१६॥ कनिष्ठोपिशिष्टाद्विशिष्टोवरभक्तैः समुक्तःकिलास्या
र्थवेत्ता॥ वर्णापर्णावदस्यधारणाविधौस्वस्थागहस्थोनवैअन्यामार्जनकुक्षिपूरणगृतोवन्योसंन्यास्यपि राम॰
॥विंध्यास्यार्थविचित्रशब्दसुगतीसाहित्यरीतिः शिवोज्ञातुंधीस्थितुमप्यभक्तिहृदयाघूर्णतिनूर्णंबुधाः ७२
॥१७॥ द्विजाप्यजाभाः किमुवाहुजाताजिताक्रुधासर्वपराहृतासत्॥ वैश्यासुवश्याकिलवैश्यवर्णानिसर्गः
नःशूद्रगणादरिद्राः॥१८॥ संकीर्णजानाकिलनात्रभक्ताःकिंमंतेभसमोमलाशनकैटैः॥ किंवाद्विजोप्यंत्य
जोभूयान्नहृद्रुमेपुराणानिचयंशास्त्राणिकाव्यंजपं॥१९॥ ह्यास्यंयास्पत्तिकौशलासमिवतत्संन्नर्तेकौनांपु

राचान्यच्छैवरहस्यशांभवकथाकोप्यंशतोनोसमं॥ गिरिजाजानिकथासुधासुविविधैःपरिनिम्नंतिदुरूतरोरुवा
ग्भिःद्विजजाता अपितेहिजाग्जाताः विरजानैवभवंतिघोररूपाः॥२०॥ दुःखैसारव्याविलासासनतरशनाशैव
धर्मोज्झितायेनभस्मातुल्यदेहारतिपतिशरजायारधाराभितप्ताः॥ उस्रावद्धिधिवर्जितानरखराः स्वप्नादृष्टि
त्रारताः॥ नक्वापीश्वरचिंतकानरवकगालैवंचकाः केवलं॥२१॥ रुत्तसरत्नमौलिवल्करठिकुंभजांदेतवदृष्टार्थ
रहिताःपरेपरिपठंतिशंभोः कथां॥ कथाखिलहरीरसंशिवरहस्यरत्नाकरंविडालवकसमानराःपरिलिहंतिकिं
तस्मये॥२२॥ येमत्कथासुविमुखाः नरेहैवलोकेलखापिदुर्मुखनराः खरशोपजाताः॥ तेसन्मुखाममभ
वंतिकथासुधीराःयेमन्मुखाब्जपरिनिःसृतपानपीनाः॥२३॥ येशांकराःशिवरहस्यमधुप्रलुब्धंपेपीयतेवद
दनंपंकजजातमिदं॥ तुष्टाभवंतिगिरिजेतइहप्रकृष्टाअन्येतुदुष्कुमतयः प्रभवंतिकष्टाः॥२४॥ येनिंद
तिपरार्थबोधरहितादुस्तर्कशब्देरताःरतःपानरताःपरेतभवनेतवानराभानराः॥ विद्वांसोपिवक्रकृन्ना
अपिशिवेतेदुष्टविद्याशनाः कष्टायप्रभवंतिदुष्टजनुषःतेयानुषाःपापिनः॥२५॥ येवादरंशिवरहस्यमिदंप्रकृष्टंनिंदंति
हास्यमतयोयतयोपिमंदाः॥ तेकष्टानिसमाप्नुवंतिनियतंदुष्टाश्वविष्ठाशनाः निष्टत्यैवपरेतसंसदिदिवं रुष्टा
स्ततः कुपितः॥२६॥ शिष्टास्तएवजगतित्रिजगत्प्रतिष्टा निष्टावताद्यसुहृदेतनयाप्तमूर्तौ॥ संपूजयंत्यनिशमे
वरहस्यमेतत्संलेख्यपुस्तकवरंपरिपूजयंति॥२७॥ योवारहस्यमिदमेवशिवैकसारं ह्यारायपर्वणिदंदातिशि
वस्यभक्तः॥ मुक्तिंपरांव्रजतिचारुशशांकमौलिलिंगात्मयंव्रजतिरुद्रगणोगिरीशं॥२८॥ भस्मत्रिपुंड्राक्षधरैर्नरै
र्वैःहारैःशिवाचाररतैरकातरैः॥ श्राव्यंचभव्यैस्तिदमेवनित्यशोममेतिहासंत्वघहव्यवाहं॥२९॥ नित्तत्वरत्ने
रिदमेवदिव्यंश्राव्यंयशास्यंगिरिजेसुभव्यं॥ शांतैश्चवेदांतरतैश्चदांतैःनित्यंशिवाक्रांतपदाब्जस्वांतैः॥३०॥ च
क्षुःश्रोत्रविकासिगद्गदगलैः आनंदधाराश्रुभिःसिंचंतोगामवेक्षतखेनसुहृदयउत्फुल्लरोमांचकाः॥ येभक्ताःशिव

शि·व· भक्तिसारसरसाःतेसर्वदाशर्वहृत्कृपारावारविकारसागरभवंशीघ्रंतरंतिध्रुवं॥३१॥ श्रीस्कंदउवाच॥सदाशिवोदारवचो
७२ महेशीश्रुत्वाभितुष्टावतदागिरीशं॥मृडांतदालिंग्यशिवंशिवासारहस्यसारश्रवणेनहर्षिता॥३२॥गौर्युवाच॥ध्वां
गसंगहरंखुरंगविलसद्रूहंतुरंगागमंगंगातुंगतरंगसंगतजटाचंद्रोत्तमांगंभजे॥नेत्रीभूतपतंगरंगिनसहाफा
लस्फुलिंगोल्लसज्ज्वालालीढसुमन्मथांगजमहाभस्मांगरागांशिवं॥३३॥हेवीतिहोत्रकृतनेत्रकलत्रगात्रसत्राति
रात्रपरितोषितहृद्विपात्रान्॥पुत्रानिवाद्यपरिपाहिमुनीनशेषानत्राप्यमुत्रभगवन्नयमात्रिनेत्र॥३४॥सर्वाम
याद्यभवरोगहराद्यवैद्यआखिद्यतेपशुपतेशिवपाशिवाद्य॥वेदांतवेद्यनिगमागमगद्यपद्यसंवेद्यमामवहृदय्यद्यखि
लेष्वभेद्य॥३५॥ स्कंदउवाच॥इतिदेव्यास्तुतोदेवोविश्वेशोद्यमहेश्वरः॥मयास्तुतोनमस्कृत्यतदाविघ्नाधिपेनच॥
३६॥ कुमारउवाच॥विधिस्तेयंताभूत्नयनकृतभुक्गोधिपफलकनिधिर्वेदांतानांत्वमसिसकलाधिंजरयति॥
भवोरुव्याधीनांहरहरमहाब्धिस्मराधिः महातापोच्छेदेसिवनवमहासंनिधिचरः॥३७॥ गजाननउवाच॥
हरिंहरंतंतमुमासुकांतंवेदांतभांतंशशिकांतकांतं॥तांतेषुविश्रांतिदमंकांतकंस्मरंस्मरांतंहृदयेनितांतं॥
३८॥पापंजहामिनसहामिदुःखंलभामेवयामिहसामिललामसोमं॥सोमानमेवभगवन्नगुतिधामभूमव्योमा
नमेवशरणांतरणांयपयामि॥३९॥सूतउवाच॥ त्रिनेत्रपूजासुविहीनमानसाधर्मोज्झितास्तद्वद्दमीनसंघाः॥नि
र्वेदाविप्राइवतेपरत्रनिर्वेदभाजोत्रभवंतिसत्य॥४०॥ परीढहठहृद्वत्रेश्चिरंतरंमंडः क्रीडतेविमूढतमसःप
रोप्यतिसुमाढहृत्तापहः विमूढमतिदूरगः॥ श्रुतिशिखावासुरूढप्रभःसगूढवपुर्यादरः सकललोकमीड्या राम·
हरः॥गौरीयत्नकलिंगपूजकरताःसायंतनोनिद्रितैःमल्लीमुख्मिमनोल्लिकादिनिवहैः उत्फुल्लहल्लोत्पलैः॥गंधा ७२
धीकृतकुंदचंपककुटजैःमंदारसच्चंपकैःबिल्वामोदसुमैःदलैश्चसुमहालिंगंघिमुक्तास्मदा॥४२॥ इति
श्रीशिवरहस्येईशानाख्येद्वादशांशेशिवगौरीसंवादेइतिहासपुराणश्रवणफलकथनंनामपंचत्रिंशोध्यायः॥

३५॥ ईशानायनमः॥ श्रीस्कंद उवाच॥ अनुक्रमणिकाध्यायमंशानां कथनं द्विज॥ तत्र तत्र महेशस्य कथाख्यानमनु
त्तमं॥ १॥ माहेशांशः प्रथमतः नामतश्चात्र विश्रुतः॥ जैगीषव्यप्रसादार्थं महादेवस्य चागमः॥ २॥ गणानां देवसंघानां म
मसंवादकीर्तनं॥ कैलासवर्णनं चैव ब्रह्मणोपुरवर्णनं॥ ३॥ कैलासेश्वरपूजा च लिंगाध्यायानुकीर्तनं॥ कैलासस्य तपश्च
र्या गणाणापत्यप्रसादतः॥ तन्मो लोकवसतिः शंभोः जिज्ञासामरसन्तमे॥ ज्ञानार्थकथनं चैव आत्मलिंगस्य पूजनं॥ ५॥
प्रथमेंशे कथाख्यानमुक्तं देव्यै शिवेन हि॥ अष्टौ श्लोकसहस्राणि शिवेनोक्तोयमद्भुतः॥ ६॥ द्वितीयः शांभवो नाम्ना
कथितः श्रीशिवेन हि॥ देव्यानयः प्रसादं च मणिद्वीपोपवर्णनं॥ ७॥ चिंतामणिगृहस्यात्र वर्णनं श्रीपुरस्य च॥ तस्मा
त्कैलासगमनं कामकामेश्वरात्मकं॥ ८॥ विग्रहं देवदेवस्य हिमाचलसमागमः॥ हिमाचलालोकनं च कैलास
स्याशिवस्य तु॥ ९॥ देव्याश्च प्रेषणं तत्र मनोन्मन्याः समुद्भवः॥ दूर्वासंसो महिम्नस्य कथनं तत्प्रसादनं॥ १०॥ द्वि
तीयेंशे प्रकथितं महादेवेन तत्र हि॥ श्लोकानां त्रिसहस्रेण गौर्यै तत्र महामुने॥ ११॥ तृतीयो हरसंज्ञोत्र त्रिनेत्रः शौ
ववाक्यथ॥ केदारदर्शनं तत्र व्यासस्यापि द्विजैः सह॥ १२॥ गायत्र्यास्तपसः सिद्धिः देव्यानयनकीर्तनं॥ गणानां
प्रेसणं चैव रुद्रस्तवनकीर्तनं॥ १३॥ वेदपादस्तवश्चापि चमकप्रार्थना तथा॥ तीर्थदर्शनं तस्यापि माहात्म्यं मा
नसार्चनं॥ १४॥ श्रीशैलकीर्तनं चैव जनकस्य मुनेस्तथा॥ संवादो वैरत्ननिधेः पश्चात्तस्याः प्रकीर्तितं॥ यमलो
कस्य वृत्तांतं नर्मदागंगयोर्वरं॥ भस्मरुद्राक्षमाहात्म्यं व्रतस्य परिकीर्तनं॥ राज्ञो यमस्य पुत्रेश्च शिवार्चनकथानकं॥
१५॥ शिवदुंढिचरित्रं च भागद्वयमिदं द्विजाः॥ त्रयस्त्रिंशत्सहस्रेण श्लोकेनांशः प्रकीर्तितः॥ १६॥ चतुर्थः शिवसं
ज्ञोत्र कथितोस्ति शिवेन हि॥ नंदीभृंग्युपमन्यूनां गाणापत्यस्तुतिक्रमः॥ १७॥ चतुः सहस्रतः प्रोक्तः अंशो गौर्यै पि
नाकिना॥ पंचमो भर्गसंज्ञो हि लिंगद्वादशवर्णनं॥ १८॥ वामदेवस्तुतिश्चैव नामसाहस्रकीर्तनं॥ गंगाद्वारप्रभास
स्य पुष्करस्य प्रभावकृत॥ १९॥ षट्सहस्रेण कथितो देव्यै देवेन शंभुना॥ शांकराख्योंशकः षष्ठः व्यासस्तत्रा

दिकीर्तनं॥२०॥श्रुतिसिध्यांतराध्यांतो ज्ञानयोगप्रकाशनं॥निदाघऋभुसंवादंअविमुक्तानुवर्णनं॥२१॥पंचसाहस्रतःप्रो
क्तः शिवायैश्च शिवेनहि॥उग्रोनाम्नासप्तमांशोकथितःकाशिकादाहृतं॥२२॥सहस्रनामकथनंवैष्णवंतन्महिम्नकं
पुष्पदंतमहिम्नंचनाम्नामष्टोत्तरंशतं॥२३॥श्रीमद्दक्षिणकैलासेशोणाद्र्यचलप्रभा॥श्रीमदभ्रसभायाश्चकांचीकुं
भेश्वरस्यच॥२४॥मध्यार्जुनप्रभावस्यकीर्तनंतत्रविस्तरात्॥चतुर्दशसहस्रैश्चश्लोकानांतत्रशंकरः॥२५॥भीमाख्या
याघ्रमांशोत्रकथितःशंकरेणहि॥कद्रूसुपर्णीसंवादःकाश्यपस्यप्रसादनं॥२६॥अमृताहरणंतत्रनागभूषत्वमीशितुः
॥पातालिंगमहिमाविस्तारात्ततःप्रकीर्तिता॥२७॥चतुःसहस्रतःश्लोकैःप्रोक्तोदेवेनतत्रहि॥सदाशिवाख्यानवमःक
लिधर्मप्रबोधकः॥२८॥भूतभव्यादिभक्तानांसुचरित्रकथाश्रयः॥सहस्रसप्तश्लोकेनसोंशप्रोक्तःशिवेनहि॥२९
श ईश्वराख्योत्रदर्भःभस्मरुद्राक्षधारणात्रुद्रपंचाक्षरस्यापिशिवलिंगमहोदयः॥३०॥शिवधर्मप्रशंसाद्योशिवभ
क्तार्चनेफलं॥अष्टैश्लोकसहस्रेणकथितोस्तिपिनाकिना॥३१॥एकादशोमहादेवःप्रोक्तोयंनामतोमुने॥अभि
षेचनित्यानांतुकालपुण्येषुवैफलं॥३२॥मासिमासार्चनस्यापिसोमवाराष्टमीषुच॥प्रदोषेचचतुर्दश्यांपूजने
नफलंद्विज॥३३॥बहुपंचाशदंशमध्येशिवक्षेत्रानुकीर्तनं॥बहुसहस्रेणकथितःश्लोकेनात्रशिवेनहि॥३४॥
ईशाख्योद्वादशांशोयंसन्मार्गदर्शनाशनं॥उद्वाहश्चनथाशंभोःस्कंदोत्पत्त्यसुरार्दनं॥३५॥स्कंदस्यचशिवस्यैवंना
मसाहस्रकीर्तनं॥रुद्रस्तुतिर्वेदपादजयस्तुत्युपवर्णनं॥३६॥अविमुक्तप्रवेशश्चजैगीषव्यस्यसत्तमाः॥अत्र
क्रमेणकथनंश्रवणेमहिमास्यहि॥३७॥तथापंचसहस्रेणश्लोकेनायंशिवोदितः॥शिवस्यैवंरहस्यार्थेरत्ना राम॰
करमिदंमुने॥३८॥प्रथमःषोडशाध्यायोद्वितीयेप्रिंशतावृतः॥तृतीयःत्रिंशतंमानंद्विधाभूतोयमुत्तमः॥३९ ७४
चतुर्थःपंचविंशाच्चचत्वारिंशाच्चपंचमः॥षष्ठःपंचाशताःप्रोक्तःसप्तमःपंचविंशतिः॥४०॥शिवस्थानानुकथनो
सप्तांशाद्विशतस्तथा॥अष्टमस्त्रिंशदध्यायःबहुषष्ठिर्नवमोद्विज॥४१॥दशमंत्रिंशतंप्रोक्तंमुनिएकादशोपिहि

पंचाशद्रुद्रसंख्योत्रिविंशतीपरिकीर्तितः॥४२॥ एवमध्यायिसाहस्ररहस्यमिदमुत्तमं॥ स्कंद उवाच॥ धामाथनतपोधनाः
शिवपदाब्जबोधायनाः सनंदनसनातनाभृगुवसिष्ठबोधायनाः॥ शिवार्चकजनावनाः शिवकथाश्रवास्वादनाभवंतुम
महज्जनाः भवपदाब्जसंसेवनाः॥४३॥ भवादिष्ववरहृष्यवाहृभास्वख्यचव्ययतपः परमस्वं॥ जैगीषव्यतवकाव्य
मव्यथंहृद्गतंसुगतमेवधनाढ्यं॥४४॥ सदामहेशानकथाविधाननिधानलाभाययतेनसततमाः॥ तदैवसर्वाघ
महौघहृत्तमोनिवार्यचार्याः प्रभवंतिचोत्तमाः॥४५॥ वंध्यनकुर्याद्दिवसंतुविंध्यंत्वत्स्तुध्यानपादाब्जकथाभिरं
ध्या॥ विध्यैवबुध्याप्रसमीक्ष्यसिध्यैरध्यायमस्यप्रणयात्पठेद्वा॥४६॥ तुरंगमातंगशतांगधात्रीपवित्रयात्रेप्रद
दातिगांवसु॥ सत्रातिरात्रैर्यजतेसवेदानधीयतेतीर्थजलाप्लुतः सः॥ ततोधिकंपुण्यमवाप्यमोदतेविनाक
ष्टंसुकृतामथोक्तं॥ सदाशिवस्यास्यरहस्यसंश्रवात्कैलासमौलौनिवसन्नाशोभवेत्॥४८॥ येवापुराणानि
चयंशिवधर्मसारंशास्त्रोपमेनकुधियास्वलशाब्दतर्कैः॥ शर्वोक्तशैवसुरहस्यमिदंशिवायैनिघ्नंतिविघ्ननिकरैः
द्विजज्ञांतज्ञाले॥४९॥ नतर्कशकुशर्कराप्रतिमतर्कहृद्यांतभित्भवेत्किमुतार्कवत्शिवरहस्यरत्नांशुमान्॥ तथा
शानिपरगाधिकैः फणितशब्दमब्धैः शनैः विचारकृदिहांधहृद्भवतिहासमीमांसकः॥५०॥ सांख्याख्यानसौ
ख्यप्रदमदमहिमासौख्यहेतौनजीवयोगोरोगैकभोगोभवतिजनिमतांरागदोनोपिरागः॥५१॥ संजायेतभ
वेषुभाग्यजनुषांवैराग्यभाग्योदयस्त्वारोग्यंकिलशंकरांघ्रिभजनाच्छैवैः परंलभ्यते॥ कायंसायमुमासहा
यचरणांभोजार्चनाज्जायतेसोपायंनपुपायसाध्यगदयुक्कोथंनजानात्यमुं॥५२॥ ह्यायंपापमवश्यमव्ययमं
जंसांतंतुरीयंशिवंध्यात्वाहृत्कमलेवसेवनियतंकैलासवासादरः॥ केदारयोकर्णीकुरुप्रभाससन्नैमिषंचवद
रीमरवंदवंच॥५३॥ श्रीशैलत्र्यंबकरुद्रकोटिसंवासिनांस्याद्विमुक्तवासः॥ श्रीकंठरत्नाद्रिसुचंचुकेशाज
व्येशमध्यार्जुनकुंभघोणे॥५४॥ श्वेतेवनेब्रह्मवनेचकांच्यांश्रीकालहस्तौअरुणाचलेवा॥ वृत्थाचलेवाभ्र

शि॰व॰ सभासुगोनगेश्रुनीवनेसेतुवनेसुपुण्ये॥ ५५॥ हालास्यकेवेणुवनेचनांग्राकवेरजागांगसुनर्मदावरे॥ गोदावरीकृष्णाभ
७५ वाच्चयामुनातुंगासुतंभेरवरेचमज्जनः॥ सोसावधात्राप्यविमुक्तवासयोग्यः शिवप्रीतननुभवेत॥ तत्राविमुक्तेऽपिव
सन्नघेरकृपावशाद्वासमहोलयेत॥ ५७॥ कैलासवासोप्यविमुक्तवासिभिः प्राप्येतशंभोः किलभक्तियोगैः॥ येशं
करास्यकमलान्निगमागमांतंपुष्पोत्थसुंदरमदंरसेथवादंतेमन्वनैखलुनराः खरसूकरादियोनीषुजाराजभयाभ
वघ्रः खभाजः॥ शिवरहस्यमिदंशिववश्यकृद्यदिस॥ कृत्यठतेभुविभक्तितः॥ ५९॥ नावद्यमेषुनभवेद्भववीक्षणे
नभाविषुघोरभयजंविभवंभजेत॥ यस्तूर्ध्वपुंड्रमलिकेविदधत्रलीक॥ नालीकजासनशतंनिरयेपचेत्सः॥ ६०॥ यो
विष्णुसाम्यकधियाहृदयेभवेद्योविश्वाधिकेश्वगणयोनिपुसंभवेत्सः॥ भस्मत्रिपुंड्ररहितः शिवलिंगमात्रसंपू
जनोज्झितमतिः शृणुवनहस्यं॥ ६१॥ शैवंविनिंदनिनंदतिबुधिपूर्ववौ स्थैबुजायतिचिरंनिरयागतोपि॥ योर्थोश
याशिवरहस्यमिदंत्वशैवे संश्राव्यभव्यपदवीनसजातुविंदेत॥ ६२॥ लाः लामुखेचविरयेत्रिंमिभुक्सतिष्ठेद्दिष्टा
सुतिष्ठतिसुनिष्ठुरकशाप्रविकीर्णदेहः॥ तस्मादिदंशिवरहस्यमिदंमहार्थश्राव्यंशिवार्चकजनैः द्विजशांस्मृपात॥ ६३
भस्माक्षधारिभिरहर्निशमेतदेवपाठ्यंनशाठ्यमतिभिर्यः निभिश्चनित्यं॥ गोभूहिरण्यकनकांवरशैप्यकूप्यधान्यै
र्धनैगजतुरंगशतांगसंघे॥ ६४॥ संपूजयेद्गुरुवरैर्वरशांभवंहियोस्यार्थपाठवरंसशिवंयजेत॥ अत्यंतपरिपूर्णशां
भववरंअस्यैयसंवाचकंभावा भोज्यसुभोज्यषड्रसवरैः स्रकचंदनाद्यहर्षैः॥ ६५॥ तांबूलैर्वरगोसुदक्षिणाधनैःयो राम॰
वासहस्रशतंरत्नकंचुकावासुशांभववरान्विष्णेस संतुष्ये॥ तस्मिन्प्रसादसुमुखःप्रभवेन्महेशो॥ विघ्नेशषण्मुख ७५
समंत्रविभावयेत्तं॥ ६६॥ नित्यर्धिधान्यधनभूमिगवाश्वसंघमातंगपुत्रसुकलत्रयुतंकरोति॥ प्राज्यंराज्यमुमाप
तिः प्रदिशतिमासादमत्युज्वलंयोगंभोगमपिप्रसादसुमुखोभक्तेषुमुक्तिंतदा॥ ६७॥ मुक्तिंभुक्तिममुत्रपुत्रसहितं
पारुष्यहीनवचः आयुष्यप्रददातिपुण्यमपरंज्ञोपुण्यनेतद्यशः॥ येवैलिखंतिसुमुखामरवजातपुण्यंनैवेल

लभंतिचभवंतिमहेंद्रलेखाः॥ ६८॥ नेसन्मुखाःशिवरहस्यरहस्यसारंतेषुण्मुखोयमधियोनहिदुःखभाजः॥ योस्या
ध्यायश्रवणात्कृतसंशयस्याघौघसुश्लोकस्वसभवेत्किलश्लोकपाठी॥ ६९॥ अध्यायमात्रपठनाच्छ्रवणाद्विमुक्तः यो
स्यार्थवित्प्रतिपदंसभवेद्विमुक्तः॥ भिन्नायेहृदयेनदुःखनिकरैःसन्नाजराद्यैर्गदैर्ग्लानांपतिमीश्वरंखजगतांशीघ्रं
प्रसन्नंकुरु॥ ७०॥ कैलासाचलवासमोदसुमनःस्वार्थायकाशीव्रजदेवभूसुरसत्तमैःश्रमगणपैःयुक्तोविमुक्तिंव्र
ज॥ यत्नाभालरपंचलाभमधिकंहल्लासमंत्यन्मुभने उल्लासायमनखसंनिभकथासाम्यंनचोल्लसति॥ ७१॥
सद्यम्पुराहृदाभिधावकदाचिदीश्वरोज्जगन्नयामिसामिसोमशेखरंभजामिहामिदुःखजं॥ मुनेसुधारसानिवंचलंम
नेहिवारितःदपीहकश्मलान्निवार्यसर्वतःशिवंभजाम्यखंडमेवनं॥ ७२॥ नयामिशिवपूर्वजैर्दिवसमीशनोन्यं
सुरंनयामिशरणांनरंप्रविजहामिपापंसदा॥ भजामिशिवमन्वहंप्रनियजामियत्नैरहंप्रयामिमनसाहरंप्रनिहरा
मिचितंमुदा॥ ७३॥ स्कंदउवाच॥ भवभवदीयकथासुधाब्धिवीचीपरिमज्जनतुनापिसौख्यभाक्स्यात्॥ इतिकिल
सुरताविचारतां॥ तावनिताभोगरतापिनाकपरैविरतानिरताधुनाकथायांशरणायप्रभवेननपद्मजे॥ ७४॥
इतिश्रीशिवरहस्येईशानाख्येद्वादशांशेश्रवणादिफलकथनेस्कंदजैगीषव्यसंवादेषट्त्रिंशोध्यायः॥ ३६॥
श्रीईशानायनमः॥ सूतउवाच॥ जैगीषव्यस्ततःश्रुत्वाषण्मुखान्मुरसायनं॥ द्वादशांशसमायुक्तंयत्नोद्वैशंक
रोदितं॥ १॥ शैवंशिवरहस्याख्यइतिहासंवरंमुदा॥ शिवानंदकथासारंतारकंपापवारकं॥ २॥ पुण्यंस्वस्त्ययनं
पुंसांश्रवणात्सर्वकामदं॥ भव्यंदिव्यंयशस्यंचपुण्यमारोग्यवर्धनं॥ ३॥ सनातनमिदंधर्म्यंशिवधर्मकथाश्रयं॥
पशुपाशविमुक्त्यर्थंसर्वंबांशंकरोदितं॥ ४॥ गोप्यंस्वहृदयेश्वेगोप्यंनाभक्तेप्रतिपादयेत्॥ आयुरारोग्यदंह्येतत्
इतिहासंशिवोदितं॥ ५॥ भस्मधारिभिरेवैतत्नश्राव्यंभक्तंतृशांभवैः॥ त्रिपुंड्रधारिभिर्नित्यंतथारुद्राक्षधारिभिः
॥ ६॥ पंचाक्षरजपासक्तैःरुद्राध्यायपरैर्द्विजैः॥ शिवलिंगार्चनपरैःशांतैर्भक्तैःशिवार्थिभिः॥ ७॥ गृहस्थैर्वर्णिभिश्चै

शि॰र॰ ७६ ववनस्थैर्यनिभिस्तथा॥ भस्मरुद्राक्षधृग्भिश्च नियतैः शिवयोगिभिः॥८॥ निवृततर्षैः यतिभिः शिवस्योत्कर्षवादिभिः
॥ वेदवेदांतसारज्ञैः शांभवैर्भस्मधारिभिः॥९॥ नियमाच्छांभववराच्छ्रोतव्यं चान्यवर्णकैः॥ स्त्रियैर्वैश्यशूद्रैश्च आद्यं
शैवं रहस्यकं॥१०॥ भस्मधारिभिस्तु नियतं शिवबुध्या प्रपूज्यतं॥ शांभवं वाचकं कुर्याद्भस्मरुद्राक्षधारिणां॥११॥ नोर्ध्व
पुंड्रधरं कुर्याद्वाचकं चास्य सत्तमाः॥ तस्माच्च लानयं यांति नरकं स्वपितामहैः॥१२॥ शिवज्ञानं न जायेत तस्मात्क्षु
त्वापि शांकराः॥ किमंधानं द्योनयते कूपमध्यस्थितो न घाः॥१३॥ यथा शिवसमो देवो न भूतो न भविष्यति॥ तथा
शिवरहस्यस्य तुल्यमन्यं न विद्यते॥१४॥ विभूषणं भस्मनोत्पत्तास्ति न श्रूयते श्रुतौ॥ तथा शिवरहस्यस्य तुल्यम
न्यं न विद्यते॥१५॥ यथा त्रिपुंड्रात्परमपावनं नैव विद्यते॥ तथा शिव॥१६॥ यथा पंचाक्षरजपान्नास्ति पातक
शोधनं॥ तथा शि०॥१७॥ यथा रुद्रजपादन्यं नास्ति प्रीतिकरं विभोः॥ तथा शिव॰॥१८॥ यथा लिंगार्चनाच्छ्रेष्ठं
नास्ति वेदांतसंस्तुतं॥ तथा शिव०॥१९॥ यथोत्तमं शिवक्षेत्रमविमुक्तं श्रुतीरितं॥ तथा शि०॥२०॥ प्रदोषकाल
कालेषु यथा शर्वार्चनं वरः॥ तथा शि०॥ २१॥ व्रतानां तु यथा श्रेष्ठं शिवरात्रिः शिवार्चने॥ तथा शिव॰॥ २२॥
वारव्रते यथा श्रेष्ठं सोमवारार्चनं द्विजाः॥ तथा शिव०॥२३॥ नित्यार्चने यथा श्रेष्ठा शंभोः कालाष्टमी वरा॥ त
था शिव०॥२४॥ पर्वार्चने यथा श्रेष्ठा शंभोः नित्यं चतुर्दशी॥ तथा शिव०॥ २५॥ त्रिनेत्रप्रीतिकृल्लिंगं यथा स्या
द्रक्षमीश्वरे॥ तथा शिव॥ २६॥ पत्रेषु च यथा मुख्यं बिल्वपत्रं शिवार्चने॥ तथा शिवरहस्यस्य तुल्यमन्यं न विद्यते राम॰ ७६
॥ स्तुत्वैनं मुक्तिमाप्नोति शंभोर्नित्यं विमुक्तये॥ तथा भस्मनि रुद्राक्षे शिवलिंगार्चने द्विजाः॥२८॥ पंचाक्षरे रुद्र
जपे सोमवारार्चने तथा॥ कालाष्टम्यां चतुर्दश्यां बिल्वपत्रार्चने तथा॥ २९॥ शिवक्षेत्रनिवासेषु अविमुक्ते वि
शेषतः॥ शिवनाम्नि सदा भूयाद्भक्तिरस्यं श्रवाद्द्विजा॥ ३०॥ तथा भक्त्या विमुच्यंते सुरासुरमानवाः॥ भक्तिप्रद
मिदं पुण्यं इतिहासोत्तमं वरं॥३१॥ दिव्यं शिवरहस्याख्यं द्वादशांशाविभंडितं॥ यस्य तुल्यं न हि श्रेष्ठं पुराणं भार

तंतथा॥काव्यंरामायणंचापिसंसारवरुकः खहं॥नत्तानिभक्तिदान्यानिशंभोःशांभवसत्तमाः॥३३॥भक्तिदंकेवलंह्येतत्
शंभुनोक्तमिदंशुभं॥पुण्यंशिवरहस्याख्यंभक्तिसारमहोदयं॥३४॥भक्तैरेवसदाश्राव्यंअभक्तैर्नकदाचन॥सत्यंसत्यमि
दंसत्यमेवंगौर्यैवदत्तदा॥३५॥सावधानेनयुष्मासुभक्तेषुप्रतिपादितं॥यथामतेभसदृशोमलाशीविट्किटिःभवेत्॥
३६॥तथाशिवरहस्यस्यसाम्यमन्यंनविद्यते॥यथामेरुसंकाशोजंबुकःकिंभविष्यति॥३७॥तथाशिवरहस्यसाम्य
मन्यंनवि०॥पद्मरागसमंरत्नकाचखंडोभवेत्किम्॥तथाशिवरहस्यस्यसाम्यमन्यंनविद्यते॥३८॥यथाचंदनसं
काशःपारिभद्रोभविष्यति॥तथाशिव०॥३९॥उग्रद्युमणिसंकाशोखद्योतोद्योततेकिम्॥तथाशिव०॥४०॥किंरास
भोश्वसंकाशोभवेदूषप्रदोषभाक्॥तथाशिव०॥४१॥कनकाचलसंकाशःपांसुपिंडोभविष्यति॥तथाशिव०॥
४२॥कोकिलाकाकलीलापंकुर्यात्क्षोनिरूक्षवाक्॥तथाशिव०॥४३॥श्रुत्वायंषण्मुखाद्दिव्यंजैगीषव्यःसुरोत्तमैः
नत्वातुष्टावतंस्कंदंअष्टमूर्तितनूभवं॥४४॥विनयावनतोभूत्वाब्रह्मविष्ण्वादिभिर्गणैः॥जैगीषव्योमहायोगीब्रह्म
वाहप्रभोमुनिः॥४५॥जैगीषव्यउवाच॥सिंदूरारुणासिंधुरेद्रवदनंसांद्रांबुदानीकटंज्ञानानंदसुबृंहितांतरखलद्दंत
स्थशुंडमहः॥मौल्यांदोलनकर्णतालसुशिवध्यानोन्मिषोन्मेषणैः अंतर्वीक्ष्यगतंशिवंस्वकल्हदापध्यंनसीदे
सदा॥४६॥शिखिवाहशिखावलेखसमुखःश्रीषण्मुखस्त्वंसखाभ्रातावंधुवरस्त्वयाप्यपितमानःशंभुःपिताचा
सिमे॥ज्ञानांभोधिसुधाकरस्त्वमधुनाविज्ञानदस्त्वंगुरुःत्वत्पादार्ककरोरुदारितहृदाकाशांधकारःपरं॥४७
॥भारंमेभवसागरंसुखकरंतत्तुपुनर्गोष्पदंसंक्रंदनानंदनचंदनार्द्रगात्रत्रिनेत्रवरपुत्रनमोनमस्ते॥क्रौंचाद्रि
सूदनसनातनवंद्यपादवृंदारवंद्यपरिपाहिमुनीनदशाने अपितामहदेवशक्रवंधोगिरिमातामहदारिदैत्य
सिंधो॥४९॥प्रणवार्थपदादिवोधहेतुंविधयेत्वंप्रददासिहेनमस्ते॥शरवणभवचरणंनयेषांनहिनेषांत
रणभवोरुसागरस्य॥५०॥मरणप्रभवंभवेभवेत्तमदस्युब्रह्मण्यदयारसालसानां॥सुब्रह्मण्योब्रह्मणानांहि

शि.चे. देवोऽभवद्ब्रह्मण्यं हंति पाति हि ज्ञानतः॥ ५२॥ त्राता देवानां विजयस्य प्रदाता गांगेय स्त्वं नंदितात्मासि भक्ते॥ भवनाभवनापहा
७७ रिणा भवसिंधुगता समुद्धृता॥ सुरनेतृ विरताद्धुःखमार्गे मरतां प्रापकथामतोस्य ववैः॥ सर्पांगहारचरणां प्रपन्नाः तेषु प्र
सर्पकगणं द्वयजिशालं॥ ५३॥ संपेति पुण्यान्यघसंचयानि भीतान्यपासर्पनित तत्र चित्रं॥ यत्र त्रिनेत्रपरपंकजमित्र
भावाः पत्रैश्च विल्वतरुजैः सततं पवित्रैः॥ ५४॥ चित्रं किमत्र यज्जनानां जगतां महेशः पात्रं करोति करुणारसदृष्ट्य मुत्र॥
नन्वाह्य वैकुंठ विकुंठकामेनोत्कंठभावेन च नीलकंठं॥ ५५॥ अपावदे किं विबुधाधिसत्तमस्य मुदे विनोदेपि न चित्तसक्तिः
॥ यथाशांगलिंगार्चने च्वंतरंगं मनो न पापौघसंगाद्धि भेति॥ ५६॥ नतुं गानगंगांभसा स्नानपानैः पुनीते पयाभाव
सगौघभंगाः॥ मरिष्यंति सर्वे ग्रहिष्यंति भोगैः नरिष्यंत पूर्वाः सुपुण्यप्रशायै॥ ५७॥ परित्यज्य पथ्वीधनं वंधुवर्गं क
यातागतं तैश्च साकं न वासः॥ सहायमन्यं न विहाय यास्यतां मुमासहायो वति भक्तवर्यान्॥ ५८॥ अपायकायप्रवि
नाशकालेऽपायमेनं न्निवसाम कौशी॥ सुरा ऊचुः॥ श्रीमारमारसुकुमारकरा तशत्केशक्तिप्रियात्मजसुरासु
रजैत्रशक्ते॥ श्रूरादितारकहरामरवंदसेनाधीशाशु नाशय सदा भवदुःखजालं॥ ५९॥ मूषावैरिवहप्रियात्मज
हरहारांगआहारकृसंस्थाग्रंद्रकपोत्रहृत्तसुमहाशक्ते नमस्ते सदा॥ श्रूरापारसुदैत्यनारकमहादर्पघ्नकंदर्पतः सा
हस्राधिककांतिसुंदरमहामारारिहृत्पंकज॥ हुराधारकुमारधीरसुरतासेनापते पाहि न॥ मोदामदाचामनचा
रुवाचापंचाननोपलक्ष्य यत्षडाननं॥ ६१॥ सनातनं पुण्यरहस्यमेतद्रसायनं नः श्रवणो भवायनः॥ गणा ऊचुः
॥ कुंजरमुखानुकूलः पंचमुखस्येव स्वयं किशोरोपि॥ छिन्नतारकोऽपि सततं तारकवैरी विजेजतां देवः॥ ६२॥ यो राम.
द्धामुखः सुराणां वोढानीकस्य पातु मडपुत्रः॥ द्रोग्धा दनुजकुलेभ्यो लेग्धाव च्लीशुभाधरसुधायाः॥ ६३॥ मुनय ऊ ७७
चुः॥ स्वर्नारीजनवंद्य वेणिविलसन्मल्लीसुमप्रोल्लसन्माध्वीपूरतरंगमेदुरपदं द्वारविंदप्रभो॥ ६४॥ स्वामिन्नोन्न
तशैलवासनमतां कष्टापहं वारकशक्त स्त्वं खलु शक्तिमानिति गिरं जल्पंति लोके जनाः॥ ६५॥ शांगांगसंगाल्लि

लपापभगः नवाभिषंगोपिसुमंगलायनः॥ गणाश्चमिसंगोपिकृतः सुराणांमुनीश्वराणांवनशैलवासिनां॥ ६६॥ जै
गीषव्यतपःप्रसादनवशाद्दिदृक्षेशसंदर्शनं ईशाद्यावशतः नवांबुजमुखसुस्पंदिभंगावर्यं॥ ज्ञातानभक्तिरसान्दूंसारहृ
दयाः किंनोत्रसंप्रार्थ्यमप्यास्तेशिवशैलवासमधुनावासायकाश्यामनः॥ ६७॥ तत्रलिंगनवंदनेनगणायास्ते
वैसुरासुभूराः॥ जैगीषव्यमुताकुमारसुकुमाराभपद्माक्रांतता॥ नेमुर्हृष्टहृद्विभासितपयायातावर्विबोध
माः काशींनेशिवशैलवासरसिकाद्रष्टुंचविश्वेश्वरं॥ ६८॥ सूतउवाच॥ भवाब्धेर्द्वयाभाग्यकदर्शनेनभवांगसं
गोमनभूत्सुहर्षदः॥ तेनैवचःशैवरहस्यसंश्रवान्मुक्तास्तुपूर्यंपुनरस्तुदर्शनं॥ ६९॥ इतितानतुष्टास्यशंभुसूनुः
ननामविघ्नेश्वरमीश्वरंशिवं॥ मुदातदातत्रविमुक्तगिरौ गणैरतोमोदमवापहर्षितः॥ ७०॥ इतिप्रयातामु
नयश्चतेसुरागणाम्मुनींद्रैराभ्रणाम्यसन्मुखं॥ निदाघकालेनततापितोयथातथाचकाशांविविशुश्चमुक्तये॥
७१॥ काशींनाशितपापराशिशिवदृक्कारुण्यवारांनिधिंतांवानाशिवराः सुरार्थ्यगणावराः दृष्ट्वाग्रहृष्टांनराः
॥ वासायैवमुदंदधुसुमनसोनवाचविश्वेश्वरं॥ ७२॥ उत्तुंगलिंगविलसद्दृढफणासंगसोमोत्तमांगं॥ नेत्री
भूतपतंगमंगरहितंतंगांगभस्मप्रभाव्याकीर्णांगमतंगकृत्तिवसनंफालस्फुलिंगंशिवं॥ नटिनीजटिलालकं
महेशंनिषिलाघ्नंवटमूलचारुगेहंकरटिल्लकपट्टमेवकास्यमीशंप्रभजंतिस्तुतिभिः सुरागणाः॥ ७३॥ तत्र
त्योत्तमलिंगमंडलमिदंभूमंडलेपावनंदृष्ट्वापूज्यसुविल्वपंकजसुमैः तत्रांल्पपूर्णामपि॥ ढुंढिभैरवदंडपाणि
मपितेसंपूज्यहृष्टास्तदादेवास्तेमुनयोगणाःशरवणाज्ञातान्नयासंस्थिताः॥ ७४॥ जैगीषव्योवियोगप्रबल
गतिमतांप्राप्यगेहंगुहायां कैलासाचलवासनिश्चयमतिः तप्स्यत्स्वयंशंभुहृत्॥ दृष्ट्वातस्यगुहांतगर्भज
गुहांयास्मेवजन्मानवोलिंगंतस्यरिपूजितंचमनुजाः पश्यंतुकाश्यांचिरं॥ ७५॥ देवाश्चापिगणेश्वरामुनिव
राःसम्यक्प्रतिष्ठाप्यतेलिंगान्यत्रस्वनामकानिहृपमाविश्वेश्वरस्याज्ञया॥ तस्मातेविपुलंतपः सुविपुलंनै

शि॰र॰ केनजन्मार्जितंकैलासाचलवासदुर्घटमिदंमन्वंतनेसंयमुः॥१६॥ कैलासमौलिंप्रययुर्गीशाः स्कंदासुरायघुर्लोकम
७८ वापुराश्रयं॥ नंदाद्विजास्तेगणपावरंहरंतत्वाचगौरींचजगुः नदागमं॥ संवादमेषांचवादमेषांचनदासुदाहरः श्रु
त्वागणौः कीर्तितमेवसत्यं॥ ७७॥ कुमारवक्त्रान्मुदितश्चशंकरोस्वाज्ञावशात्तत्रगताविमुक्तं॥ ततःपुनःकालवशे
नतंमुनेर्जैगीषव्यतांनहृदयेनशंकरः॥७८॥ ध्यानेनचात्मस्थमुदारसत्वंमुनिंविमुक्तंलघुकर्त्तुमीहते॥ इतिश्री
शिवरहस्येईशानाख्येद्वादशांशेमुनिसमागमोनामसप्तत्रिंशोऽध्यायः॥३७॥ श्रीईशानायनमः॥ सूतउवाच॥
तुष्टुवुः सुरसंघास्ते स्कंदसेनापतिंतदा॥ नामभिस्तत्रमुदिताः सहस्राष्टशतैर्मुदा॥१॥ स्तुत्वाचस्तोत्रवर्येणदेवा
स्तत्रषडाननं॥ कवचेनतदादेवाः स्तोत्रवर्येणसत्तमाः॥२॥ देवाऊचुः॥ श्री॰ स्कंदनामसहस्रस्यऋषिश्चपर
मेश्वरः॥ अनुष्टुपछंदएवास्यसुब्रह्मण्याधिदेवता॥३॥ सौंबीजंशक्तिरेवास्यशक्तिःपरतरात्मना॥ ग्लौंकीलकं
सर्वकामसिध्यर्थंजपईरितः॥४॥ गांगेयंवन्हिगर्भंशरवणजनितंशक्तिहस्तंकुमारंब्रह्मण्यंस्कंददेवंगुहमचलभि
दंमंत्रतेजः स्वरूपं॥ सेनानींतारकघ्नंगणगणसहितंकार्त्तिकेयंषडास्यंसुब्रह्मण्यंमयूरध्वजरथसहितंकार्त्तिके
यंनमामि॥५॥ ॐसुब्रह्मण्यः सुरेशानः सुरारिकुलनाशनः॥ ब्रह्मण्योब्रह्मविद्ब्रह्मब्रह्मविद्यागुरुर्गुरुः॥१॥ ईशा
नगुरुरव्यक्तोव्यक्तरूपः सनातनः॥ प्रधानःपुरुषः कर्ताकर्मकार्यंचकारणं॥२॥ श्रीकुमारोअधिष्ठानंभो
क्ताभोगश्चकेवलः॥ अनादिनिधनः साक्षीनियंतानियमोयमः॥३॥ वाक्पतिर्वाक्प्रदोवाग्मीवाच्योवक्ताचवा राम॰
चकः॥ पितामहगुरुर्लोकगुरुस्तत्वार्थबोधकः॥४॥ प्रणवार्थोपदेष्टाचअजोब्रह्मासनातनः॥ वेदांतवेद्यो ७८
वेदात्मावेदादिर्वेदबोधकः॥५॥ वेदांतोवेदगुह्यश्चवेदशास्त्रप्रभेदकः सर्वविद्यात्मकः शांतः चतुःषष्टिक
लागुरुः॥६॥ मंत्रार्थोमंत्रमूर्तिश्चमंत्रतंत्रप्रवर्तकः॥ मंत्रीमंत्रोमंत्रबीजोमहामंत्रोपदेशकः॥७॥ महोत्साहो
महाशक्तिःमहाशक्तिधरःप्रभुः॥ जगत्स्रष्टाजगत्पाताजगन्मूर्तिर्जगन्मयः जगदादिरनादिश्चजगद्बीजोजग

गुरुः ॥ ज्योतिर्मयः प्रशांतात्मा सच्चिदानंदविग्रहः ॥ ९ ॥ सुखमूर्तिः सुखकरो सुखी सुखराकृतिः ॥ ज्ञाता ज्ञानं ज्ञेयरूपो ज्ञ
प्ताज्ञानफलं बुधः ॥ १० ॥ विष्णुर्जिष्णुर्ग्रसिष्णुश्च प्रभविष्णुः सहिष्णुजः ॥ नितिष्णुर्भूष्णुरजिरः वार्धिष्णुश्शांतवि
ग्रहः ॥ ११ ॥ ऋजुः सुगुल्फः सुलभो दुर्लभो लोभवर्जितः ॥ भिन्नो विज्ञानयज्ञात्मा शिवज्ञानप्रदो ग्रहः ॥ १२ ॥ हृदयारिहंका
रो भूतादिर्भूतभावितः ॥ भूतं भव्यं भवद्भूतो भूतभव्यभवस्य भुः ॥ १३ ॥ देवसेनापतिर्मेना कुमारो देवनायकः ॥ तारकारि
र्महावीरः शूरपद्मशिरोहरः ॥ १४ ॥ अनेककोटिब्रह्मांडपरिपूर्णो सुरांतकः ॥ सुरानंदकरः श्रीमान्सुराराति भयं
करः ॥ १५ ॥ असुरांतःपुराक्रांतवरभेरीनिनादकः ॥ सुरवंदीजनानंदकराशिंजानगुणध्वनिः ॥ १६ ॥ स्फुटाट्टहाससं
क्षुब्धतारकासुरमानसः ॥ महाक्रोधो महोत्साहो महाबलपराक्रमः ॥ १७ ॥ महाबुद्धिर्महाऋद्धिः महामायो महा
भुजः शूरा भीमः शत्रुहरो धीरो दांतो गुणोत्तरः ॥ १८ ॥ महाधनुर्महाबाणो महादेवप्रियात्मजः ॥ महाभुजो महा
पादो महानंदो महाद्युतिः ॥ १९ ॥ महर्द्धिर्महवीयोगो मयूरवरवाहनः ॥ मयूरबर्हातपत्रो मयूरनटनप्रियः ॥
२० ॥ महानुभावो मेयश्री रमेयात्मा महाप्रभुः ॥ सुगुणो दुर्गुणद्वेषी निर्गुणो निर्मलामलः ॥ २१ ॥ त्वंबलो विमल
ः कांतो कमलासनपूजितः ॥ कालः कमलपत्राक्षः कलिकल्मषनाशनः ॥ २२ ॥ महारथो महायोधा महाबुद्धि
प्रदोदयः महारथो महाभोगो भक्ताभीष्टफलप्रदः ॥ २३ ॥ भक्तप्रियः प्रियप्रेमो प्रेयान्प्रीतिधरः सखा ॥ गौरी
करसरोजाग्रलालनीयमुखांबुजः ॥ २४ ॥ कृत्तिकास्तन्यपानैकव्यग्रषड्वदनांबुजः ॥ चंद्रचूडांगभूभागवि
हारणविशारदः ॥ २५ ॥ चंद्रपीडकरांभोजपरिमृष्टभुजावलिः ॥ ईशाननयनानंदकंदो लावण्यसेवधिः ॥ २६
॥ लंबोदरसहक्रीडालंपटः शरसंभवः ॥ अमरीनयनालोकचकोरीपूर्णचंद्रमाः ॥ २७ ॥ सर्वांगसुंदरः श्रीशः श्री
करः श्रीप्रदः शिवः ॥ वाह्नीसेनापतिर्वीरो वक्ताचस्पतिर्वरः ॥ २८ ॥ चंद्रचूडशिखीपिंछशेखरो मकुटोज्ज्वलः
॥ गुडाकेशः सुवृत्तोरु शिरोमंदारशेखरः ॥ २९ ॥ बिंबाधरः कुंदरदोजपाशोणाग्रतालुकः ॥ मङ्गमध्यमगांधार

धारत्रंत्रीसुमधुरस्वरः॥ ३०॥ मेघगंभीरनिर्घोषः प्रियवाक्प्रीतनिर्जरः॥ स्मितवक्त्रोमलाभासः चारुगंभीरवीक्षणः॥
कर्णांतदीर्घनयनः कर्णभूषणभूषितः॥ सुकुंडलः चारुगंडः कंबुग्रीवो महाकृतुः॥ पीनांगो गूढजत्रुश्च पीनवृत्तभु
जावलिः॥ ३२॥ रत्नांगो रत्नकेयूरकंकणो रत्नभूषितः॥ उपाकिंशाकलसङ्घामप्रकोष्ठवलयोज्वलः॥ ३३॥ रेखांकु
शध्वजछत्रपाशिपद्ममहायुधः॥ सुरलोकाभयोद्युंतवालारुणकरांतरः॥ ३४॥ अंगुलीयकरत्नांशुद्विगुणो
द्युंतरवांकुरः॥ पीनवक्षा महाहारो नवरत्नविभूषितः॥ ३५॥ हिरण्यगर्भो हेमांगो हिरण्यकवचो हरः॥ हिरण्म
यशिरस्त्राणो हिरण्याक्षो हिरण्यदः॥ हिरण्यनाभिस्त्रिवलीललितोदरसुंदरः॥ सुवर्णसूत्रविलसद्विशंकटकटी
तटः॥ पीतांबरधरो मुक्तामेखलीवृतमध्यमः॥ पीवरालोमशजंघो युत्सुजानुः सुप्रगुल्फकः॥ ३९॥ शंखचक्राब्ज
कुलिशध्वजरेखापदांबुजः॥ नवरत्नोज्वलद्भासकटिकोंगुलिभूषणः॥ ३७॥ सुरेंद्रमकुटप्रोद्यन्मणिरंजित
पादुकः॥ पूज्यांघ्रियारुनखरोसुरालितनपादुकः॥ ४०॥ पार्वतीपाणिकमलपरिमृष्टपदांबुजः॥ मत्तमातं
गगमनो मानी मान्यगुणाकरः॥ ४१॥ क्रौंचदारणवक्षोजकिरात्मणविभागकृत्॥ सुगमो दुर्गमो दुर्गो दुरा
रोहो रिपुः सहः॥ ४२॥ सुभगः सुमुखः सूर्यः सूर्यमंडलमध्यगः॥ स्वकिंकरोपसंसृष्टसृष्टिसंरक्षिताखिलः
॥ ४३॥ जगत्स्रष्टा जगद्भर्ता जगत्संहारकारकः॥ स्थावरो जंगमो जेता विजयो विजयप्रदः॥ ४४॥ जय
शीलो जितारातिः जालमानो जितासुरः॥ जितकामो जितक्रोधो जितमोहमदोग्रुगः॥ ४५॥ कामदः काम
भृत्कामी कामिकादिकृतागमः॥ ज्ञानकल्पः कलिध्वंसी कल्हारकुसुमप्रियः॥ ४६॥ रामो रमयिता रम्यो र
मणीजनवल्लभः॥ रसज्ञो रसमूर्तिश्च रसो नवरसात्मकः॥ ४७॥ रसाम्नाय रसिकात्मा चरासक्तो डापरो रतिः
॥ कोटिसूर्यप्रतीकाशः सोमसूर्याग्निलोचनः॥ ४८॥ कलाभिज्ञः कलावित्स कालप्रभुः॥ बिंदुनादकला
मूर्तिः कालातीतः क्षराक्षरः॥ ४९॥ मात्रास्वराकृतिश्चैको ह्येकमात्रो द्विमात्रकः॥ त्रिमात्रकश्चतुर्मात्रा

वृत्तसंख्यादिमात्रकः॥५०॥व्यंजनात्माविसृष्टात्मायुक्तोमुक्तिप्रदोगुरुः॥विसर्जनीयोनुस्वारःसर्ववर्णतनुर्महान्॥५१॥अ
कारात्माउकारात्मामकारात्मात्रिवर्णकः॥ॐकारश्चवषट्कारःस्वाहाकारःस्वधाकृतिः॥५२॥आहुतिर्भवनोहव्यंहोता
ध्वर्युर्महाहविः॥ब्रह्मोद्गातासदस्यार्थंबर्हिरिध्मःसमिच्चरुः॥५३॥गव्यःपशुःपुरोडाशश्चामिक्षावाजिवाजिनः॥पव
नःपावनःपूतःपवमानःपराकृतिः॥५४॥पवित्रःपरिधिःपूर्णपात्रःपूतिरद्ध्यंधनः॥विशोधनःपशुपतिःपशुपाशविमो
चनः॥५५॥पाकयज्ञोमहायज्ञोयज्ञपतिर्यजुः॥यज्ञांगोयज्ञगम्यश्चयज्वायज्ञफलप्रदः॥५६॥यज्ञांगभूर्यज्ञभूमिः
यज्ञःश्रीयज्ञवाहनः॥यज्ञश्चयज्ञविध्वंसीयज्ञेयोयज्ञरक्षकः॥सहस्रबाहुर्विश्वात्मासहस्राक्षःसहस्रपात्॥सहस्रव
क्त्रोनित्यःसहस्रात्माविराट्स्वराट्॥५८॥सहस्रशीर्षोविश्वश्चतेजःप्राज्ञोह्यग्राह्यआत्मवान्॥अणुर्बृहत्कृशःस्थूलःदीर्घोह्र
स्वोलघुर्गुरुः॥५९॥सूक्ष्मःसूक्ष्मतरोनंतःविश्वरूपोनिरंजनः॥अमृतेशोमृतोहारोमृतदोनामृतांगवान्॥६०॥अ
ह्नोरूपस्त्रियामाचसंध्यारूपोदिनात्मकः॥मुहूर्तोघटिकारूपःयमरूपोयमात्मकः॥६१॥पूर्वाह्णरूपोमध्याह्नरू
पःसायान्हरूपकः॥अपराह्णोतिनिपुणःसवनात्माप्रजागरः॥६२॥वेद्योवेदकर्तावेद्योवेददृष्टाविदांवरः॥विनयः
सत्यसंधश्चविद्वान्विद्वज्जनप्रियः॥६३॥विश्वगोप्ताविश्वभोक्ताविश्वकृद्विश्वभेषजः॥विश्वंभरोविश्वपतिःविश्वे
शोविश्वतोमुखः॥६४॥विश्वसाक्षीविश्वहंतावीरोविश्वंभराधिपः॥वरिवाक्र्वीरहंतावीराग्र्योवीरसैनिकः॥
६५॥वीरवादप्रियःशूरःशूरसेनःसुराधिपः॥शूरपद्मासुरद्वेषीतारकासुरभंजनः॥६६॥ताराधिपस्ताराहारः
शूरहंतासुरार्चितः॥शरवान्शरसंभूतिःशक्तिःशरवणोद्भवः॥६७॥शांभवःशांकरःशंभुःसाधुःसाधुजनप्रियः
॥सारंगःसागरःसर्वःशर्वःशर्वप्रियस्वराट्॥६८॥गंगाधरोतिगंभीरःगंभीरहृदयोनघः॥अमोघघोषोविक्रम्यो
शक्तिभृच्छक्रपूजितः॥६९॥चक्रपाणिश्चक्रपतिःचक्रवालांतभूपतिः॥सार्वभौमःसुरपतिःसर्वलोकाभिरक्षितः
॥७०॥विद्रूपःसत्यसंकल्पःसत्यःसत्यवतांवरः॥सत्यप्रियःसत्यगतिःसत्यलोकजनप्रियः॥७१॥भूतोभव्योभूत

शि॰व॰ नाथोभूतभव्यभवत्प्रभुः॥भूतादिर्भूतमध्यस्थोभूतविद्रवकारकः॥७२॥भूतप्रतिष्ठाकर्त्ताद्योभूताधिष्ठानकोव्ययः
८० वीजोनादिर्गुणनिधिःतेजोराशिरकल्मषः॥७३॥कल्मषघ्नःकलिध्वंसीकलेवररविग्रहः॥कल्याणमूर्तिःकामात्मा
कामक्रोधविवर्जितः॥७४॥गोप्तामोपयितागुप्तिःगुणातीतोगुणाश्रयः॥सत्वमूर्तीरजोमूर्तिःतमोमूर्तिश्चिदात्म
कः॥७५॥देवसेनापतिर्भीमामहिमामहिमाकरः॥प्रकाररूपःपापघ्नःपवनःपावनोनलः॥७६॥कैलासनिलयः
कांतःकनकाचलसन्निभः॥विद्रुमोवेदभूतिश्चआकृतिःकृतिरक्षकः॥७७॥उपेंद्रइंद्रवंद्यांघ्रिःउरुजंघउरुक्रमः॥वि
नोविजयक्रांतोविजयीविनयप्रियः॥७८॥अविनीतजनध्वंसीसर्वापद्गणवर्जितः॥शेषाचलैकनिलयःवल्लीवांछित
विभ्रमः॥७९॥शांभवःशंभुतनयःशंकरांकविभूषणः॥स्वयंभूःस्ववशःस्वस्थःपुष्करःपुरभिद्भवः॥८०॥मनुर्मा
नवगोप्तासःस्थविरःस्थविरोयुवा॥बालःशिशुर्नित्ययुवानित्यकौमारवान्महान्॥८१॥अग्राह्यरूपोग्राह्यश्च
सुग्राह्यःसुंदराकृतिः॥प्रमर्दनोग्रभूतश्रीलोहिताक्षोरिमर्दनः॥८२॥त्रिधामात्रिककुपभव्यःत्रिलोकनिलयोलयः
॥शर्मदःशर्मवान्शर्माशरण्यःशरणालयः॥८३॥स्थाणुस्थिरतरस्थेयःस्थिरश्रीस्थिरविक्रमः॥स्थिरप्रतिज्ञः
स्थिरधीःविश्वरेताःप्रजोद्भवः॥८४॥अत्ययःप्रत्ययःश्रेष्ठःसर्वज्ञःसर्वदर्शनः॥सर्वयोगीश्वरसिद्धःशिवयोगः
शिवप्रियः॥८५॥मनस्वीमानदोमान्योजैगीषव्यगुरुर्बुधः॥क्षमात्मासमदर्शीचसंमतःसमदर्शनः॥भस्मत्रिपुं
ड्रवद्भालःरुद्राक्षवरकंकणः॥शिवलिंगार्चनप्रीतःषडक्षरजपादरः॥८७॥शुचिःशुचिमनाःशुत्यःशुचिकी
र्तिश्शुचिश्रवाः॥रौद्रकर्मामहाकर्मारुद्रांशोरुद्रसंभवः॥८८॥अनेकमूर्धाविश्वात्मानेकवाहुररिंदमः॥वीरबाहुग राम॰
णाध्यक्षोविष्वक्सेनोविनोदनः॥८९॥सर्वगःसर्वदःसर्वःसर्ववेदांतगोचरः॥कविःपुराणशास्त्राचसुब्रह्म ८०
ण्यालयोअर्हिः॥९०॥भ्राजिष्णुर्विष्णुर्विनुतःकृष्णकेशःकिशोरगः॥भोजनंभाजनंभोक्ताविश्वभोक्ताविशां
पतिः॥९१॥विश्वयोनिर्विशालाक्षोविरागोवीरसेवितः॥पुण्यःपुरुयशाःपूज्यःपुरुकीर्तिःपुनर्वसुः॥१००॥सुरें

दुःसर्वलोकेंदुःमोगंद्रोपेंद्रवंदितः॥विश्ववेद्योविश्वपतिःविश्वभृद्विश्वमेवजः॥१॥ मधुर्मधुरसंगीतोमाधवः शुचिरुज्व
लः॥ शुक्लः शुभ्रमुखः शुक्रः शोकहर्ताश्चविस्मितः॥२॥ महेष्वासोविगृष्टश्चमहाभर्तामहीपतिः॥ मरीचिर्मदनोमा
यीमानंगगतिरद्भुतः॥३॥ हंसः सुपर्णःसुमनाःभुजगेशोभुजावलिः॥ पद्मनाभिःपशुपतिःपारगःपरपारगः॥
४॥पंडितःपरवीरघ्नोस्कंदःसेनापतिर्महान्॥अमर्षणोदुष्टशास्ताद्दुर्धर्षोदुर्धरः॥५॥ विश्वात्मासुविधेयात्मा
विश्वप्रख्यातविक्रमः॥सन्मार्गदर्शकोमार्गःरक्षकोमार्गरक्षकः॥६॥अनिरुद्धोनिरुद्धश्रीःआदित्योदैत्यमर्दनः
॥अनिमेषोनिमेषश्चत्रिजगद्गुरगोगुरी॥७॥ संवृतात्मानिवृतात्मासर्वात्माआत्मविक्रमः॥ अर्चिष्मानच्युतप्री
तः पाराभत्पावकोमरुत्॥८॥ सोमसौम्यःसोमनुतः सोमपुत्रसोमभूषणः॥ सर्वसामप्रियःसामः सर्वयज्ञःस्तु
तोगुहः॥९॥ उपशांतिरुमासक्तः उत्फुल्लमुखपंकजः॥अमर्त्युरसुरारातिः मृत्युमृत्युपयोजितः॥१०॥ मंदारकुसु
मापीडोमदनांतकवल्लभः॥माल्यवान्मदनाकारोमालतीकुसुमप्रियः॥११॥ सुप्रसादः सुराध्यक्षः सुमुखः सुमहायशाः
॥वृषपर्वविरूपाक्षोवृषसेनोवृषोदरः॥१२॥ मुक्तोमुक्तगतिर्मोक्षामुकुंदोमुद्गरोमुनिः॥ श्रुतवान्श्रुतिशास्त्रात्माश्रुति
गम्यश्रुतिस्तुतः॥ वर्धमानोवनरतिःवानप्रस्थनिषेवितः॥ वाग्मिदेवावदूकात्मावासुदेवोवरप्रदः॥१४॥ महेश्वरोम
यूरस्थोशक्तिहस्तःत्रिशूलधृक्॥ओजस्तेजश्चतेजस्वीप्रतापः सुप्रतापवान्॥१५॥ ऋद्धिसमृद्धिःसंसिद्धिः सुसि
द्धिः सिद्धसेवितः॥अमृतांशुश्चामृतपोअमृतश्चामृतप्रदः॥१६॥ चंद्रमाश्चंद्रवदनः चंद्रकश्चंद्रशीतलः॥ मतिमान्नी
तिमान्नीतिः कीर्तिमान्कीर्तिवर्धनः॥१७॥ औषधश्चौषधीनाथोप्रदीपोभवमोचनः॥ भास्करोभास्वरतरोभानुःपा
शविमोचनः॥१८॥ चतुर्युगव्यवस्थायेतायुगधर्मप्रवर्तकः॥ अयुतोमिथुनोयोगोयोगज्ञोयोगपारगः॥१९॥ महाश
नोवृत्तामहाघोरापराक्रमः॥ युगांतकृद्युगावर्तोदृश्यादृश्यस्वरूपवान्॥२०॥ सहस्रजित्सहस्रात्मासहस्रायुध
मंडितः॥अनंतेश्वरसंहर्तासुप्रतिष्ठः सुखाकरः॥ २१॥ अक्रोधःक्रोधहंताचशत्रुक्रोधविवर्धनः॥ विश्वमूर्तिर्विश्वबा

शि॰व॰ क्षुःविश्वदृक्विश्वतोमुखः॥२२॥विश्वयोविश्वनेताचद्यावाभूम्योविवर्धनः॥अपांनिधिरकर्त्ताचअन्नादोविनयोज्ज्वलः
८१ ॥२३॥अंभोजमातृरुग्जीवःप्राणदःप्राणवर्धनः॥स्कंदःस्कंदधरोधुर्योधैर्योधर्मविवर्धनः॥२४॥जितारातिर्धनाध्यक्षो
वैद्यनाथोनसत्यकः॥देवदेवोबृहद्भानुःस्वभानुःपद्मवल्लभः॥अकुलःकुलनेताचकुलद्रष्टाकुलेश्वरः॥कुलाचलसु
तासूनुःअसुरहृच्चासुरार्दनः॥२६॥निधिर्निधिपतिःपद्मशंखौनिधिपतिःपतिःशतानंदःशतापतिःशताग्रश्चशतायु
धः॥२७॥पद्मासनःपद्मनेत्रःपद्मांघ्रिःपद्मसंस्थितः॥कारणात्माचकार्यात्माकामात्माकामवर्धनः॥२८॥त्रिशरी
रःशरीरीचशरीरीविश्वलोकेश्वरेश्वरः॥सुबुद्धिस्थोभीमसेनोमहासेनःतुरीयकः॥२९॥स्थापनःस्वप्ननिलयोविश्व
मूर्तिर्विरोचनः॥वीरायुधोवीरवेषोवीरायुधकरोज्ज्वलः॥३०॥सर्वलक्षणसंपन्नोलक्ष्मीवान्सर्वलक्षणः॥समयज्ञो
यज्ञसेनोसमाधिःसामवल्लभः॥३१॥अमलोमाल्यसुप्रीतोवल्लभोभल्लवोवलः॥अर्हन्नर्हन्नुमान्हेतुःहेतिधृक्
हृतशाश्वयः॥३२॥विस्मरोरागहितोरक्तोविरक्तोविज्ञनप्रियः॥महीधरोमातरिश्वामंगल्योमकरालयः॥३३॥मध्यः
शतादिरक्षोभ्योरक्षोहारणविक्रमः॥गृहेशगृहाश्रयोगोमाग्रहेगुणवर्धनः॥३४॥निरुद्योगोमहोद्योगोनिरीहोनिरा
योमधुः॥महावेगोमहाक्रोधोमहाप्राणोमहेश्वरः॥३५॥अमनाश्चमनाहारोमितभाष्योमितार्थवित्॥अक्षोभ्य
क्षोभकृत्क्षेमोक्षेमवान्क्षेमनाशनः॥रुद्रोरुद्रप्रियोमत्तोमतकेलिवल्लोपरः॥धर्माधर्मविदांश्रेष्ठोवैकुंठोवासव
प्रियः॥३७॥परधीरपराक्रांतोपरितुष्टःपरासुहृत्॥रंजनोरणमोरुष्टोरमणोरात्रिवधनः॥३८॥विराजोविक्रमो राम॰
विद्वान्वीरभद्रप्रियोक्रतुः॥विनायकानुजोधातानंदीप्रियसखोवपुः॥३९॥सर्वशक्तिमतांश्रेष्ठोसर्वदैत्यभ ८१
यंकरः॥शत्रुघ्नःसर्वलोकेशःशत्रुभिःश्लाघ्यपौरुषः॥४०॥शिशिरोवर्षकोग्रीष्मोवसंतोमाधवोमधुः॥व
संतकेलिनिरतोननकेलिविशारदः॥४१॥पुष्पधलीपरिच्छिन्नोवनपल्लवशेखरः॥जलकेलीपरिरतोजन्तु
कंद्योपलालितः॥गांगेयोगीतकुशलःगंगापारविहारणः॥गंगाधरोगणपतिःगणायुधसमावृतः॥विश्व

मोविक्रमोधूर्तोविश्वभुक्विश्वदृग्विराः॥विश्वगोविश्रुतपरोविश्वरक्षणतत्परः॥५४॥विनतानंदकारीचपार्वतीप्राणनंद
नः॥विशाखःषण्मुखःशाखाकार्त्तिकेयोवरप्रदः॥५५॥एवंसहस्रनाम्नैवसंपूज्यसुरसत्तमाः॥पुनःशताष्टनाम्नैवतुष्टु
वुर्मुनयस्तदा॥५६॥मुनयऊचुः॥द्विषड्भुजंषण्मुखमंबिकासुतंकुमारमादित्यसमानतेजसं॥वंदेमयूरासनमग्निसं
भवंसेनानिमीशंसकलेष्टभीष्टदं॥१॥स्कंदोगुहःषण्मुखश्चफालनेत्रसुतःप्रभुः॥पिंगलःकृत्तिकासूनुःशिखि
वाहोद्विषड्भुजः॥२॥द्विषण्णेत्रःकुमारश्चपिशिताशनभंजनः॥तारकासुरसंहर्तारक्षोबलनिषूदनः॥३॥मत्तः
प्रमत्तउन्मत्तःसुरसैन्यस्यरक्षकः॥देवसेनापतिःप्राज्ञःकृपालुर्भक्तवत्सलः॥४॥उमासुतोमहासेनःकुमारःक्रौंचदा
रणः॥सेनानिरग्निजन्माचविशाखःशंकरात्मकः॥५॥शिवस्वामीगणस्वामीसर्वस्वामीसनातनः॥अनंत
शक्तिरक्षोभ्योपार्वतीप्रियनंदनः॥६॥गंगासुतःशरोद्भूतःआहूतःपावकात्मजः॥जृंभप्रजृंभउज्जृंभःकमलासन
संस्तुतः॥७॥एकवर्णोद्विवर्णश्चत्रिवर्णःसुमनोहरः॥चातुर्वर्णःपंचवर्गःप्रजापतिरहःपतिः॥८॥अग्निगर्भःशमी
गर्भःविश्वरेतःसुरारिहा॥हरिद्वर्णःशुभकरः॥पटुमान्वटुवेषधृक्॥९॥पूषागभस्तिर्गगनोचंद्रवर्णःकला
धरः॥मायाधरोमहामायोकैलासावसथःशिखी॥१०॥विश्वयोनिरमेयात्मातेजोनिधिरनामयः॥परमेष्ठी
परंब्रह्मवेदगर्भोविराट्सुतः॥११॥पुलिंदकन्याभर्ताचमहासारस्वतप्रदः॥आश्रिताखिलदाताचचोरघोररोग
नाशनः॥१२॥अनंतशक्तिरानंदःशिखंडीकृतकेतनः॥डंभःपरमडंभश्चमहाडंभोवृषाकपिः॥१३॥कार
णःपात्रदेहश्चकारणातीतविग्रहः॥अहिरूपोमृतवपुःप्राणायामपरायणः॥१४॥विरुद्धहंतावीरघ्नोरक्त
श्यामललोचनः॥वक्रवर्णोगणपतिःस्वभक्ताभीष्टदायकः॥१५॥सर्वेश्वरोलोकगुरुःअसुरानीकनाशनः॥सु
ब्रह्मण्योगुहःस्कंदोब्रह्मण्योब्राह्मणप्रियः॥१६॥एवमष्टोत्तरशतनामभिःस्तौतियोनरः॥तस्याभीष्टानिसर्वा
णिप्रयच्छतिगुहोमुहुः॥१७॥गणेश्वराःऊचुः॥कनककुंडलमंडितषण्मुखंवनराजिविराजितलोचनं॥निशि

शि॰व॰ नशास्त्रशरासनधारिणांशरवणोद्भवमीशसुतंनुनः॥१६७॥ सिंदूरारुणमिंदुकांतिवदनंकेयूरहारादिभिः दिव्यैराभरणै
८२ र्विभूषिततनुंस्वर्गस्यसौख्यप्रदं॥ अंभोजाभयशक्तिकुक्कुटधरंरक्तांगरागोज्वलंसुब्रह्मण्यमुपास्महेप्रणमतांसर्वार्थ
सिद्धिप्रदं॥१॥ कवच॥ शिखांरक्षेत्कुमारस्त्वस्तुकार्तिकेयःशिरोवतु॥ ललाटंपावनीसूनुः विशाखोवतुभ्रूयुगं॥
१॥ नेत्रेमाग्नैयश्चभेदीमाननासिकांशिखिवाहनः॥ कर्णौद्वयंशक्तिधरः कर्णमूलेषडाननः॥२॥ गंडयुग्मंमहासेनः
कपोलौतारकांतकः॥ ओष्टद्वयंचसेनानीःरसनांशिखिवाहनः॥३॥ तालूकलाधरःपातुदंष्ट्रादेवशिखामणिः॥
गांगेयश्चुबुकंपातुमुखंपातुशिखोद्भवः॥४॥ हनुंहरसुतःपातुपातुकंठंसदाग्निभूः॥ ग्रीवांगौरीसुतःपातुकक्षौका
रुण्यवारिधिः॥५॥ स्कंधौममावतांस्कंदोबाहुलेयोभुजौमम॥ बाहूभवोद्भवःपातुकरौषाण्मातुरोवतु॥६॥ अंगु
लीःपिंगलःपातुहृदयंमधुमित्रजित्॥ नाभिंममोदरंचैवसुब्रह्मण्यःसदावतु॥७॥ मध्यंजगद्विभुःपातुनाभिंद्वादश
लोचनः॥ कटिंद्विषड्भुजःपातुगुल्यंपातुगुहःसदा॥८॥ जघनंजाह्नवीसूनुःपृष्ठभागंकुमारधृक्॥ ऊरूपायादु
मापुत्रःजानुयुग्मंजगत्स्थितः॥ ९॥ जंघेपातुजगत्पूज्यःपातुगुल्फौमहाबलः॥ पादौपातुपरंज्योतिःसर्वांगंकुक्कु
टध्वजः॥१०॥ ऊर्ध्वंपातुमहोदारःअधस्तात्पातुशांकरिः॥ पार्श्वेनःपातुपापघ्नःसर्वतःपातुशक्तिधृक्॥११॥ प्रा
ण्हेवतुपरंब्रह्ममध्यान्हेवतुतारजित्॥ अपराण्हेगुहःपातुरात्रौदैत्यांतकोवतु॥१२॥ त्रिसंध्यायांसुधीःपा
तुसर्वदापातुबर्हिगः॥ बहिस्थंषण्मुखःपातुअंतस्थंकृत्तिकासुतः॥१३॥ व्रजंतंसुरसेनेशःअटंतंपातुपाशधृ
क्॥ शयानंपातुमांशूरोमार्गेमांपातुशूलभृत्॥१४॥ वनेरोगेगिरिश्वरःसदारक्षतुमांगुहः॥ सुब्रह्मण्यस्यकवचं राम॰
धर्मकामार्थमोक्षदं॥ मंत्राणांपरमंमंत्रंरहस्यंरक्षकंसदा॥१५॥ पठन्श्रण्वन्सर्वपापरोगैर्मुक्तोभविष्यति॥ पु ८२
त्रप्रदंयपुत्राणांनष्टयांभक्त्यास्तवश्रवान्॥१६॥ वक्त्रैःषड्भिःशरदिंदुप्रभाभिः उद्यत्सूर्यैर्नीरजाक्षैर्युतोयान्॥ ब
र्हिध्वजश्चंदकचित्रबर्हियाहीभुबाहुः कृत्तचूडबर्हिः॥ नाभिःप्रसन्नरुचिभिःप्रसूवर्णचित्रःपायात्स्मात्कार्त्ति

केयः कुमारः॥ बर्हींद्रपत्रमपिनारिपक्षसेनानिमोडेखिलपानकग्रं॥१९॥कारुण्यपूर्णनयनं कमलायताक्षं करस्तरिका
तिलकशोभितफालदेशं॥भक्तार्तिभंजनविशोभितवाक्कदंडं डिंभप्रहाशिवयोः प्रभजंतु सर्वे॥१९॥देवाप्रत्येयागेविप्राः स्तु
यंत्यायंयंसिध्यं निस्कंदं वंदे सुब्रह्मण्यं सुब्रह्मण्यौ॥श्रीमच्चंद्रकलाधरात्मजमजं शृंगारजोभाग्यतिं गौरीपीनघनस्त
नामितपयः सारत्नमाज्ञासनं॥वालेशप्रकराभिमाननलदेदंचलाचंडानिलं सुब्रह्मण्यमगंपपुण्यचरितं वंदेपरं
देशिकं॥२०॥कारावासनिवासखिन्नविधिहृत्वंजातभानुंपुनः॥ तद्दृक्कालजचतुर्थ्यस्तनमहाकल्याणशीलंविभुं
॥क्रौंचारिंपितपादवंदितपदं वाक्मातुरंम्मातरं॥ सुब्रह्मण्यमः॥२१॥ओंकारार्थसमर्थवाचकवचोभूषाविशे
षान्वितंपारोविष्णुषडाननंशिखिकुलाधीशाम्पतुंगध्वजं॥स्कंदंसुंदरकुंददंतमनघंशंभोर्गुरुंशाश्वतं॥सुब्र॰
॥२२॥ब्रह्मांडैकसहस्रकाष्टभरणप्राचुर्यधैर्यस्फुरल्कोपाटोपकुरापपापघटितांहुंकारशूरांतकं॥ सेनान्यंसुरमा
समुन्नतभुजंचिंता॥ अंकुंभोज्ञवंसुब्रह्मण्यः॥२३॥शार्वाणीप्रणवोपदेशचतुरं श्रीकंठकंठीरवं श्रोतारंजननीभु
भांकविलसत्सिंहासनस्थंगुहं॥ भूयस्तद्भुवरणाकुलोग्रजनितंस्वर्णाद्रिराजाकृतिं॥ सुब्रह्मण्यो॰॥२४॥मार्तंडा
यतभासमानमणिभल्लावरण्यनारुण्यजिल्काहुण्यैककशरण्यपंचकमणिप्रोग्रुम्फणाशालिनं॥ दिव्यांगंभवम
गसंगतकृपातुंगोत्तरंगालयं॥ सुब्रह्म॰॥२५॥सेवातसरेमानवार्पितबहलक्ष्मांडपादावनितूलस्थूलमरीचिस
र्वपसमग्रोपायनंमामिनं॥ नानावाद्यमृदंगशंखपटलीघोषांकपूजावितंसुब्रह्म॰॥ पुत्रस्नेहविमोहवर्धित
शिवावक्षोजकुंभस्रवन्नीरपूरकुमारपूर्वविलसद्वारानदीवासिनं॥ विष्णुब्रह्मसुरासुरार्चितमणिस्वर्णोज्वलम्मा
दुकंसुब्र॰॥२६॥देवंशक्तिधरंकुमारमतुलंदिव्यावतारंवटुं भावातीतमनीनसंसक्तिमनः पद्माग्रसद्मप्रियं॥भ
क्त्यायेप्रणमंतितेनगतभयाकारुण्यकल्याणमाभुक्ताभोगसुखंलदीयकृपयामुक्ताभवंति ध्रुवं॥२८॥ वंदारवंदा
मुनिवर्यसंघागणेश्वराः स्कंदसहस्रनामभिः॥ तथाष्टनाम्नांशतकेनतत्र देवंमुदातंकवचेनतुष्टुवुः॥२९॥स्कंदो

शि॰र॰ सुराणामनुग्रहाद्देवान्मुनीनामीशानभगणेशचूडलन्॥ स्तुभक्तवर्यानकरोत्सुरोत्तमान्कुमारवर्योघसमर्चितार्यः॥ २०॥ स्कं
८३ दंसुरास्तोत्रवरैः सुभक्तिनोपरतोष्यतिप्रीतमनाः सुभक्तितः॥ तस्मिन्प्रहृष्टे विदधातिकामानकामयुक्तेपिविमुक्तिदो
भवेत्॥ २१॥ इतिश्रीशिवरहस्ये ईशानाख्येऽष्टादशांशे स्कंदसहस्रनामाष्टोत्तरशतनामकवचस्तोत्रंकथनंनाम
अष्टात्रिंशोध्यायः॥ ३८॥ श्रीईशानायनमः॥ मुनयऊचुः॥ व्रजामकिंलकाशिकामघकुलादिसंनाशिकांविश्राम
मशीकर्शीकांद्विजभजामतांकालिकां॥ पश्येमविश्वेश्वरमेवतत्रपजेमचिल्वैश्चसमर्चयाम॥ १॥ स्नास्यामगं
गाभसिपापमुक्त्यैव्रजेममुक्तिंपरमामथांते॥ मुनयोविनयोज्ज्वलास्तदानींतनयैः स्वैः स्वकलत्रशिष्यसंघैः॥ २॥
मथिताग्रयएवभग्नदुःखाः शिवमानर्चयपुत्तदाविमुक्तं॥ स्तेनेननेनमुनयोपिचभस्मभूषायोवादिरक्तहृदया
सदयानदानी॥ ३॥ कषायमात्रवसनायपुरीशकीवासायचारुतपसेधृतनिश्चयास्ते॥ इतिहोचुरवंविना
श्वरोत्थवाचंकृतहृत्वाप्रसमापितोदसत्राः॥ ४॥ स्तुतिनत्याप्रतिपूज्यसूतमिष्टंशिपिविष्टोरुकथामतावृतंतद
॥ ऋषयऊचुः॥ किंसत्रैरखिलैर्व्रतादिकरणैर्दानैश्चदीनावनैः किंवापावनतीर्थगाहनमहाधर्मैरलंनःफलैः
॥प्राप्यैनश्रुतिराशिशेखरलसत्कैलासवासंकदामोदायैवसदास्तुशंकरकृपापीयूषकंदेवलं॥ ५॥ किंतस्त्री
तिकरंमहेंद्रसदनंयत्रैवतप्त्यामहेप्याद्देहांतविभूतिधारणयुतापुंड्राक्षमालाधरा॥ ह्रियश्रीशिवलिंगपूज
नरताविल्वैश्चनीरैः परंनिश्चैयायसदामुदाविमुक्तसदनेवासोस्तुनः श्रेयसे॥ ६॥ सूतउवाच॥ नमतामधिपाय राम॰
मेनमोस्तुनयमतंमेस्तुगिरींद्रजाधिपाद॥ सुनतेर्मेस्तुसदैवविघ्नराजेनमनंसेस्तुहृदैवषण्मुखाय॥ ७॥ भूयांमाया ८३
दिमोहप्रशमितदुरिताभस्मरुद्राक्षभाजाशांतात्मांताभवंतः सुकृतकृतिवराः सच्चिणोमित्रपाश्ववाः॥ शांतालिं
गसमर्चनार्जितयशात्तुंगांगसंगाद्बमेभूयात्यातकभंगमेवनियतंशंभोस्फुलिंगेक्षणात्॥ ८॥ ऋषयऊचुः॥
धन्योमान्योस्तिकोन्यः नवसहशगुणानान्यमीक्षामहेद्यंवैद्यंवेद्यपदार्थबोधनरतंसंसाररुक्नाशकं॥ ला

मेवात्मगुणप्रधानमधुनाहंभोः कथ्यासादरंसंसारांबुधिनारकंमृरकृपापात्रंसदानानमः॥९॥ कोवायंरंशिवरहस्यमधु
प्रकृष्टंतिष्ठावतात्र्यस्तुदाशिपिविरूमिष्ठं॥ वेतुंचधर्तुमपयावाकिमुवतुमेवंशिष्टोवरिष्ठमहिमाभगवान्त्वमेव॥
१०॥ नंदीशविघ्नेशसमोसिषण्मुखप्रभावतुल्यप्रतिमल्लमेव॥ त्वंनोगुरुःशिवकथांसुरसामतस्याप्रदाताहिदीन
वदनानभवामभावाः॥११॥ सत्रंपवित्रमधुनासततंत्रिनेत्रचारित्रपात्रमधुवत्सपिवामश्रोत्रैः॥ चित्रंविचित्रपद
यंत्रितंतंत्रमंत्रसारार्थसिंधुसुरहस्यसमुत्रपुत्र्यं॥१२॥ तत्रत्रिनेत्रसुविपवित्रकटाक्षमात्रासंत्रलपातकभरा
त्परार्द्धयामः॥ देहांतरस्वहिभवेस्तविमुक्तवासपुरौषैः पचेलिमफलैर्धवलाद्रिवासः॥१३॥ तत्रैवशंकरगृहाप्रभ
वामसाभिसोमप्रकामशिरसोसितभस्मभूषाः॥ योषार्धगात्रकमनीयसरोजदललोलालकाःशिवपदांबुज
सेवकाश्च॥१४॥ किंनोब्रह्मपदेष्वुवैष्णवपदेशस्पंदेनपदेवापदंप्राप्येनाप्यमहोमहेंद्रसदनंदिक्पालकानांप
दे॥ तत्रत्यानुलशंकराचलमहाकैलासवासाधिकंनाप्नोत्येवफलंसुमुक्तिषुपरंवांछापितिश्रेयसी॥१५॥ कै
लासमौलितरवः पशवोमृगकीटनिम्नाशिवस्यकृपयाखलुसर्वदापि॥ लोकाःपुनर्दिविपदःप्रतिकल्पनाश
ब्रह्मेंद्रविष्णुमरुतोवसवोर्करुद्राः॥१६॥ कैलासवासायशिवप्रसादतःकाशीनिवासायलभेमपुरोषैः॥
यत्रैरघाज्ञानविनष्टमानसाग्रजामशीघ्रंकिलमुक्तिसिध्यै॥१७॥ कैवल्यवल्लीमिवतांपुरींतदामुदापुरारे
र्विविशुःप्रहृष्टाः॥ भिन्नाकृतेशंकरकार्मुकप्रभांतेयालखिल्याःशिथिलाघसंघाः॥१८॥ दृष्ट्वाशरदर्शनल
स्थितेवतांगंगांद्विजातुंगतरंगभंगां॥ उत्तुंगलिंगावलिसौधकुंभांअंभोधरांकप्रतिभांचकांतां॥१९॥ कैलास
शैलमणिमौलिगदिव्यमालीव्यालीवतुंगावलिसौधकेलीं॥ सस्तुःसमस्ताघहरेप्रशस्तांदिव्यांचतांश्रीमणि
कर्णिकांद्विजाः॥२०॥ संतर्प्यदेवर्षिपितॄन्ततस्तम्मुदागंगातटेतेकृतभस्मभूषणाः॥ पुंड्राक्षमालामनघोमहेशं
समर्चयंतेकिलबिल्वपत्रैः॥२१॥ गृहस्थावनस्थातथान्येचधन्याःद्विजाःशांतसन्यासिनोप्येकदंडाः॥जटा

लानिगलेक्षणासनचिताः विरक्तास्तथाब्रह्मचर्येव्रताः॥२२॥ तथानन्यः सागयोभग्नमानाः श्वनेश्वरस्यया आश्र
यानैः पितृन्स्ते॥ तथा हव्यकव्यैः समभ्यर्च्यलेखान्मुदांतर्गृहं चक्रमुः प्रक्रमैस्ते॥२३॥ विश्वेशभैरवषडाननढुंढिराज
माताऽन्नपूर्णा प्रणम्य स्वहृष्टाः॥ श्रीदंडपाणिं च तथा प्रणम्य संपूज्य पूजादिभिरैः सुभीभिः॥२४॥ अलाबुदारु
वेणुभंगधातुकुंभस्थं गतः प्रकृष्टगांगजांभसानमोन्नरुद्रसूक्ततः॥ प्रकृष्टपंचपापहृत्सुपंचवर्णमंत्रतः प्रसिद्ध
लिंगमैश्वरं सुबिल्वपल्लवैः सुमैः॥२५॥ नैवेद्यधूपदीपतो निवेद्य चांबुभिः फलैर्वराऽन्नभक्ष्यभोज्यकैः प्रसाद्य च
प्रतुष्टुवुः॥ ऋषयऊचुः॥ विश्वेश्वरोयं मदनांतकोयं पुरांतकोयं हिमवांतकोयं॥ सुरासुरौघानतपादपद्मः स
माश्रितो नो स्तुमुदाहृदेति॥२६॥ एषब्रह्मैव बद्धं श्रुतिरतुलबला हि श्रुतं तत्पदाब्जं निर्वृतिं प्रमथाधिनाथ भगवन्
श्रीविश्वनाथप्रभो॥ कोशातीतमनंतमव्ययमजं प्राकारयां प्रकाशं परं वेदावेद्यपदं विशोकमजरं पश्ये मिलिंगं
हिते॥२७॥ मोचामदाचामनवेदवाचो निवर्तिभावामनसासहैवते॥ भजामिलिंगं स्थितमप्यलिंगं तमासहन्ता
यं तमसः परं त्वां॥२८॥ देव्यन्नपूर्णा कृपया सुपूर्णा त्वां हृत्वाकाशगतेत्वपर्णा॥ किं वर्णयामस्तव सुप्रभावं भवा
र्णवांतः पतितान्समुद्धर॥२९॥ शिवे विशालाक्षिपदांबुजं ते प्रदेहि भिक्षां निखिलेषु साक्षिणी॥ नैश्रेयसीं नः श्रम
कष्टनाशिनीं भवामभुक्ताश्चकदास्ततस्तव॥३०॥ श्रीढुंढिराजशरणागतकाशिवासविघ्नौघघातकर्तितं पारि
निघ्नयाशु॥ गंधाबुपुष्पवरमोदकतः प्रपूज्य नं त्वामहे नव पदांबुज भंगभावाः॥३१॥ श्रीभैरवारव्य भरश्व
णांतयुग्याति गमैकपातकभरैः अभिपूरिताये॥ कालायमीबुपरिपूज्यतवांजपादं विप्रावसेमनियतं तप
श्रुपाघ्नशमुक्तो॥३२॥ श्रीदंडपाणिचरणास्मरणानुरक्तान्मुक्तान्करोतिनियतानयशंभुभक्तान्॥ तस्मात्तवार्चनविधौ
खलुजागरूकाः विप्रावसेमनिपता हृदयैर्विशोकाः॥३३॥ नाकर्णिये स्तवकथामणिकर्णिकेते निर्णीयते यमग
निर्मुक्तदुःखवार्त्ता॥ त्वत्तीर्थमज्जनवतां नहि जन्मपुंसां मुक्तिंददासिपरमां शिवभक्तिमिष्टां॥ योज्ञानवापीमविगा

हृतेपि न नंदन्ते पापमपाकरोति ॥ पापीयसी नैव गतिं प्रयाति यातापि भक्ष्यप्रतिमो भवेत्सः ॥ एवं स्तुत्वा च त्वां प्रतिदिन
मघनेति विप्रवर्याः समस्ता देवा नर्गृह्णमेव नन्त्वद्वाराणां चक्रुर्मुदा तत्रैव ॥ तन्मुक्तिमंडपे तत्र नियतं स्थित्वैव चक्रुः कथाः
काशीवासिनिवास ॥ हृष्टमनसः शिष्टाः सदाचारतः ॥ ३६ ॥ प्रविश्य केचिद्विश्वेशवर्यं स्तुतिं नतिं नियताश्च भवानि मु
क्ताः ॥ सिध्यासु रेशनिष्ठाः भवभयहरयोग्युक्तिचिन्ताविरागाः ॥ केदारार्चनतत्पराः यतिवराः श्रीव्योमकेशार्चि
काः केचित्ते शिवभक्तिसारसरसा तत्राविमुक्तेश्वरं ॥ ओंकारेश्वरमंत्र तेसु नियताः श्रीकृत्तिवासेश्वरं ॥ श्रीमत्त्रि
लोचनपदानि पदं प्रदोषसंन्यासदोषनिकराः पशुपेशनिष्ठाः ॥ ३९ ॥ मुक्त्यैव संततिनियताः फलमूलपर्णैर्वातां
बुपाहरा परा अनघा ब्रुवे ॥ केचिद्दूत्पादशिन महाभस्मत्रिपुंड्रूदरा रुद्राक्षोद्रसरा महेश्वरमहालिंगाभिगां
भसा ॥ ४० ॥ संपूज्यामलबिल्वपल्लवसुमैः संपूज्य तस्तत्पदा केचित्स्थाणुवदास्थिता यतिवराः श्रीतारसंजापिनः
॥ काश्यां प्रविश्य यदि ते विशिष्टाः अन्यत्र दिष्टां तगता पितेपुनः ॥ नो यान्ति लोकं प्रविशन्ति सौम्याः ते मुक्तिमंडपम
वाप्यमरवादिधर्मैः ॥ ४१ ॥ संसिद्धिमुत्थमनसः शिवविश्वनिष्ठाः ते पुष्पजेपुप्रणवं च रुद्रं ॥ पंचाक्षरं पावनमेव ते
द्विजाः कुर्वन्ति सर्वदा प्रांजलयो यथास्तं काशीरहस्यामममलसारं ॥ वासाय धर्मेण शिवार्चनोद्यताः ऊर्ध्वं तमाशिन्युमु
पासितुं गताः ॥ ४२ ॥ इति श्रीशिवरहस्ये ईशानाख्ये नूर्ध्वांशे अविमुक्तवाराणसीतीर्थक्षेत्रागमनं नाम एको
नचत्वारिंशोऽध्यायः ॥ ३९ ॥ श्रीईशानाय नमः ॥ ऋषय ऊचुः ॥ श्रीविश्वेनाथवरसंनिधिगा समग्राः सर्वाघपाप
निकरैरपि विप्रमुक्ताः ॥ मुक्ताविमुक्तसदने मदनांतकार्चापूजाधना ह्यसुलद्दाववश्वास धर्मान् ॥ १ ॥ सूत उवाच ॥
क्षेत्रे च तत्र शांभोयमशमनियमैर्भस्मरुद्राक्षभाग्भिर्लिंगार्चासु समुद्यतैः शिवकथासारादरैः शांभवैः ॥ त
त्क्षेत्रनिवाससंभवफलैः संप्राप्यते यद् द्विजा काशीनादित पापशैलनिकराविश्वेश्वरस्याज्ञया ॥ २ ॥ हे विश्वना
थममनाथ सनाथयाद्य हे मन्मथांतकविभो परिपाहि शंभो ॥ आनंदकाननिवास पिनाकपाणे वाराणसीशवंद्यस

शि॰ष॰ हिमन्भगवन्नमस्ते॥ ३॥ अन्नाधिपत्रिदशवंद्यशिवाद्यवेद्यवेदांतगेयगरलाशनकालकाल॥ गंगाधरत्रिपुरसूदनलोकना
८५ थश्यालोरुमालभगवन्सततंनमस्ते॥ ४॥ हेसंगमेशरमणीश्वशिवभूषया: हेशामामकधियापरियाहिदीनान्॥
क्षयद्वीरकाकोदरानधूल्हारस्फुरत्स्फारकर्पूरगौरप्रसीद॥ विभोधीरविश्वेशभूतेशशंभोमहाघोरवैश्वानराक्षप्र
सीद॥ श्रीसंगमेशतवलिंगसमर्चनेनशंभाभिसंगततनवोप्यखिलाद्यभंगाः॥ ६॥ गंगांभसाप्लुतशरीरसमस्तसं
गानांगाभवेमहिपुनःतनपादसंगाः॥ श्रीमत्त्रिलोचनसनातनदेहहीनपंचाननावनकृतांशननेत्रशंभो॥ ७॥ त्रि ५
वासीकृतानंदवनप्रसीदसीददृग्जातिनिवहसहमानशंभो॥ सिद्धेशविघ्नेशकरुप्रसिद्धिसिध्यामिनंद्यमहिमन्ह
रम्यस्वदेह॥ ८॥ विमानयप्राप्तसुखान्कुरुध्वक्षिप्रंत्वमद्यैवदयावतादृश॥ केदारेश्वरहारभास्वरमहाकाकोदर
कल्पकानत्याकल्पभवस्यघोरजनमहामुंडादिवंडांगक॥ नेत्राहस्फारतस्करांतकहरस्वामिनप्रसीदाशुनःसोमोत्तं
सकिरीटकोटिविलसद्दिग्वासहासास्फुरत्॥ ९॥ भासाभासितकोकहृत्कमलसंवासैककृतिवस॥ कासालांनियमे
नयोक्षणावतांमायाभवेत्साहसंमासेनैवसंमासमेष्यतिविभोहासायदुःखंहिनः॥ शंभोविभोपशुपतीश्वरका
लकालहेआलमालगरलाशवहरत्तशूल॥ दृष्टैकपक्षसुरपक्षमहोक्षवाहव्यक्षाधुनारक्षकलाक्षकोक्ष्या॥ ११
संसारांबुधितारकांतकहरस्वामिनमृडानीपतेमाराधारशरादिभिन्नहृदयान्संवीक्ष्यविश्वाधिक॥ सत्वंनार
कनामकेश्वरविभोपाहिप्रपन्नान्मुनीन्नस्मानस्थिरधीरवीरभगवंत्संहारयाघंहिवः॥ १२॥ हेमध्यमेशकरुणा राम॰
करशूलपाणेपाहीशपाशिनसुमेध्यवचांतरंग॥ अध्येमविध्यैवतवोरुनामयन्मुक्तिसिध्येनवसुप्रसाद ८५
तः॥ १३॥ कदानमुक्तांत्वविमुक्तमेतदुकेषुमुक्तिप्रथमाययत्वया॥ देवाविमुक्तेश्वरमुक्तिभाग्यदेराग्यमप्य
त्रदस्वनःसदाहेस्वर्णवर्णभगवन्परिपूर्णशंभोचक्षुश्रवोल्कीर्णसुकर्णशंभो॥ हेअन्नपूर्णापतयेनमस्तेत्त
त्रेत्थमेवनियतंप्रवदंतिशैवाः॥ १५॥ हेधीरेशमहेशशंकरविभोपाहीशविश्वाधिकशाश्वतनश्वरविश्वपाल

कविभोपाहिप्रसीदधुना॥ हेमृत्युकालकरलावदरखालपाघपाहिप्रसीदपरमेश्वरकालकाल॥ हेकलिवासजनवास
महेश्वराद्य हे श्रीनिवासनयनार्चितपादपद्म॥ हेसंगमेशदुरितौघविभंगकेश श्रीनारकेश शशिमौलिकलालनाम
॥२७॥ हेसिद्धेशपाहिदयया विधीशदीनं हिमां श्रीमत्त्रिलोचनजनावनपाहिशंभो बुंभो हनादिमुनिवंद्यपदाब्जयु
ग्म॥२८॥ हेमध्यमेशपरिपाहि सुमेधशंभो केदारनाथ कविभोपरिपाहिशंभो॥ युगयाविमुक्तेश्वरभक्तमुनिं शांतिं
प्रदेहि नवलिंगसमर्चनाय॥२९॥ पाहीति ये प्रातनिपूर्वकमादरेणतत्राविमुक्तसदनेप्रवदंतिशैवाः॥ ज्ञानेशविज्ञान
दकालकालयज्ञेशपाहिहदयया परिपाहिशंभो॥२०॥ ॐकारेशमहेशशाश्वतविभोपाहिप्रसीदाधुनापाहि
हेशंभोमतिकर्णिकेशभगवं नामेशलक्ष्मीश्वरदक्षेशानदयानिधानभगवन्छ्रीभारभूतेश्वर॥ आसेशानगरा
शनेशमहतेचंद्रेशपात्वद्यमां प्रक्षेशानजगद्विधानमहिमं पाहिप्रसीदाधुना॥ हेढुंढिराजशरणागतविघ्नना
श॥ वेनंडतुंडभगवन्नववक्रतुंड॥ पाहीशदयया॥२२॥ हेमंगलागौरिममाद्यमंगलंदिशाधुनापापमपाकुरु
ष्व॥ हेसंकटानिममनाशयकाशिविघ्नं निर्वासयाद्यमगतानादरलयाम्बदेवी॥२३॥ हेसंकटेभगवतीशिहृदाघजालं
पाहीतितत्रनियमेनवदंतिशैवाः॥ अक्षय्यभक्तनिकरैः प्रदेहि भिक्षां काशीनिवासजनवाव्ययाक्षत्रिहस्ते॥२४
॥ दर्वीकरैरासुरसायनमुक्तिसारमाहारमेवहिददस्वविकिमन्नसारैः॥ वंदेविशालाक्षिमहोक्षवाहप्रियांगनेपा
हिदयाकटाक्षैः॥पा०॥२५॥ हेभैरवामरवरप्रवरोग्रघोर काशीनिवासजनतावहरप्रसीद॥ मासायूपभैरेर
पारविभवैः पुष्पोत्करैस्त्वां गुडैः संपूज्याष्टमितादृमीषु नियतं निर्विघ्नतः पाहिनः॥२६॥ हेषोडशप्रवरविघ्न
पपादपद्मं संपूजमोदकनिवेद्यसुलड्डुकाद्यैः॥ पुष्पैर्श्वसिंदूरसुगंधमंडनैः काश्यांचनिर्विघ्नवसाभवंसि॥२७॥
येपंचगंगातटसीम्निकार्तिकेवैशाखमासेमणिकर्णिमज्जनाः॥ तेसज्जनाः काशिनिवासशीला आरोग्यवैराग्यसु
भाग्ययुक्ताः॥२८॥ येचंद्रकूपपरिमज्जनधूतपापाः तापत्रयोपशमनेऋणमोचनेच॥ येमृत्युकालोदककूपपा

शि.व. नापुण्येपिशाब्दहारवारिमहाघहारि॥ २९॥ येसंनिधौपशुपतेर्ध्वरकुंडवारिपापप्रचंडहरणंशरणंप्रपन्नाः॥ काश्यां
८६ स्नानोदपानायमनियमधनापावनाःसावधानाः॥ विप्रायुक्तानियुक्ताहरभजनरतास्नानपानैर्विशुध्याः हृद्दर्श्यां
मिंदुवारंप्रपिवतिजननताद्दुःखतातांकृतांतान्न्यत्रापिमतानयानिदुरितंहृङ्गिमिष्टंभवेत्॥ ३०॥ घंटाकर्णस
रोवरोदकपराःसर्वाघहाराह्वराजैगीषव्यगुहाविलोकनरतास्तेवैमहापापहाः पुण्यांतर्गृहयात्रिणोत्रनियतं
मुक्ताश्चभक्ताहितै॥ आधवार्चीनिरतंचमाधवंचप्रसाद्यवासायवसंतिसाधवः॥ पंचक्रोशपशभवंतिनिय
तापक्षेपिमासेपिवाकाश्यंतर्गृहतस्याघविलयोनश्येच्चनत्मकर्मैः॥ नाक्रामेनतनूभुपातभयंनोवागदःसं
क्रमैर्नैवाक्रोशपराभवंतिगणापातस्यात्रसंवासिनः॥ ३३॥ एवंयेनिवसंतिसततमुभाकांतार्चकाःशांकराभ
स्माक्षामलपुंड्रफालजटिलाकापिण्यलौल्येछिन्नाः॥ पुण्येषुप्रतिपर्वशर्वसुमहायात्रारतास्तेपरंमुक्ता
एवभवंतितत्रसदनेविश्वेश्वरालेकिनः॥ ३४॥ मध्याह्नभीमप्रथितसोमसमानःधामसीमाललामपरिपूज
नकृत्सधन्याः॥ येसोमवासरपराःनिशिनक्तभुक्तशक्ताश्चभक्तिपरमात्रभवंतिमुक्ताः॥ ३५॥ येवासरेष्वाःप्रथितेप्रदोषलिं
गोत्तमांगहृगनंमपतंगभंगं॥ श्रीमत्त्रिलोचनमहोत्तमलिंगमत्रसंपूज्यपानवभरैःश्चभवंतिमुक्ताः॥ ३६॥ भूतासुभूतप
तिमेवयेजेतस्वात्रभस्मत्रिपुंड्राक्षधरोनरोवै॥ योवात्रिनेत्रकृपयावरपंचवर्णोरुद्रादितारजपकृत्सभवेद्विमुक्तः॥ योन्ना
निशंभववरेयतिबुधप्रदत्तानिपुण्यलिंगप्रतिष्ठात्रमुदाकरोति॥ दानानिचैवात्रददातिपात्रेतस्याघसंघमपिखंलंकि राम
लरोतिनित्यं॥ ३८॥ एवंनिवासरसिकास्महेशंतकालेतारंसपंचाणिमहोददाति॥ तेनैवनिर्वाणमवाभवंतिभावा ८६
प्रभावतत्क्ष्मेशशिखंडमौलेः॥ ३९॥ गंगाधराश्चशिधरावरसर्पहाराहाराविहाररमारजनाद्यगाराः॥ तेवैभ
वंतिरुचिराम्बगरह्मारधीरामारांगसंभवमहासितभस्मधाराः॥ ४०॥ येयेकैलासमौलौनिवसनःहृदयायांस्य
ह्नेनेयुकाशीवासायात्रपवित्रशीलनिरताद्दुःखौघसंघोच्छिन्नाः॥ विश्वेशस्यकृपाभरैकसुदृशामूढास्तथापं

डिनास्तत्रैवं तानि मदेह मंडनमिदं लिंगैः परं भूषणं।। ४१।। अन्नप्रसादेन्नन तथा पभस्मसंवीक्ष्य ये साक्षिविनायकंच।।
येवात्र काश्यां निवसंत्यधर्मतो न शर्म तेषां भवते कदापि।। ४२।। ते भैरवाक्षानलरूक्षवीक्षणैः निर्दग्धपापाः
प्रभवंति सद्यः।। येत्राविमुक्ते च परान्नभोजना नतुर्य्यो जनायेगरलाशनैर्मृताः।। कृताशनं दीपयतां गृहे क्षुद्र्यूनदुर्ह
वनरोदनैरताः।। ते भैरवाक्षानलरूक्षवीक्षणैः निर्दग्धपापाः प्रभवंति सद्यः।। ४४।। येत्रानंदवने हि जाति हननैः
पानैश्चसंनिंदनैः।। शैवास्सपाक्षिमायामपवरपरधनहृद्ये रताश्चान्यदारे।। ४५।। ते भैरवाक्षा०।। ये काश्यां वस
तां क्रुधाकुलितमहो कुर्वंति नैराश्यनः रंकान्याचकपाचकान्प्रति रुषा संतो कृसंत्यल्पहं।। ते भैरवा०।। ४६।।
महाश्मशाने त्रवसंत्य साधवो ये माधवार्चाविमुखाश्च दुर्मुखाः।। ते भैरवाक्षानलरूक्षवीक्षणैः निर्दग्धपापाः प्रभवं
ति सद्यः।। ४७।। मूकांधपंगुबधिरानधरीकरोति हीनान्विहीनांश्चधनैर्हसंति ये।। ते भैरवाक्षानलरूक्ष०।। ४८
ये विश्वनाथनतिदर्शनतो विहीना वीरेशयज्ञेशविनिंदनेरताः।। ते भैरवाक्षानल०।। ४९।। ये चान्नपूर्णानतिदर्श
नोज्झितामातापित्रोर्गुरूणां विनिंदकाः।। ते भैरवाक्षानल०।। ५०।। यत्रानर्गलविभ्रमेभ्रमज्जनः शंभोर्धना
हारिणः स्तेनायेनिरपत्रपापराः तुलाविक्रेतयेगवां।। ते भैरवाक्षानल०।। ५१।। मांसानां पशुहिंसिनां रस
भवं तैलं तिलं तंडुलान्गोधूमानघमाश्मपेषदकृतो भक्ष्यांस्तथा शर्कराः।। ते भैरवाक्षानलः।। ५२।। येत्रैव गंगां
भसि नैव मज्जनाते दुर्जनाये मणिकर्णिनिंदकाः ये त्रैव साक्षात् दूर ढुंढिनो जनाः पाशर्वनाहो नन राश्वधामराः
।। ते भैरवाक्षानल०।। ५३।। येत्रैव सत्रैर्नयजंत्यहानि नो यमानि नो भिक्षुभुभेक्ष्यवर्जिताः।। ते भैरवाक्षानल०
।। ५४।। येत्रैव नित्यं निवसंत्य दंडपानीयशालाप्रतिरोधकागवां।। ते भैरवाक्षानल०।। ५५।। ये दंडपाणिपद
पंकजदर्शनेन हीनाश्च केदारसमर्चनोज्झिताः।। ते भैरवाक्षानल०।। ५६।। यत्र प्रदोषे बुसदोजमान सा
त्रिलोचनार्च्चाभयवर्जिताये।। ते भैरवान०।। ५७।। ये केचिदज्ञादिवसेन्नभोजनाः कालाष्टमीभैरवपूजनो

।क्लिन्नाः॥ ते भैरवास्याः॥ ५८॥ चतुर्दश्यां काश्यां शिवनतिविमुखा नक्तशक्तान्न भक्ता मुक्ताः प्रभवंति प्राप जनुबोधे मानुवा-
पिनः॥ ये पर्वण्यनिरोधभाषणपरा ये शर्वयात्रोज्झिनास्ते सर्वेपि महोग्रभैरवमहादंष्ट्राग्रनष्टार्विना॥ ५९॥ ये त्रिपुंड्र र-
हिता विधृतोर्ध्वपुंड्राः रुद्राक्षहारवलयोज्झितसर्वगात्राः॥ अन्यार्थ रुद्रजपिनोपि च यंत्रमंत्र विभ्रामनः स्थितिपरा
पर भैरवाशाः॥ ६०॥ पंचाक्षरं वेदगणांश्च भद्रे दद्याति यो त्रैवतिलस्य होमकृत्॥ अर्थार्थमेवात्र च संत्यसाधवोऽमाध
वोत्तुंगसुलिंगभंगकाः॥ ६१॥ प्रासादप्राकारमेश सदनं विग्रस्य वा भंगकृत्॥ यो त्रैवानेकृतघ्नतस्करखरो हारेषु निंदाकरः
॥ पुण्यघ्नो गरदः सुरासवरवः स्त्रीबालहा गोवधः सर्वे ते प्रभवंति भैरवकशाघातोग्रमात्रा नराः॥ ६२॥ ये वा पापाघवि
रोधकाश्रममहाधर्मैर्विहीना नरा घोरास्ते यमकिंकरैरपि सदा संताडिता त्रस्यंते॥ कः सोढा वरभैरवार्भटकशाघाता
ग्नि भीताः परं निर्यापा त्रभवंति रुद्रगणपा नानिष्कृतां गाः परे॥ ६३॥ किंवात्रैव रहस्यमंतरगृहे शंभोर्न मूत्रं शकृत्
निष्ठीवेन्न च किल्विषी न भवेन्नयारुध्यमारुध्यहृत्॥ तथा हरेस्मररुजं यकाशि संस्थो भूतेषु वा द्रोहकृद्दे
वं वसेन्न परं॥ ६४॥ कुर्यान्न मलमूत्रमंतरगृहे लिंगोत्तमांगे पतेत् तत्कोपि निवार्यपातकवरं नानिष्कृतं तद्भ
वेत्॥ तस्मादधांतर्गृहमध्यसंस्थो न वै गृहस्थो नयतिर्वसेन्नरः॥ ६५॥ स्कंद उवाच॥ ईशाख्यया ह्याशिधरे
णामुना शिवाथे प्रोक्तं शापयमस्थिनाग्निनिशिवोपमानः॥ पापौघनल्लदहनो महनार्थय युः सद्यो विमुक्तिकृदं
शकृतिजन्मदायी॥ ६६॥ ते सत्रिणास्त्रिनयनार्चनजा तपुण्यैः सत्पुत्रिणोऽत्र वसितो नियता गिरिज्ञोज्ञिराः॥
वन्याश्च संन्यासिवराश्च सत्रा न वर्णिनोपि विविशुः शिवमेव वांते॥ ६७॥ शिवः पादारविंदश्रिया श्रियं श्रीप
तिं विधिं॥ उत्पादयंति यो नित्यं तस्मै नित्यं नमो नमः॥ ६८ अस्तु स्वस्ति समस्त वस्तु परिरंभाग्रं भयनिस्तुलं नि
त्तोकं प्रभवं त्रुकर्मगतयो अन्यस्नमार्गा न वै॥ आस्तां वास्तवमेव लोकमखिलं नास्तं हि संगच्छतानश्वा
स्तं हस्तगतं भवेत निखिलं कस्तं भजेनो हरं॥ ६९॥ हस्तन्यस्तसमस्तलोकसुमहद्धिध्वस्तमस्तं विधेः व

सुख्यसमखक्रियादिविधुरं सन्यसदृष्टासुहृन्॥ वयंत्वक्षरिशानमघुनश्शरं कस्तोत्रमोहेन्नरो विश्वस्ताखि
ललोकजालमगजाकांतं भजे केवलं॥७०॥ यावत्सूर्यादिदेवक्षितिनियमखिलासागरालोकपालावंद्रं
ह्यानलवायवः विधिहरीशानादयपर्वताः॥ नद्यः सद्योघहृद्यः यमनियमपराविप्रज्ञानाम्नविद्याविद्योतं
नांगहर्षी शिवसुदृशकृपापात्रमात्रा पवित्राः॥७१॥ सर्वैः शर्वप्रसादाद्भुविविहितयशोखर्वगर्वैकभ
क्त्याअर्वाचीनसुखसमस्खादिकरणैः रक्षं तु गांश्च नित्याः॥ विप्राः सत्वादिशीलायमनियमहिमावृद्यवेश्या
भवंतुरूढाविद्वाविदुरवाःप्रनिदिशममलाः सर्वएवंसुशीलाः॥ अनर्गलं मंगलमस्तु नित्यं यत्नेन गला
याः पतिसुप्रसादमतः॥ स्वातिप्रजाभ्योहि परां च नुष्यदां सदाविपक्षारणामस्तु मत्यां॥ ७२॥ इति श्री
शिवरहस्ये महादशांशे ईशानाख्ये सूतमुनिसंवादो नाम च
त्वारिंशोध्यायः॥ ४०॥ इदं पुस्तकं श्रीकाशीवि
श्वेश्वरार्पणमस्तु॥ ॐगायत्रीवल्लभसांब
सदाशिवायनमः॥ ॐ श्रीशिवायनमः॥
ॐ शंकरायनमः॥ ६॥

॥ इतिश्रीशिवरहस्यद्वादशांशाईशाना
ख्यः समाप्तः॥ अपरदेवइतिहासइति॥